मघाआदि तीन सिंहमें कहे हैं ॥ ७७ ॥ मूलआदि तीन धनमें कहे हैं और शेषराशि दो दो नक्षत्रोंमें समझनी, आदित्य और मंगलवार और इनकी राशियोंके अंश सदैव अग्निके भयको देते हैं ॥ ७८ ॥ और शेष ग्रहोंके वार अंश कर्ताकी इष्टसिद्धिको देते हैं, गृहका आगत नक्षत्र यदि राशिरूपहो ॥ ७९ ॥ तो उसके नवांशके वशसे सदैव गृहको जानै विपत्तारा विपत्तिको देती है, प्रत्यरि प्रतिकूल (उलटा) फलको देती है ॥८०॥निधननामकी तारा सर्वथा मरणको देती है. वर्जने योग्य इन ताराओंमें गृहनिर्माण अशुभदायी होता है ॥ ८१ ॥ प्रत्यरितारा महान्

मूलादित्रितयञ्चापे शेषराशिद्विके द्विके । सूर्यारवाररात्र्यंशाः सदा वह्निभयप्रदाः ॥ ७८ ॥ शेषग्रहाणां वारांशाः कर्तुरिष्टार्थसिद्धिदाः । गृहस्यागतभं यत्तु तद्द्विराश्यात्मकं यदि ॥ ७९ ॥ तन्नवांशवशात्तत्र ज्ञातव्यं सर्वदा गृहम् । विपत्प्रदा विपत्तारा प्रत्यरिः प्रतिकूलदा ॥ ८० ॥ निधनाख्या तु या तारा सर्वथा निधनप्रदा । विवर्ज्यतारकास्वेतन्निर्माणमशुभप्रदम् ॥ ८१ ॥ प्रत्यरिस्तूग्रभयदा त्रिविंशर्क्षे तु मृत्युदा । निधनाख्या तु या तारा स्त्रीसुतार्तिप्रदायिनी ॥ ८२ ॥ कुर्वन्नज्ञानतो मोहाद्दुःखभाग् व्याधिभाग्भवेत् । तिथौ रिक्ते दरिद्रत्वं दर्शे गर्भनिपातनम् ॥ ८३ ॥ कुयोगे धनधान्यादिनाशः पातश्च मृत्युदः । वैधृतिः सर्वनाशाय नक्षत्रैक्ये तथैव च ॥ ८४ ॥

भयको देती है और तेईसवें नक्षत्रमें होय तो मृत्युको देती है. निधननामकी जो तारा है वह स्त्री और पुत्रोंको दुःखदायी होती है ॥ ८२ ॥ अज्ञान वा मोहसे इनमें गृहको बनावे तो दुःख और व्याधिका भोगी होता है. रिक्कातिथिमें दरिद्रता और अमावास्यामें गर्भका पात होता है ॥ ८३ ॥ कुयोगमें धन धान्य आदिका नाश और पात मृत्युको देताहै. वैधृति और नक्षत्रकी एकतामें सबका नाश होता है ॥ ८४ ॥

अवस्थासे हीन घर होय तो स्वामी दुर्भागी होता है नाडीका वेध अशुभको देता है. तारा रोग और भयको देती है ॥ ८५ ॥ गणके वैरमें पुत्र और धनकी हानि होती है और योनिमें कलह और महादुःख होता है और यमके अंशमें दोनोंका मरण होता है ॥ ८६ ॥ नक्षत्रकी एकतामें स्वामीकी मृत्यु और वर्णकी एकतामें वंशका नाश होता है. पापग्रहके वारमें दरिद्रता और बालकोंका मरण होता है ॥ ८७ ॥ कोई आचार्य शनैश्चरकी प्रशंसा करते हैं परन्तु शनैश्चरमें चौरोंका भय होता है, हे वरानने ! (पार्वती) स्वामीके हस्तप्रमाणसे गृहको बनावे

आयुर्विहीने गेहे तु दुर्भगत्वं प्रजायते । नाडीवेधो न शुभदस्तारा रोगभयप्रदा ॥ ८५ ॥ गणवैरे पुत्रहानिर्धनहानिस्तथैव च । योनौ कलिर्महादुःखं यमांशे मरणद्वयम् ॥ ८६ ॥ नक्षत्रैक्ये स्वामिमृत्युर्वर्णे वंशविनाशनम् । पापवारे दरिद्रत्वं शिशूनां मरणं तथा ॥ ८७ ॥ केचिच्छनिं प्रशंसन्ति चौरभीतिस्तु जायते । स्वामिहस्तप्रमाणेन गृहं कुर्याद्वरानने । रेखादिहस्तपर्यंतमोजसंख्या प्रशस्यते ॥ ८८ ॥ करमानादधिकं चेत्तदाङ्गुलानि प्रदाय हित्वा च । क्षेत्रफलं गणितेन प्रसाधयेदिष्टसिद्ध्यर्थम् ॥ ८९ ॥ करमानादधिकं चेदङ्गुलानि प्रसाधयेत् । दीर्घे देयानि वा नूनं न विस्तीर्णे कदाचन ॥ ९० ॥ अङ्गुलैः कल्पिता नाभिर्वर्गीकृत्य पदं भवेत् । प्राप्तहस्तादिमानं स्यात्कुर्यादापतनं ततः ॥ ९१ ॥

रेखासे लेकर हस्तपर्यन्त विषम संख्या श्रेष्ठ कही है ॥ ८८ ॥ हाथके प्रमाणसे आधिक होय तो अंगुलोंको लेकर वा छोडकर गणितसे क्षेत्र फलको इष्ट सिद्धिके लिये सिद्ध करै ॥ ८९ ॥ हाथके मानसे अधिक होय तो अंगुलिको सिद्ध करै और गृहके दीर्घ (लंबाई) में अंगुलोंको दे और विस्तारमें कदाचित न दे ॥ ९० ॥ अंगुलोंसे कल्पना की जो नाभि है उसका वर्ग करनेसे पद होता है इस प्रकार प्राप्त हुआ जो

हस्तआदिका मान उसको करके फिर गृहको बनवावै ॥ ९१ ॥ ग्यारह हाथसे आगे बत्तीस हाथ पर्यन्त आयादिककी चिन्ता करे और उसके ऊपर न करै ॥ ९२ ॥ आय व्यय और मासकी शुद्धि इनकी चिन्ता जीर्ण गृहमें न करै और गृहके मध्यमें विधिपूर्वक शिलाका स्थापन करै ॥ ९३ ॥ ईशान दिशामें देवतागृह, पूर्वमें स्नानका मंदिर, अग्निकोणमें पाकका स्थान और उत्तरमें भाण्डारोंका स्थान बनवावे ॥ ९४ ॥ अग्नि और पूर्वके मध्यमें दधि मथनेका मंदिर, अग्नि और दक्षिण दिशाके मध्यमें घृतका घर श्रेष्ठ कहा है ॥ ९५ ॥ दक्षिण और नैर्ऋतके मध्यमें

एकादशकरादूर्ध्वं यावद्वात्रिंशहस्तकम् । तावदायादिकं चिंत्यं तदूर्ध्वं नैव चिन्तयेत् ॥ ९२ ॥ आयव्ययौ मासशुद्धिं न जीर्णे चिन्तयेद्गृहे । शिलान्यासं प्रकुर्वीत मध्ये तस्य विधानतः ॥ ९३ ॥ ईशान्यां देवतागेहं पूर्वस्यां स्नानमंदिरम् । आग्नेय्यां पाकसदनं भाण्डारागारमुत्तरे ॥ ९४ ॥ आग्नेयपूर्वयोर्मध्ये दधिमन्थनमंदिरम् । अग्निप्रेतेशयोर्मध्ये आज्यगेहं प्रशस्यते ॥ ९५ ॥ याम्यनैर्ऋत्ययोमध्ये पुरीषत्यागमन्दिरम् । नैर्ऋत्याम्बुपयोर्मध्ये विद्याभ्यासस्य मंदिरम् ॥ ९६ ॥ पश्चिमानिलयोर्मध्ये रोदनार्थं गृहं स्मृतम् । वायव्योत्तरयोर्मध्ये रतिगेहं प्रशस्यते ॥ ९७ ॥ उत्तरेशानयोर्मध्ये औषधार्थं तु कारयेत् । नैर्ऋत्यां सूतिकागेहं नृपाणां भूतिमिच्छताम् ॥ ९८ ॥ आसन्नप्रसवे मासि कुर्याच्चैव विशेषतः । तद्वत्प्रसवकाले स्यादिति शास्त्रेषु निश्चयः ॥ ९९ ॥

मलके त्यागनेका स्थान और नैर्ऋत पश्चिमके मध्यमें विद्याके अभ्यासका मन्दिर बनवावे ॥ ९६ ॥ पश्चिम और वायुकोणके मध्यमें रोदनका घर कहा है, वायु और उत्तरके मध्यमें रति (भोग) का घर श्रेष्ठ कहा है ॥ ९७ ॥ उत्तर और ईशानके मध्यमें औषधका स्थान बनवावे और भूतिके अभिलाषी राजाओंको सूतिकाका घर नैर्ऋत दिशामें कहा है ॥ ९८ ॥ वह विशेष कर प्रसव कालके समीपमासमें करना और तैसेही

प्रसवकालमें बनवावे यह शास्त्रोंका निश्चय है ॥ ९९ ॥ नवम मासके आनेपर पूर्वपक्षके शुभ दिनमें प्रसूतिके प्रारंभ समयमें गृहका आरंभ श्रेष्ठ कहा है ॥ १०० ॥ गुरुके नीचे लघुकी स्थापना करै और उसके आगे ऊर्ध्वके समान स्थापना करै, गुरुओंसे पश्चिम और पूर्वमें सब लघुओंकी अवधिकी विधि होती है ॥ १०१ ॥ लघुस्थानमें अलिंद (देहली) को रक्खे और गुरुस्थानमें न रक्खे, गृहके द्वारसे प्रदक्षिण क्रमसे जो अलिंद हैं उनके सोलह १६ प्रकार होते हैं ॥ १०२ ॥ पहिला गृह ध्रुवसंज्ञक धन धान्यका और सुखका दाता होता है. दूसरा

मासे तु नवमे प्राप्ते पूर्वपक्षे शुभे दिने । प्रसूतिसम्भवे काले गृहारम्भणमिष्यते ॥ १०० ॥ गुरोरधो लघुः स्थाप्यः पुरस्तादूर्ध्व वन्न्यसेत् । गुरुभिः पश्चिमे पूर्वे सर्वलघ्ववधिर्विधिः ॥ १०१ ॥ स्यादलिन्दो लघुस्थाने नालिंदं गुरुमाश्रितम् । प्रदक्षिणैर्गृहद्वारादा लिंदैर्दशषड्विधा ॥१०२॥ ध्रुवसंज्ञं गृहं त्वाद्यं धनधान्यसुखप्रदम् । धान्यं धान्यप्रदं नृणां जयं स्याद्विजयप्रदम् ॥ १०३॥ नन्दं स्त्रीहानिदं नूनं खरं सम्पद्विनाशनम् । पुत्रपौत्रप्रदं कांतं श्रीप्रदं स्यान्मनोरमम् ॥ १०४ ॥ सुवक्त्रं भोगदं नूनं दुर्मुखं विमुख प्रदम् । सर्वदुःखप्रदं क्रूरं विपुलं शत्रुभीतिदम् ॥ १०५ ॥ धनदं धनदं गेहं क्षयं सर्वक्षयावहम् । आक्रन्दं शोकजनकं विपुलं श्रीयशःप्रदम् ॥ १०६ ॥

धान्यनामक गृह मनुष्योंको धान्य देता है और तीसरा जय विजयको देता है ॥ १०३ ॥ और चौथा नन्द स्त्रियोंकी हानिको निश्चयसे देता है और खर सम्पत्तिका नाश करता है, कान्त गृह पुत्र पौत्रोंको देता है मनोरम गृह लक्ष्मीको देता है ॥ १०४ ॥ सुवक्त्र गृह निश्चयसे भोग देता है, दुर्मुख गृह विमुखताको देता है, क्रूरगृह सब दुःखोंको देता है, विपुल गृह सब शत्रुओंकी भीतिको देता है ॥ १०५ ॥ धनद

गृह धनको देता है, क्षय सबके क्षयको देता है, आक्रंद शोकको पैदा करता है, विपुल श्री और यशको देता है ॥ १०६ ॥ विपुल नामके सदृश फलको देता है और धनदगृहको विजय कहते हैं ॥ १०७ ॥ प्रदक्षिणक्रमसे सप्त मुखसे लघुस्थानमें रखेहुए अलिंदको जाने. गृहके पूर्व आदि दिशाओंमें रखेहुए अलिन्दोंमें क्रमसे सोलह भेद होते हैं ॥ १०८ ॥ जिसमें शुभ अलिंद न हो वह गृह कापाल नामका होता है, विस्तारसे दूना गृह गृह और स्वामी दोनोंको नष्ट करता है ॥ १०९ ॥ उस गृहको निरर्थक कहते हैं और उसमें राजासे

विपुलं नाम सदृशं धनदं विजयाभिधम् ॥ १०७ ॥ प्रदक्षिणे सप्तमुखादलिन्दं विद्याल्लघुस्थानसमाश्रितं च । गृहस्य पूर्वादिगते ष्वलिन्देष्वेवं भवेयुर्दश षट च भेदाः ॥ १०८ ॥ भवेयुर्न शुभालिन्दं गृहं कापालसंज्ञकम् । विस्तारादद्विगुणं गेहं गृहस्वामिवि नाशनम् ॥ १०९ ॥ निरर्थकं तद्गृहं स्याद्भयं वा राजसंभवम् । केचिदलिन्दकं द्वारं प्रवदन्ति मनीषिणः ॥ ११० ॥ केचिद लिन्दं शालां च केचिच्चालिन्दकञ्च तत् । गृहबाह्यस्थिताः काष्ठा गृहमत्यन्तनिर्गताः ॥ १११ ॥ काष्ठा काष्ठस्य यद्गेहं तद्वाचा ऽलिन्दसंज्ञकम् । गृहाद्बहिश्च ये काष्ठा गृहस्यान्तर्गताश्च ये ॥ ११२ ॥ तेषां कोष्ठीकृतं तिर्यग्गेहञ्चालिन्दसंज्ञकम् । स्तम्भहीनं गृहाद्बाह्यान्निर्गतं काष्ठनिर्मितम् ॥ ११३ ॥

भय होता है और कोई बुद्धिमान मनुष्य अलिन्दसे रहित द्वारको कहते हैं ॥ ११० कोई अलिंद और शालाको और कोई अलिंदकको कहते हैं, घरसे बाहिरकी जो दिशा है और जो गृहसे अत्यन्त निकसी हुई ॥ १११ ॥ काष्ठा हैं वे काष्ठका जो घर वह अलिंदसंज्ञक कह लाता है, गृहके बाहिरकी जो दिशा और गृहके भीतरकी जो दिशा हैं उनका ॥ ११२ ॥ कोष्ठरूपसे बनाया जो तिरछा घर उसको अलिंद

कहते हैं वह स्तंभसे हीन घरसे बाहिरको निकसा हुआ काष्ठका होता है ॥ ११३ ॥ गृहके मध्यसे ऊर्ध्वभागमें गयाहुआ जो घर है कोई उसे अलिन्द कहते हैं, जिस भागमें अलिन्द हो उसीमें द्वारका मार्ग श्रेष्ठ कहा है ॥ ११४ ॥ अलिंद और द्वारसे हीन गृह कोटिके समान कहा है जहां अलिन्द हो वहीं शाला और द्वार श्रेष्ठ कहा है ॥ ११५ ॥ शाला अलिन्द द्वार इनसे हीन गृहको बुद्धिमान् मनुष्य न बनवावे, जो वास्तुका विस्तारहो उतनीही ऊँचाई शुभ कही है ॥ ११६ ॥ विस्तारसे दूना शुकशालनामक गृह बनवाना, दश और चार शालाके

मध्यादूर्ध्वगतं गेहं तच्च वालिन्दसंज्ञकम् । यत्रालिन्दश्च तत्रैव द्वारमार्गं प्रशस्यते ॥ ११४ ॥ अलिन्दं द्वारहीनञ्च गृहकोटी समं स्मृतम् । यत्रालिन्दं तत्र शाला तत्र द्वारं च शोभनम् ॥ ११५ ॥ शालालिन्दद्वारहीनं न गृहं कारयेद्बुधः । यद्वास्तुनि च विस्तारः सैवोच्छ्रायः शुभः स्मृतः ॥ ११६ ॥ शुकशालो गृहः कार्यो विस्ताराद्द्विगुणो दश । चतुःशालगृहस्यैवमुच्छ्रायो व्याससम्मितः ॥ ११७ ॥ विस्ताराद्द्विगुणं दैर्घ्यमेकशाले प्रशस्यते । विस्तीर्णं यद्भवेद्गेहं तदूर्ध्वं त्वेकशालकम् ॥ ११८ ॥ द्विशाले द्विगुणं प्रोक्तं त्रिशाले त्रिगुणं तथा । चतुश्शाले पञ्चगुणं तदूर्ध्वं नैव कारयेत् ॥ ११९ ॥ शिखा चैव त्रिभागं तु गृहं चोत्तमसंज्ञकम् । एकं नागोद्धृसंशुद्ध्या द्वे च दक्षिणपश्चिमा ॥ १२० ॥

गृहकी ऊँचाई व्यासके समान होती है ॥ ११७ ॥ विस्तारसे दूनी लंबाई एकशाला (एकमजला) गृहकी होती है जो गृह विस्तीर्ण होता है वह ऊँचाईमें एक शालाका होता है ॥ ११८ ॥ द्विशालमें दूना और त्रिशालमें त्रिगुणा कहा है और चतुःशालमें पंचगुणा जानना उससे ऊपर गृहको न बनवावे ॥ ११९ ॥ जिसकी शिखा गृहके त्रिभागकी हो वह उत्तमसंज्ञक होता है यदि एकशाला गृहकी आजाय तब आठ और सताईसकी संशुद्धि (भाग) से सौम्यवर्जित अर्थात् उत्तरशालासे हीन करना और यदि दोशालाओंसे युक्त घर बनाना होय

तो दक्षिण और पश्चिममें शाला बनानी ॥ १२० ॥ तीन शालाका घर बनाना होय तो पूर्वकी वा उत्तरकी शालासे रहित घर बनाना और शालाका विभागभी इसी पूर्वोक्त विधिसे करना पूर्वमें ऊपर तीन भागोंको छोडकर और पश्चिममें दो भागोंको छोडकर ॥ १२१ ॥ जो मध्य भाग होता है वह नाभि जाननी यह पराशर ऋषिने कहा है। उसमें शालाको बनवावे। इसी प्रकार पूर्व आदि चारों दिशाओंमें एक आदि ध्रुव वाममार्गसे होते हैं ॥ १२२ ॥ विस्तार और दैर्घ्य अर्थात् चौडाई और लंबाईके एक एक भागको मिलाकर वायव्य आदि कोणोंमें विस्तार

त्रिशाले पूर्वतो हीनं कार्यं वा सौम्यवर्जितम् । ऊर्ध्वभागत्रयं त्यक्त्वा ह्यधोभागद्वयं तथा ॥ १२१ ॥ मध्ये नाभिं विजानीयादिति प्राह पराशरः । पूर्वादिषु चतुर्दिक्षु वाममेकादयो ध्रुवाः ॥१२२॥ विस्तारस्याथ दैर्घ्यस्य तथैवैकैकसंयुतम् । वामं वातादि कोणेषु ध्रुवं विस्तारदैर्घ्ययोः ॥ १२३ ॥ एकाद्याः स्वेच्छया सर्वे कार्या वेदसमन्विताः । अनेनैव प्रकारेण क्रियमाणे च वास्तुनि ॥ १२४ ॥ आयव्ययादिसंशुद्धिं चिन्तयन्ति न पूर्वजाः ❀ ॥ १२५ ॥

और दैर्घ्यका ध्रुव होता है, वह ध्रुव उत्तर शालासे हीन घरमें न देना॥ १२३ ॥ एक शालावाले गृहसे लेकर चार शालापर्यन्त गृह बनवाने इसी प्रकारसे बनवाने योग्य शालासे युक्त गृहमें ॥ १२४ ॥ पहिले आचार्य आय व्यय आदिकी जो शुद्धि उसका विचार नहीं करते अर्थात

* अस्यार्थः-यदि वास्तुनि एकमेव गृहं क्रियते तदा नागोडुसंशुद्धया सौम्यवर्जितमुत्तरशालाहीनं गृहम्। यदि द्विशालकं गृहं क्रियते तदा दक्षिणपश्चिमे शाला कार्या, त्रिशाले पूर्वतो हीनं कार्यं, त्रिशाले उत्तरशालया वा हीनं कार्यम्, शालाविभागस्तु अनेनैव विधानेन कार्यः--पूर्वं ऊर्ध्वभागत्रयं त्यक्त्वा पश्चिमे भागद्वयं त्यक्त्वा यो मध्यगतो भागः स नाभिः। तत्र शाला न विधेया। अनेनैव प्रकारेण पूर्वादिदिक्षु एकादयो विस्तारदैर्घ्यस्य एकैकं भागे संयोज्य वातादिकोणेषु उत्तरशालाहीनत्वात्र देयम्। सर्वे एकाद्याश्चतुःशालान्ता वेदसमन्विताः। कार्याः अनेनैव प्रकारेण शालायुते वास्तुनि आयव्ययादिशुद्धिर्न चिन्तनीया। एकशाले आयव्ययादिविचारः कर्तव्यः। द्विशाले आयव्ययादिशुद्धिर्न विचारणीया। यतः-निर्गमालिन्दानि पूर्वादीनि यानि चतुर्दिशं वेश्मनां तानि न ग्राह्याणि। नो तद्वास्तुपरिग्रहाः॥ इति॥

एकशालायुक्त गृहमें आय व्यय आदिका विचार करना और दो शालासे युक्तमें नहीं करना, क्योंकि निर्गम और अलिंद आदि जो गृहोंकी चारों दिशाओंमें हैं वे गृहोंके चारोंदिशाओंमें जो होते हैं वे सब दो शाला आदिके घरमें नहीं मानने और नवास्तुशालाआदिका विचार करना ॥ १२५ ॥ ब्राह्मणोंका गृह चार शालाओंका, क्षत्रियोंका तीन शालाओंका, वैश्योंका दो शालाओंका और शूद्रोंका एक शालाका होता है ॥ १२६ ॥ और सब वर्णोंका एक एक शालाका घर श्रेष्ठ कहा है १।२।३।४। शालाके ॥ १२७॥ गृहमें जिस प्रकार अलिंद आदि बनवावे उसी प्रका

ब्राह्मणानां चतुःशालं क्षत्रियाणां त्रिशालकम् । द्विशालं स्यात्तु वैश्यानां शूद्राणामेकशालकम् ॥ १२६ ॥ सर्वेषामेव वर्णानामेकशालं प्रशस्यते । एकशालं द्विशालं वा त्रिशालं तुर्यशालकम् ॥ १२७ ॥ यथालिङ्गं गृहं कुर्यात्तादृक्शाला प्रशस्यते । शालादिभिर्न कर्त्तव्यं न कुर्याच्चोच्चनिम्नकम् ॥१२८ ॥ समां शालां ततः कुर्यात्समं प्राकारमेव च । कुलीरवृश्चिकौ मीन उत्तरद्वार संस्थिताः ॥ १२९ ॥ मेषसिंहधनुर्द्वाराः पूर्वद्वारेषु संस्थिताः । वृषभं मकरं कन्या याम्यद्वारे समाश्रिताः ॥ १३० ॥ तुलाकुम्भौ च मिथुनं पश्चिमद्वारमाश्रिताः । ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव यथाक्रमम् ॥ १३१ ॥ यद्दिशाराशयः प्रोक्तास्तस्मिन् शाला प्रशस्यते । अथवा पूर्वभागे तु ब्राह्मणा उत्तरे नृपाः ॥ १३२ ॥

रकी शाला श्रेष्ठ होती है और केवल शाला आदि युक्त गृहको और कहीं ऊँच और कहीं नीचे गृहको न बनवावे ॥ १२८ ॥ तिससे समान शालाको और समान (बराबर) परकोटेको बनवावे, कर्क वृश्चिक मीन ये उत्तरके द्वारमें स्थित होते हैं ॥ १२९ ॥ मेष सिंह धन ये पूर्वके द्वारमें स्थित होतेहैं, वृष मकर कन्या ये दक्षिणके द्वारमें स्थित होते हैं ॥ १३० ॥ तुला कुंभ मिथुन ये पश्चिमके द्वारमें स्थित होते हैं और इसी क्रमसे ब्राह्मण क्षत्रिय वैश्य शूद्रोंका वास होता है ॥ १३१ ॥ जिस दिशाकी राशि कही है उसी दिशामें शाला श्रेष्ठ होती है। अथवा

पूर्वभागमें ब्राह्मण, उत्तरमें क्षत्रिय ॥ १३२ ॥ दक्षिणमें वैश्य और पश्चिममें शूद्र और आग्निकोण आदिके क्रमसे अन्त्यज आदि वर्णसंकरोंका वास होता है ॥ १३३ ॥ जातिसे भ्रष्ट और चौर ये विदिशाओंमें होते हैं, ब्राह्मण क्षत्रिय वैश्य और शूद्र ये पूर्व आदि दिशाओंमें कहे हैं ॥ १३४ ॥ हाथोंके विस्तारसे १०८ हाथका राजाओंका मंदिर होता है वही प्रधान बनवाना अन्य आठों दिशाओंके मंदिर इस क्रमसे बन

वैश्यानां दक्षिणे भागे पश्चिमे शूद्रकास्तथाआग्नेयादिक्रमेणैव अन्त्यजा वर्णसङ्कराः ॥१३३॥ जातिभ्रष्टाश्च चौराश्च विदिक्ष्याः शोभनाः स्मृताः । ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः प्रागादिषु स्मृताः ॥ १३४ ॥ अष्टोत्तरशतं हस्तविस्तारान्नृपमन्दिरम् । कार्यं प्रधानमन्यानि तथाष्टाष्टौ च तानि तु ॥ १३५ ॥ विस्तारं पादसंयुक्तं तेषां दैर्घ्यं प्रकल्पयेत् । एवं नृपाणां पञ्चैव गृहाणि शुभदानि च ॥ १३६ ॥ षड्भिः षड्भिर्विहीनाश्च चतुःषष्टिमितस्य च । पञ्चैव तस्य विस्तारं दैर्घ्यं षड्भागसंयुतम् ॥१३७॥ षष्टिश्चतुर्विहीनानि वेश्मानि सचिवस्य च । पञ्चषष्ठांशसंयुक्तं दैर्घ्यं तस्यार्द्धमेव च ॥ १३८ ॥ नृपाणां महिषीणाञ्च प्रशस्तं पञ्च चैव हि । षड्भिः षड्भिश्च वर्ज्यानि अशीत्याश्च तथैव च ॥ १३९ ॥

वाने ॥ १३५ ॥ इनके विस्तारके पादसे युक्त लम्बाईकी कल्पना करै इस प्रकार राजाओंके गृह पांचही शुभदायी होते हैं ॥ १३६ ॥ और चौसठ ६४ हाथके घरमें छठे २ भागसे हीन वे पांच गृह होते हैं उनका विस्तार और लम्बाई छः भागसे युक्त होती है ॥ १३७ ॥ और चौसठ हाथसे न्यून मंत्रियोंके पांच घर होते हैं और छठे ६ भागसे युक्त अथवा विस्तारसे आधी उनकी लम्बाई होती है ॥ १३८ ॥ राजाकी रानि

योंके भी पांचही गृह श्रेष्ठ लिखे हैं और वे ८० अस्सी हाथके विस्तारसे छः छः हाथ लम्बाईके होते हैं ॥ १३९ ॥ रानियोंके घरकी दीर्घतासे ३० हाथ अधिक युवराजोंके घर होते हैं और युवराजके घरसे ५० हाथ अधिक राजाके भाइयोंके घर होते हैं ॥ १४० ॥ राजा मन्त्री इनके घरोंके बीचका जो प्रमाण उतना घर सामन्त और राजपुत्रोंमें श्रेष्ठोंका घर कहा है ॥ १४१ ॥ राजा और युवराजके गृहोंके बीचका जो प्रमाण है उतना घर कंचुकी वेश्या और कलाओंके ज्ञाताओंका होता है ॥ १४२ ॥ युवराज और मन्त्रियोंके घरका जो

त्रिंशद्युतं तदैर्घ्यं च युवराजगृहाणि च । पञ्चाशद्ऊर्ध्वं तस्यैव भ्रातॄणां प्रभवन्ति च ॥१४०॥ नृपमन्त्रिगृहाणां च अन्तरे यत्प्रमाणकम् । सामन्तराजपुत्राणां प्रवराणां गृहं स्मृतम् ॥ १४१ ॥ नृपाणां युवराजस्य गृहाणामन्तरेण यत् । तदगृहं कञ्चुकी वेश्याकलाज्ञानां तथैव च ॥ १४२ ॥ युवराजमन्त्रिणां तु प्रभवेद्धि यदन्तरम् । अध्यक्षदूतगेहं तत्कर्मसु कुशलाश्च ये ॥ १४३ ॥ अध्यक्षाधिकृतानां च रतिकोशप्रमाणकम् । चत्वारिंशच्चतुर्हीनाः पञ्च गेहा भवन्ति हि ॥१४४॥ षड्भागसंयुतं दैर्घ्यं दैवज्ञभिषजां तथा । पुरोहितानां शुभदं सर्वेषां कथयाम्यतः ॥ १४५ ॥ हस्तद्वात्रिंशता युक्तं विस्तारस्य द्विजालयम् । विस्तारसदृशांशस्तु दैर्घ्यं तस्य प्रकल्पयेत् ॥ १४६ ॥

मध्य प्रमाण हो उतना प्रमाणका घर अध्यक्ष (साक्षी) दूत इनके कर्ममें जो कुशल हैं उनके घर होते हैं ॥ १४३ ॥ अध्यक्ष अधिकारी इनके घरभी रति और कोश घरके प्रमाणमें होते हैं और छत्तीस ३६ हाथमें जिनका प्रत्येक प्रमाण हो ऐसे पांच घर होते हैं ॥ १४४ ॥ इनसे छठे भागसे युक्त जिनकी लम्बाई हो ऐसे घर ज्योतिषी और वैद्योंके होते हैं और पुरोहितोंका घरभी इसी प्रकारका सुखदायी होता है. इसके अनन्तर सबके गृहोंको कहताहूं ॥ १४५ ॥ बत्तीस हाथसे युक्त जिसका विस्तार हो ऐसा घर ब्राह्मणोंका होता है और विस्तारके तुल्य

है भाग जिसका ऐसेही उनकी लम्बाई होनी चाहिये ॥ १४६ ॥ और क्षत्रिय आदि तीनों वर्णोंका घर पूर्वोक्तही समझना, राजा और सेनापतियोंके घरका जो मध्यभाग हो उतने प्रमाणका कोश घर और रतिघर होते हैं और सेनापतिके घरके मध्यका जो प्रमाण हो ॥ १४७ ॥ ॥ १४८ ॥ वह चारों वर्णोंके राजपुरुषोंका घर कहा है और मातापिताके घरका जो मध्य प्रमाण हो उतना पारशव आदिके घरका प्रमाण होता है ॥ १४९ ॥ ब्राह्मणके घरका प्रमाण शूद्रके घरके संग जो होय वह घर मूर्धाभिषिक्त और मृतकण्टकका होता है ॥ १५० ॥ इनके पीछे

त्रयाणां क्षत्रियादीनामालयं पूर्वचोदितम् । नृपसेनापतेर्गेहस्यान्तरं यद्भवेदिह ॥ १४७ ॥ तत्कोशगेहं भवति रतिगेहं तथैव च । सेनापतिगृहाणां च अन्तरे यत्प्रमाणकम् ॥ १४८ ॥ चातुर्वर्ण्यस्य यद्गेहं तद्राजपुरुषं मतम् । अथ पारशवादीनां मातापित्रोर्यदन्तरम् ॥ १४९ ॥ ब्राह्मणस्य च यन्मानं शूद्रेण सह यद्भवेत् । मूर्द्धावसिक्तक्षेत्रासु तथैव मृतकण्टकः ॥ १५० ॥ पश्चाच्छ्रमिजनानां च यथेष्टं कारयेद्गृहम् । शतहस्तोच्छ्रितं कार्यं चतुःशालं गृहं भवेत् ॥ १५१ ॥ प्रमितं त्वेकशालं तु शुभदं तत्प्रकीर्तितम् । सेनापतिनृपादीनां सप्तत्या सहिते कृते ॥ १५२ ॥ व्यासे चतुर्दशहृते शालामानं विनिर्दिशेत् । पञ्चत्रिंशद्धृतेऽन्यत्रालिन्दमानं भवेच्च तत् ॥ १५३ ॥

श्रमीजन (भृत्य आदि) के घरको अपनी इच्छाके अनुसार बनवावै जिस घरमें चार शाला हों उसकी ऊँचाई सौ १०० हाथकी बनवावे ॥ १५१ ॥ जो एक शालाका हो वह प्रमितही सुखदायी कहा है, सेनापति और राजाके घरके प्रमाणके व्यासमें सत्तर ७० मिलाकर ॥ १५२ ॥ १४ का भाग देनेपर भागोंके प्रमाणसे शालामान कहा है, और ३५ का भाग देनेपर वही अलिंदका मान होता है ॥ १५३ ॥

शालाके तीसरे भागकी तुल्य वीथी (गली) बनवानी. भवनसे पूर्व भागमें उष्णीष वा वस्त्र रखनेका स्थान, पश्चिममें शयनका स्थान होता है ॥ १५४ ॥ जो शेषों पार्श्वोंमें अवष्टम्भ सहित और सब दिशाओंमें दृढ होता है. विस्तारके सोलहवें भागमें चार हाथ मिलाकर जो प्रमाण हो ॥ १५५ ॥ उतना प्रमाण उसके मध्यकी ऊँचाईका बुद्धिमानोंने कहा है और समस्त घरोंकी ऊँचाई द्वादश भागसे न्यून बनवानी ॥ १५६ ॥ पृथिवीके पति राजा राजसूय आदि यज्ञोंसे जो परमेश्वरका पूजन करते हैं उनका उत्तम भवन आठ जिनमें आधे हों ऐसे नलोंसे

शालात्रिभागतुल्या च कर्तव्या वीथिका बहिः । भवनात्पूर्वतोष्णीषं पश्चास्त्वापाश्रयं भवेत् ॥ १५४ ॥ सावष्टम्भं पार्श्वयोस्तु सर्वत्र सुस्थितं भवेत् । विस्तारषोडशांशस्तु चतुर्हस्तयुतश्च यः ॥ १५५ ॥ तदन्तरस्योच्चतरं प्रमाणं प्रवदेद्बुधः । द्वादशभागेनोनं च समस्तानां प्रकल्पयेत् ॥ १५६ ॥ यजन्ते राजसूयाद्यैः क्रतुभिर्ह्यवनीश्वराः । नलैरर्द्धाष्टमैस्तेषां कारयेद्भवनोत्तमम् ॥ १५७ ॥ तथा च सप्तमैरेव विप्राणां कारयेद्गृहम् । अर्द्धषष्ठैः क्षत्रियाणां वैश्यानामर्द्धपञ्चमैः ॥ १५८ ॥ त्रिभिस्सार्द्धैश्च शूद्राणां भवनं शुभदं स्मृतम् । स्वगृहाणां विभागेन प्रमाणमिह लक्षयेत् ॥ १५९ ॥ विस्तारायामगुणितं नलैः षोडशभिः स्मृतम् । विषमाः शुभदा ह्येते समा दुःखप्रदायकाः ॥ १६० ॥

बनवावे ॥ १५७ ॥ और सात जिनमें आधेहों ऐसे नलोंसे ब्राह्मणोंके घरोंको बनवावे और छः जिनमें आधे हों उनसे क्षत्रियोंका, पांच जिनमें आधेहों ऐसे नलोंसे वैश्योंका घर बनवावे ॥ १५८ ॥ और ३ जिनमें आधे हों ऐसोंसे शूद्रोंका घर बनवाना कहा है, अपने अपने गृहोंके विभागसे यहां प्रमाण देखना ॥ १५९ ॥ विस्तार और आयाम जो १६ नलोंसे गुननेसे आवै उतना प्रमाण कहा है जो विषम आवें तो शुभदायी

होते हैं और सब दुःखदायी होते हैं ॥ १६० ॥ व्याससे सोलहवें भागका जो प्रमाण वह सब गृहोंको मिति (प्रमाण) कही है यह उन गृहोंका प्रमाण है, जो पक्की ईंटोंके हों काष्ठकी ईंटोंके कदाचित् नहीं ॥ १६१ ॥ राजा और सेनापतिके जो घर उसके द्वारका प्रमाण बुद्धिमानोंने १८८ एकसौ अट्ठासी अंगुलका कहा है ॥ १६२ ॥ ब्राह्मण आदिकोंके द्वारका प्रमाण २७ सत्ताईस अंगुलका कहा है, द्वारका प्रमाण जो कहा है उससे तिगुनी ऊँचाई शास्त्रमें कही है ॥ १६३ ॥ ऊँचाईके हाथोंकी जो संख्या है उतनेही प्रमाणके अंगुल दोनों शाखाओंमें अधिक बन

व्यासाच्च षोडशो भागः सर्वेषां मितयः स्मृताः । पक्वेष्टकाकृतानां च दारूणां न कदाचन ॥१६१ ॥ नृपसेनापतिगृहमष्टाशीति शतैर्युताः । अङ्गुलानि द्वारमानं प्रवदन्ति मनीषिणः ॥१६२॥ विप्रादीनां तथा सप्तविंशतिस्त्वङ्गुलानि च । द्वारस्य मानं तत्प्रोक्तं त्रिगुणोच्छ्रायमुच्यते ॥ १६३ ॥ उच्छ्रायहस्तसंख्यायाः परिमाणान्यङ्गुलानि च । शाखाद्वयेऽपि बाहुल्यं कार्यं द्वादशसंयुतम् ॥१६४ ॥उच्छ्रायात्सप्तगुणिताद्दशेति पृथुता मता । भागः पुनर्नवगुणाऽशीत्यंशस्तत एव च ॥ १६५ ॥ दशांशहीनस्तस्याग्रः स्तम्भानां परिमाणकम् । वेदास्रो रुचकः स्तम्भो वज्रोऽष्टास्रियुतो मतः ॥ १६६ ॥ द्विवज्रः षोडशास्रिः स्याद्विगुणास्रिः प्रलीनकः । समन्तवृत्तो वृत्ताख्यः स्तम्भः प्रोक्तो द्विजोत्तमैः ॥ १६७ ॥

बावे और बारह अंगुल मिलावे ॥ १६४ ॥ ऊँचाईसे सातगुनी दशा पृथुता (लम्बाई चौडाई) कही है और नौगुनेमें ८० अस्सीवां जो अंश उसे भाग और तत कहते हैं ॥ १६५ ॥ दशवें अंशसे हीन उसका अग्र कहा है:अब स्तम्भोंके प्रमाणको कहते हैं-जिसमें ४ कोण हों उस स्तम्भको रुचक और जिसमें आठ कोण हों उसे वज्र कहते हैं ॥ १६६ ॥ जिसमें १६ कोण हों वह द्विवज्र, जिसमें ३२ बत्तीस कोण हों उसे प्रलीनक कहते हैं

जो समवृत्त (गोल) हो उसको वृत्त नामका स्तम्भ पण्डितोंने कहा है ॥ १६७ ॥ स्तम्भके नौ प्रकार बांटकर उद्वहन घटको बनवाने अर्थात स्तम्भके पाससे काष्ठोंको लगावै और पद्म उत्तरोष्ठकोभी भागसे ऊन भागसे बनवाने स्तम्भके नीचेके काष्ठको पद्म उत्तरोष्ठ कहते हैं ॥ १६८ ॥ भारकी तुलाके ऊपर जिनकी तुला ऊपर हो उनकी स्तम्भके समान अधिकता होती है और वे एक एक पाद ऊन होती हैं ॥ १६९ ॥ निषिद्धसे रहित जो अलिंद उसके समान जो घर है वह सर्वतोभद्र अर्थात् सब प्रकारसे मांगलीक होता है, राजा और देवताओंके समूहोंका जो

विभज्य नवधा स्तम्भं कुर्याद्वृद्वहनं घटम् । पद्मं च सोत्तरोष्ठं च कुर्याद्भागोनभागतः ॥ १६८ ॥ स्तम्भसमं बाहुल्यं भारतुलानामुपर्युपरि यासाम् । भवति तुलाय तुलानामूनं पादेन पादेन ॥ १६९ ॥ अप्रितिषिद्धालिन्दं समन्ततो वास्तु सर्वतोभद्रम् । नृपविबुधसमूहानां कार्यं द्वारैश्चतुर्भिरपि ॥ १७० ॥ द्विशालानि गृहाणि ॥ याम्यशाला न्यसेदादौ द्वितीया पश्चिमे ततः । तृतीया चोत्तरे स्थाप्या चतुर्थी पूर्वपश्चिमा ॥ १७१ ॥ दक्षिणे दुर्मुखं कृत्वा पूर्वे च खरसंज्ञकम् । तद्वातारव्यं भवेद्गेहं वात रोगप्रदं स्मृतम् ॥ १७२ ॥ दक्षिणे दुर्मुखं गेहं पश्चिमे धान्यसंज्ञकम् । सिद्धार्थाख्यं द्विशालं च सर्वसिद्धिकरं नृणाम् ॥१७३॥ पश्चिमे धान्यनामानमुत्तरे जयसंज्ञकम् । मयमूर्यं द्विशालं तन्मृत्युदं नाशदं स्मृतम् ॥ १७४ ॥

घर है वह चार दरवाजोंका बनवाना ॥ १७० ॥ अब दो शाला आदिके गृहोंको कहते हैं—पहिली शाला दक्षिणमें बनवानी फिर दूसरी पश्चिममें, तीसरी उत्तरमें और चौथी पूर्व पश्चिममें मध्यमें बनवानी ॥ १७१ ॥ जिस घरमें दक्षिण दिशामें दुर्मुखका चिह्न हो और पूर्वमें खरका चिह्न हो वह घर वातनामका होता है, वह वातरोगका प्रदाता शास्त्रमें कहा है ॥ १७२ ॥ ॥ जो घर दक्षिणमें दुर्मुख हो और पश्चिममें धान्यसंज्ञक हो वह दो शालाका घर सिद्धार्थ नामका होता है और वह मनुष्योंकी सब सिद्धियोंको करता है ॥ १७३ ॥ जो पश्चिममें धान्य नामका हो और

उत्तरमें जयसंज्ञक हो और जिसमें दो शाला हों उसे मयसूर्य कहते हैं. वह मृत्यु और नाशका दाता होता है ॥ १७४ ॥ जो पूर्वमें खरनामका हो और उत्तरमें धान्यसंज्ञक हो और जिसमें दो शाला हों वह दण्डनामका होता है. वह दण्डको बारम्बार देता है ॥ १७५ ॥ जो दक्षिणमें दुर्मुख हो और उत्तरमें जयसंज्ञक हो और जिसमें दो शाला हों वह वातनामका होता है, उसमें बंधु और धनका नाश होता है ॥ १७६ ॥ जो पूर्वदिशामें खरनामका हो और पश्चिममें धान्यसंज्ञक हो और जिसमें दो शाला हों उस गृहको चुल्की कहते हैं वह पशुओंकी

पूर्वं तु खरनामानमुत्तरे धान्यसंज्ञकम् । दण्डाख्यं तद्द्विशालं स्याद्दण्डं कुर्य्यात्पुनःपुनः ॥ १७५ ॥ दुर्मुखं दक्षिणे कुर्यादुत्तरे जयसंज्ञकम् । वाताख्यं तद्द्विशालं तु बन्धुनाशं धनक्षयम् ॥ १७६ ॥ खरं च पूर्वदिग्भागे पश्चिमे धान्यसंज्ञकम् । गृहं चुल्की द्विशालं तत्पशुवृद्धिधनप्रदम् ॥ १७७ ॥ विपक्षं दक्षिणे भागे पश्चिमे क्रूरसंज्ञकम् । शोभनाख्यं द्विशालं तद्धनधान्यकरं परम् ॥ १७८ ॥ विजयं दक्षिणे भागे विजयं चैव पश्चिमे । द्विशालं चैव कुम्भाख्यं पुत्रदारादिसंयुतम् ॥ १७९ ॥ धनं च पूर्वदिग्भागे धान्यञ्चैव तु पश्चिमे । नन्दाख्यं तद्द्विशालं च धनदं शोभनं स्मृतम् ॥ १८० ॥ विजयं सर्वदिग्भागे द्विशालाख्यं तदेव हि । शङ्काख्यं नाम तद्गेहं शुभदं च नृणां भवेत् ॥ १८१ ॥

वृद्धि और धनको देता है ॥ १७७ ॥ जो घर दक्षिण भागमें विपक्षनामका हो और पश्चिममें क्रूरसंज्ञक हो और जिसमें दो शाला हों वह घर शोभननामका होता है वह धन और धान्यको देता है ॥ १७८ ॥ जो दक्षिणभागमें और पश्चिम भागमें विजयनामका हो और जिसमें दो शाला हों उस घरको कुंभ कहते हैं वह पुत्र और स्त्री आदिसे युक्त रहता है ॥ १७९ ॥ जो पूर्वदिशामें धननामका हो और पश्चिममें धान्यनामका हो और जिसमें दो शाला हों वह घर नंदनामका होता है वह धनको देता है और शोभननामका होता है ॥ १८० ॥ जो सब दिशाओंमें

विजयनामका हो और जिसमें दो शाला हों वह शंकनामका होता है वह मनुष्योंको शुभदायी होता है ॥ १८१ ॥ जो सब दिशाओंमें विपुल हो और जिसमें दो शाला हों उस घरको संपुटनामक कहते हैं. वह धनधान्यको देता है ॥ १८२ ॥ जो सब दिशाओंमें धनद हो वा सुवक्र वा मनोरम हो वह घर कान्तनामका होता है वह सब घरोंमें शोभन कहा है ॥ १८३ ॥ दो शालाओंके घरोंके ये १३ भेद इन गृहोंके फलपाकके लिये मैंने विस्तारसे कहे ॥ १८४ ॥ पूर्वदक्षिण १, दक्षिणपश्चिम २, पश्चिमउत्तर ३, उत्तरपूर्व ४, प्राक्पश्चिम ५, दक्षिण

विपुलं सर्वदिग्भागे द्विशालं तत्प्रजायते । तानि संपुटसंज्ञानि धनधान्यप्रदानि च ॥ १८२ ॥ धनदं सर्वदिग्भागे सुवक्रं वा मनोरमम् । कान्तं नाम तु तद्वेहं सर्वेषां शोभनं स्मृतम् ॥१८३॥ द्विशालानां तदृगृहाणां भेदाश्चैव त्रयोदश । फलपाकार्थमेतेषां मया प्रोक्तं सुविस्तरात् ॥ १८४ ॥ पूर्वयाम्यमथ याम्यपश्चिमं पश्चिमोत्तरमथोत्तरपूर्वकम् । प्राक्प्रतीचमथ दक्षिणोत्तरं वास्तु षड्विधमिदं द्विशालकम् ॥ १८५ ॥ अथ त्रिशालानि ॥ उत्तरद्वारहीनं यत्त्रिशालं धनधान्यदम् । हिरण्यनाभनामानं राज्ञां सौख्यविवर्द्धनम् ॥ १८६ ॥ प्राग्द्वारशालहीनं तु सुक्षेत्रं नाम तद्गृहम् । वृद्धिदं पुत्रपौत्राणां धनधान्यसमृद्धिदम् ॥ १८७ ॥ याम्यशालाविहीनं तत्त्रिशालं चुल्लिसंज्ञकम् । विनाशनं धनस्यापि पुत्रपौत्रादिनाशनम् ॥ १८८ ॥

उत्तर ६, इन भेदोंसे दो शालाका वास्तु छः प्रकारका होता है ॥ १८५ ॥ इसके अनंतर तीन शालाओंके वास्तुको कहते हैं—उत्तरके द्वारसे जो रहित हो ऐसा तीन शालाका गृह हिरण्यनाभनामका होता है वह धन धान्यको देता है और राजाओंके सुखको बढाता है ॥ १८६ ॥ जिसमें पूर्वके द्वारकी शाला न हो वह गृह सुक्षेत्रनामका होता है और पुत्र पौत्रोंकी वृद्धि और धन धान्यकी समृद्धिको देता है ॥ १८७ ॥ जो दक्षिणकी शालासे रहित हो और जिसमें तीन शाला हों ऐसे घरको चुल्ही कहते हैं, उसमें धन और पुत्र पौत्र आदिका नाश होता

है ॥ १८८ ॥ जो घर पश्चिमकी शालासे रहित हो उस घरको पक्षघ्न कहते हैं वह पुत्रोंको दोषका दाता और पुरवासियोंकी शत्रुताको देता है ॥ १८९ ॥ तीन शालाके गृहोंके ये चार भेद मैंने कहे, इससे घरके कर्ममें बुद्धिमान् मनुष्य इनका विचारकर घरको बनवावे ॥ १९० ॥ इसके अनन्तर चार शालाओंके घरोंको कहते हैं–जिस घरमें चारों तरफ अलिन्दोंका स्थापन नहो और जिसमें चार द्वार हों उस वास्तुको सर्वतोभद्र कहते हैं. एक ग्राममें चार शालाके घरमें, दुर्भिक्षमें, राज्यके उपद्रवमें ॥ १९१ ॥ यदि स्वामी अपनी स्त्रीको संग शुक्रास्तमें लेजाय

प्रत्यक्छालाविहीनं तु पक्षघ्नं नाम तद्गृहम् । पुत्राणां दोषदश्चैव परश्च पुरवासिनाम् ॥१८९॥ चत्वारोऽमी मया प्रोक्ता भेदाश्चैव चतुर्दश । तस्माद्विचार्य कुर्वीत गृहकर्मणि कोविदः ॥१९०॥ अथ चतुःशालानि॥ अलिन्दानां ह्यवच्छेदो नास्ति यत्र समन्ततः॥ तद्वास्तु सर्वतोभद्रं चतुर्द्वारसमन्वितम् । एकग्रामे चतुःशाले दुर्भिक्षे राज्यविप्लवे ॥ १९१ ॥ स्वामिना नीयमानायां प्रतिशुक्रं न दुष्यति । नृपाणां विबुधानां च गृहं सौख्यप्रदायकम् ॥ १९२ ॥ प्रदक्षिणान्तगैः सर्वैः शालाभित्तिरलिन्दकैः । विना परेण द्वारेण नन्द्यावर्तमिति स्मृतम् ॥ १९३ ॥ श्रेष्ठं सुतारोग्यकरं सर्वेषां शुद्धजन्मनाम् । द्वारालिन्दो गतस्त्वेको नेत्रयोर्दक्षिणागतः ॥ १९४ ॥ विहाय दक्षिणद्वारं वर्द्धमानमिति स्मृतम् । शुभदं सर्ववर्णानां वृद्धिदं पुत्रपौत्रदम् ॥ १९५ ॥

तो सन्मुख शुक्रका दोष नहीं. राजा और देवताओंका जो घर है वह सुखदायी होता है ॥ १९२ ॥ जिसकी प्रदक्षिणाके अन्तमें सब तरफ शाला भीत अलिन्द हों और पश्चिमका द्वार न हो उस घरको नन्द्यावर्त कहते हैं ॥ १९३ ॥ वह शुद्ध जन्मवाले श्रेष्ठ पुरुषोंको सुख और आरोग्यका दाता और श्रेष्ठ कहा है. जिसकी दक्षिणदिशामें एक द्वारका अलिन्द नेत्रभागमें हो ॥ १९४ ॥ दक्षिणमें द्वार न हो उस घरको

वर्द्धमान कहते हैं. वह सब वर्णोंको शुभदायी वृद्धि और पुत्र पौत्रोंको देता है ॥ १९५ ॥ जिसके पश्चिम और उत्तरमें अलिन्द हो और पूर्वदिशा पर्यंत दो अलिन्द उठेहुए हों और उनके मध्यमें एक अलिन्द हो और पूर्वको जिसका द्वार हो उस घरको स्वस्तिक और सुखदायी कहते हैं ॥ १९६ ॥ जिस घरमें पूर्व और पश्चिममें दो अलिन्द हों और गृहके अन्ततक दो अलिन्द हों और उत्तरको जिसका द्वार न हो उस घरको रुचकनामका कहते हैं ॥ १९७ ॥ इति पं० मिहिरचन्द्रकृतभाषाविवृतिसहिते वास्तुशास्त्रे समगृहादिनिर्माणे द्वितीयोऽध्यायः ॥ २ ॥ इससे

पश्चिमोत्तरतोऽलिन्दः प्रागन्तौ द्वौ तदुत्थितौ । अन्यस्तन्मध्यविधृतः प्राग्द्वारं स्वस्तिकं शुभम् ॥ १९६ ॥ प्राक्पश्चिमावलिन्दौ यावन्तगौ तद्भवौ परौ । सौम्यद्वारं विना तु स्याद्रुचकाख्यं तु तत् स्मृतम ॥ १९७ ॥ इति वास्तुशास्त्रे समगृहादिनिर्म्माण द्वितीयोऽध्यायः ॥ २ ॥ अथातः सम्प्रवक्ष्यामि गृहे कालविनिर्णयम् । यथाकालं शुभं ज्ञात्वा तदा भवनमारभेत् ॥ १ ॥ मृदु-ध्रुवस्वातिपुष्यधनिष्ठाद्वितये रवौ । मूले पुनर्वसौ सौम्यवारे प्रारम्भणं शुभम् ॥ २ ॥ आदित्यभौमवर्जन्तु वाराः सर्वे शुभावहाः॥ द्वितीया च तृतीया च षष्ठी च पञ्चमी तथा ॥ ३ ॥ सप्तमी दशमी चैव द्वादश्येकादशी तथा । त्रयोदशी पञ्चदशी तिथयः स्युः शुभावहाः ॥ ४ ॥ दारिद्र्यं प्रतिपत्कुर्याच्चतुर्थी धनहारिणी । अष्टम्युच्चाटनं चैव नवमी शस्त्रघातिनी ॥ ५ ॥

आगे कालका निर्णय कहते हैं–कालके अनुसार शुभ मुहूर्तको जानकर भवनका प्रारंभ करे ॥ १ ॥ मृदु (मृ० रे० चि० अ०) ध्रुव (उ० रो० स्वाति धनिष्ठा श्रवण मूल पुनर्वसु) इनपर सूर्य हो और सौम्यवारको होय तो गृहका प्रारंभ श्रेष्ठ होता है ॥ २ ॥ आदित्य भौमको छोडकर समस्त वार शुभदायी होते हैं ॥ २ । ३ । ६ । ५ । ७ । १० । १२ । ११ । १३ । और पूर्णिमा १५ ये तिथि शुभदायी कही हैं ॥ ३॥४॥ प्रतिपदा दारिद्र्यको करती है और अष्टमी उच्चाटन करती है, नवमी शस्त्रोंसे घात कराती है ॥ ५ ॥

अमावास्याको राजासे भय. चतुर्दशीको पुत्र और दाराका नाश होता है, धनिष्ठा आदि पांच ५ नक्षत्रोंमें स्तंभका स्थापन न करै ॥ ६ ॥ सूत्रधार शिलाका स्थापन और प्राकार आदिको करले, दो प्रकारका यामित्र, वेध उपग्रह और कर्तरीयोग ये भी वर्जने योग्य हैं ॥ ७ ॥ एकार्गल, लत्ता, युति और ककचयोग, दो प्रकारका पात, वैधृति ये भी वर्जित हैं ॥ ८ ॥ कुलिक कंटक काल यमघंट और जन्मसे तीसरा, पांचवां और छठा तारा और नक्षत्र वर्जित है ॥ ९ ॥ कुयोग, वनसंज्ञकयोग, तीन तिथियोंका जिसमें स्पर्श हो ऐसा दुष्टदिन,

दर्शे राजभयं भूते सुतदारविनाशनम् । धनिष्ठापञ्चके नैव कुर्यात्स्तम्भसमुच्छ्रयम् ॥ ६ ॥ सूत्रधारशिलान्यासप्राकारादि समालभेत् । यामित्रं द्विविधं वर्ज्यं वेधोपग्रहकर्त्तरी ॥ ७ ॥ एकार्गलं तथा लत्तायुतिक्रकचसंज्ञकाः । पातं तु द्विविधं वर्ज्यं व्यतीपातश्च वैधृतिः ॥ ८ ॥ कुलिकं कंटकं कालं यमघण्टं तथैव च । जन्मतृतीयपञ्चाङ्गतारा वर्ज्यानि भानि च ॥ ९ ॥ कुयोगा वनसंज्ञश्च तथा त्रिस्पृक् खलं दिनम् । पापलग्नानि पापांशाः पापवर्गास्तथैव च ॥ १०॥ कुयोगास्तिथिवारोत्थास्तिथिभोत्था भवा रजाः । विवाहादिषु ये वर्ज्यास्ते वर्ज्या वास्तुकर्मणि ॥ ११ ॥ वास्तुचक्रं प्रवक्ष्यामि यच्च व्यासेन भाषितम् । यस्मिन्नृक्षे स्थितो भानुस्तदादौ त्रीणि मस्तके ॥ १२ ॥

पाप लग्न, पापका नवांश और पापग्रहोंका वर्ग येभी वर्जित हैं ॥ १० ॥ तिथि वारके कुयोग, तिथि नक्षत्रके कुयोग, नक्षत्र वारके कुयोग जो विवाह आदिमें वर्जित हैं वे वास्तुकर्ममें भी वर्जित हैं ॥ ११ ॥ उस वास्तुचक्रको कहताहूं जो व्यासने कहा है,-जिस नक्षत्रपर सूर्य होय उससे लेकर तीन नक्षत्र मस्तक पर रक्खे ॥ १२ ॥

चतुष्कमग्रपादे स्यात्पुनश्चत्वारि पश्चिमे । पृष्ठे च त्रीणि ऋक्षाणि दक्षकुक्षौ चतुष्ककम् । पुच्छे चत्वारि ऋक्षाणि कुक्षौ चत्वारि वामतः ॥ १३ ॥ मुखे भत्रयमेव स्युरष्टाविंशतितारकाः । शिरस्ताराग्निदाहाय गृहोद्वासोग्रपादयोः ॥ १४ ॥ स्थैर्यं स्यात्पश्चिमे पादे पृष्ठे चैवं धनागमः । कुक्षौ स्याद्दक्षिणे लाभः पुच्छे च स्वामिनाशनम् ॥ १५ ॥ वामकुक्षौ च दारिद्र्यं मुखे पीडा निरन्तरम् । पुनर्वसौ नृपादीनां कर्तव्यं सूतिकागृहम् ॥ १६ ॥ श्रवणाभिजितोर्मध्ये प्रवेशं तत्र कारयेत् । चरलग्ने चरांशे च सर्वथा परिवर्जयेत् ॥ १७ ॥ जन्मभाच्चोपचयभे लग्ने वर्गे तथैव च । प्रारम्भणं प्रकुर्वीत नैधनं परिवर्जयेत् ॥ १८ ॥ पापैस्त्रिषष्ठायगतैः सौम्यैः केन्द्रत्रिकोणगैः । निर्माणं कारयेद्धीमानष्टमस्थैः खलैर्मृतिः ॥ १९ ॥

चार नक्षत्र अग्रपाद और चार नक्षत्र पश्चिम पादमें, तीन नक्षत्र पीठ पर, चार नक्षत्र दाहिनी कुक्षिमें, चार नक्षत्र पूंछपर और चार नक्षत्र वामकुक्षिमें रक्खे ॥ १३ ॥ तीन नक्षत्र मुखपर होते हैं. इस प्रकार अट्ठाईस तारा होते हैं. शिरका तारा अग्निका दाह करता है. अग्रपादमें गृहसे उद्वास (निकसना) ॥१४॥ पश्चिम पादके नक्षत्रोंमें स्थिरता, पीठके नक्षत्रोंमें धनका आगम,दक्षिण कुक्षिके नक्षत्रमें लाभ,पुच्छके नक्षत्रोंमें स्वामीका नाश होता है ॥ १५ ॥ वाम कुक्षिके नक्षत्रमें दरिद्रता, मुखके नक्षत्रोंमें निरंतर पीडा होती है, पुनर्वसु नक्षत्रमें राजा आदिके सूतिकागृहको बनवावे ॥ १६ ॥ श्रवण और अभिजित नक्षत्रमें सूतिकागृहमें प्रवेश करवावे. चर लग्न और चरलग्नके नवांशको सर्वथा वर्जदे ॥ १७ ॥ जन्मकी राशिसे उपचय (वृद्धि) का लग्न और उपचयकी राशिमें प्रारंभ करै. जन्मलग्नसे आठवें लग्नको वर्जदे ॥ १८ ॥ पापग्रह (३।६।११) में सौम्य ग्रह केन्द्र (१।४।७।१०) और त्रिकोण (९।५) में हों ऐसे लग्नमें बुद्धिमान मनुष्य गृहको बनवावे और अष्टम लग्नमें पापग्रह होंय तो

मरण होता है ॥ १९ ॥ मनुष्यलग्न होय और सौम्यग्रहोंकी दृष्टिका योग होय तो कुंभसे भिन्न किसी सौम्यग्रहसे युक्त लग्नमें ॥ २० ॥ जलाशय आदि वास्तुओंका प्रारंभ शुभदायी कहा है ॥ २१ ॥ इसके अनंतर योगोंका वर्णन करते हैं-गुरु लग्नमें हो, सूर्य छठे हो और सौम्यग्रह द्यून (७) में हो, शुक्र सुख (४) में तीसरे शनैश्चर हो ऐसे लग्नमें बनाया जो घर उसकी सौ १०० वर्षकी अवस्था होती है ॥ २२ ॥ शुक्र लग्नमें हो और दशमें सौम्यग्रह, सूर्य लाभ ११ स्थानमें हो गुरु केन्द्रमें होय तो उस लग्नमें बनाया मंदिर सौ १०० वर्ष टिकता है ॥ २३ ॥

मनुष्यलग्ने सौम्यानां दृग्योगे यो गतस्तथा कुम्भं विहायान्यतरे लग्ने सौम्यग्रहान्विते ॥ २० ॥ जलाशयादिवास्तूनां प्रारम्भः शुभदः स्मृतः॥२१॥ अथ योगाः॥ गुरुर्लग्ने रविः षष्ठे द्यूने सौम्ये सुखे सिते । तृतीयस्थेऽर्कपुत्रे च तद्गृहं शतमायुषम् ॥२२॥ भृगुर्लग्नेऽम्बरे सौम्ये लाभस्थाने च भास्करे । गुरुः केन्द्रगतो यत्र शतवर्षाणि तिष्ठति ॥ २३ ॥ हिबुकेज्येऽम्बरे चन्द्रे लाभे च कुजभास्करौ । प्रारंभः क्रियते यस्य अशीत्यायुः क्रमाद्भवेत् ॥ २४ ॥ लग्ने भृगौ पुत्रगेज्ये षष्ठे भौमे तृतीयगे । रवौ यस्य गृहारम्भः स च तिष्ठेच्छतद्वयम् ॥ २५ ॥ लग्नस्थौ गुरुशुक्रौ च रिपुराशिगते कुजे । सूर्ये लाभगते यस्य द्विशताब्दानि तिष्ठति ॥ २६ ॥ स्वोच्चस्थो वा भृगुर्लग्ने स्वोच्चे जीवे सुखस्थिते । स्वोच्चे लाभगते मन्दे सहस्राणां समा स्थितिः ॥ २७ ॥

चौथे गुरु हो १० दशमें चन्द्रमा हो लाभमें मंगल और सूर्य हो ऐसे लग्नमें जिसका प्रारंभ किया जाय उसकी ८० अस्सी वर्षकी अवस्था होती है ॥ २४ ॥ लग्नमें शुक्र हो पंचममें गुरु हो छठे ६ मंगल हो तीसरे सूर्य हो ऐसे लग्नमें जिस घरका आरंभ हो वह २०० वर्षतक टिकता है ॥ २५ ॥ लग्नमें गुरु शुक्र स्थित हों और छठी राशिपर मंगल हो और सूर्य लाभमें हो ऐसे लग्नमें बनाया हुआ घर २०० वर्षतक टिकता है ॥ २६ ॥ अपने उच्चका शुक्र लग्नमें हो अपने उच्चका बृहस्पति सुख ४ में हो और अपने उच्चका शनि लाभमें हो ऐसे लग्नमें जिस

घरका आरंभ कियाजाय ऐसा घर हजार १००० वर्षतक टिकता है ॥ २७ ॥ अपने उच्चके वा अपने अपने गृहके वा लग्नमें स्थित अथवा केंद्रमें स्थित सौम्यग्रह हो ऐसे लग्नमें जिसका प्रारंभ हो वह गृह दो सौ वर्षतक टिकता है ॥ २८ ॥ कर्कलग्नमें चन्द्रमा, केन्द्रमें बृहस्पति, मित्रगृह वा अपने उच्चके अन्य ग्रह होंय तो उस घरमें चिरकालतक लक्ष्मी होती है ॥ २९ ॥ पुष्य तीनों उत्तरा आश्लेषा मृगशिर श्रवण रोहिणी और जलके नक्षत्र शतभिषा इनमें बनाया हुआ घर लक्ष्मीसे युक्त होता है ॥ ३० ॥ विशाखा चित्रा शतभिषा आर्द्रा पुनर्वसु धनिष्ठा और शुक्र

स्वोच्चे स्वभवने सौम्यैर्लग्नस्थैर्वापि केन्द्रगैः । प्रारम्भः क्रियते यस्य स तिष्ठति शतद्वयम् ॥२८॥ कर्कलग्नगते चन्द्रे केन्द्रस्थाने च वाक्पतिः । मित्रस्वोच्चस्थितैः खेटैर्लक्ष्मीस्तस्य चिरं भवेत् ॥ २९ ॥ इज्योत्तरात्रयार्हीन्दुविष्णुधातृजलोडुषु । वरुणासहितेष्वेषु कृतं गेहं श्रिया युतम् ॥ ३० ॥ द्विदैवत्वाष्ट्वार्क्षशरुद्रादितिवसूडुषु । शुक्रेण सहितेष्वेषु कृतं धान्यप्रदं गृहम् ॥ ३१ ॥ हस्तार्यमत्वाष्ट्रदस्रानुराधानारकासु च । बुधेन सहितेष्वेषु धनपुत्रसुखप्रदम् ॥ ३२ ॥ कुयोगाः ॥ शत्रुक्षेत्रगतैः खेटैर्नीचस्थैर्वा पराजितैः । प्रारम्भे यस्य भवने लक्ष्मीस्तस्य विनश्यति ॥ ३३॥ एकोऽपि परभागस्थो दशमे सप्तमेऽपि वा । वर्णाधिपे बलैर्हीने तद्गृहं परहस्तगम् ॥ ३४ ॥

वारसहित इन नक्षत्रोंमें बनाया हुआ घर अन्नको देता है ॥ ३१ ॥ हस्त उत्तराफाल्गुनी चित्रा अश्विनी और अनुराधा बुधवारसहित इन नक्षत्रोंमें बनाया घर धन पुत्र और सुखदायी होता है ॥ ३२ ॥ अब कुयोगोंका वर्णन करते हैं-छठे स्थानमें ऐसे ग्रह पडे होयँ जो नीचके हों वा पराजित हों ऐसे लग्नमें जिस गृहका प्रारंभ हो उसमें लक्ष्मीका नाश होता है ॥ ३३ ॥ जिस लग्नमें एकभी ग्रह परभागमें स्थित हो वा दशम सप्तममें स्थित

हो और वर्णका स्वामी बलसे हीन हो तो वह घर परहस्तगामी होजाता है ॥ ३४ ॥ पापग्रहोंके अन्तर्गत लग्न हो, सौम्यग्रहोंसे युक्त और दृष्ट न हो, अष्टमस्थानमें शनैश्चर होय तो वह घर अस्सी वर्षके मध्यमें नष्ट होता है ॥ ३५ ॥ शनैश्चर लग्नमें स्थित हो, मंगल सप्तमभवनमें और लग्नमें शुभग्रहोंकी दृष्टि न होय तो वह घर सौ १०० वर्षमें नष्ट होजाता है ॥ ३६ ॥ क्षीणचंद्रमा लग्नमें हो, अष्टम स्थानमें मंगल हो ऐसे लग्नमें जिसका प्रारंभ हो वह घर शीघ्र नष्ट होजाता है ॥ ३७ ॥ दशाका पति और वर्णका नाथ बलसे हीन हो और पीडित

पापान्तरगते लग्ने न च सौम्ययुतेक्षिते । अष्टमस्थेऽर्कपुत्रे च अशीत्यब्दाद्विहन्यते ॥ ३५ ॥ मन्दे लग्नगते चैव कुजे सप्तमसंस्थिते । शुभैरवीक्षिते वापि शतवर्षाणि हन्यते ॥ ३६ ॥ लग्नगे शशिनि क्षीणे मृत्युस्थाने च भूसुते । प्रारम्भः क्रियते यस्य शीघ्रं तद्धि विनश्यति ॥ ३७ ॥ दशापतौ बलैर्हीने वर्णनाथे तथैव च । पीडितर्क्षगते सूर्ये न विदध्यात्कदाचन ॥ ३८ ॥ पितृमूलेज्यभाग्यार्कपौष्णभेषु च यत्कृतम् ॥ ३९ ॥ कुजेन सहितेष्वेषु गृहं सन्दह्यतेऽग्निना ॥ ४० ॥ मूलं च रेवती चैव कृत्तिका ऽऽषाढमेव च ॥ पूर्वाफाल्गुनिहस्ते च मघा चैव तु सप्तकम् ॥ ४१ ॥ एषु भौमेन युक्तेषु वारे तस्यैव वेश्म यत् । अग्निना दह्यते कृत्स्नं पुत्रनाशः प्रजायते ॥ ४२ ॥

नक्षत्रपर सूर्य हो ऐसे घरको कदाचित् न बनवावे ॥३८॥ मघा मूल पुष्य भाग्य (पूर्वाफा०) हस्त रेवती इनमें बनायाहुआ घर ॥३९॥ और मंगल सहित इनमें बनाया घर अग्निसे भस्म होजाता है ॥ ४० ॥ मूल रेवती कृत्तिका पूर्वाषाढा पूर्वाफाल्गुनी हस्त और सातवां मघा ॥ ४१ ॥ मंगलसे युक्त इन नक्षत्रोंमें और मंगलवारमें जो घर बनायाजाता है वह संपूर्ण अग्निसे दग्ध होता है और उसमें पुत्र नष्ट होजाता है ॥ ४२ ॥

अग्निके नक्षत्रमें सूर्य वा चंद्रमा स्थित होय तो ऐसे लग्नमें बनायाहुआ मंदिर थोडे दिनोंमें निश्चयसे अग्निसे दग्ध होता है ॥ ४३ ॥ ज्येष्ठा अनुराधा भरणी स्वाती तीनों पूर्वा और धनिष्ठा इन नक्षत्रोंमें और शनैश्चरके दिन बनाया मंदिर ॥ ४४ ॥ नामसे कृपण कहाता है और धन धान्यसहितभी उस घरमें उत्पन्नहुआ पुत्र यक्ष और राक्षसोंसे ग्रहण कियाजाता है ॥ ४५ ॥ प्रासादोंमें वापी कूप आदिमें भी यही फल होता है तिससे शुभका अभिलाषी मनुष्य विचारकर घरका आरंभ करै ॥ ४६ ॥ मकर वृश्चिक कर्क लग्नमें गृहका आरंभ होय तो नाश

अग्निनक्षत्रगे सूर्य्ये चन्द्रे वा तत्र संस्थिते । निर्मितं मंदिरं नूनमग्निना दह्यतेऽचिरात् ॥ ४३ ॥ ज्येष्ठानुराधके चैव भरणीस्वाति पूर्वभे । धनिष्ठास्वपि ऋक्षेषु शनिस्तिष्ठेद्दिनस्य च ॥ ४४ ॥ कृपणो नामतः प्रोक्तो धनधान्यादिके गृहे । पुत्रे जातेऽथवा तस्मिन्गृह्यते यक्षराक्षसैः ॥ ४५ ॥ प्रासादेष्वेवमेव स्याद्वापीकूपेषु चैव हि । तस्माद्विचार्य कर्तव्यो गृहारम्भः शुभेप्सुना ॥४६॥ नाशं दिशन्ति मकरालिकुलीरलग्ने मेषे घटे धनुषि कर्मसु दीर्घसूत्रम् । कन्याझषे मिथुनगे ध्रुवमर्थलाभं ज्योतिर्विदः कलश सिंहवृषेषु सिद्धिम् ॥ ४७ ॥ मध्याह्ने तु कृतं वास्तु कर्तुर्वित्तविनाशनम् । महानिशास्वपि तथा सन्ध्ययोर्नैव कारयेत् ॥ ४८ ॥ अथ भावफलानि ॥ लग्नेऽर्के वज्रपातः स्यात्कोशहानिश्च शीतगौ । मृत्युर्विश्वम्भरापुत्रे दारिद्र्यं रविनन्दने ॥ ४९ ॥

हो. मेष धन तुला लग्नमें होय तो काममें दीर्घसूत्र (देर) हो, कन्या मीन मिथुनमें होय तो निश्चयसे अर्थका लाभ हो, कुंभ सिंह और वृषमें सिद्धिको देता है ऐसे ज्योतिःशास्त्रके ज्ञाता वर्णन करते हैं ॥ ४७ ॥ मध्याह्नमें कियाहुआ वास्तु कर्ता और धनके नाशको देता है, अर्द्धरात्रिमें भी तैसाही फल है और सन्ध्यामेंभी गृहके आरंभको न करै ॥ ४८ ॥ इसके अनंतर भावोंके फलको कहते हैं–लग्नमें सूर्य हो तो

वज्रका पात, चन्द्रमा होय तो कोशकी हानि, मंगल होय तो मृत्यु, शनैश्चर लग्नमें होय तो दारिद्र्य ॥ ४९ ॥ बृहस्पति होय तो धर्म अर्थ काम, शुक्र होय तो पुत्रोंकी उत्पत्ति, बुध होय तो जन्मभर अच्छे काममें प्रवृत्ति होती है ॥ ५० ॥ दूसरे स्थानमें सूर्य होय तो हानि, चन्द्रमा होय तो शत्रुओंका नाश, मंगल होय तो बंधन और शनैश्चर होय तो नाना प्रकारके विघ्न होते हैं ॥ ५१ ॥ बुध होय तो धनकी सम्पत्ति, बृहस्पति होय तो धर्मकी वृद्धि और शुक्र होय तो यथेच्छ आनंदसे फलोंकी कामनासिद्धि होती है ॥ ५२ ॥ तीसरे स्थानमें पापग्रह होय और

जीवे धर्मार्थकामाः स्युः पुत्रोत्पत्तिश्च भार्गवे । चंद्रजे कुशलासक्तिर्यावदायुः प्रवर्त्तते ॥ ५० ॥ द्वितीयस्थे रवौ हानिश्चन्द्रे शत्रुक्षयो भवेत् । भूमिजे बन्धनं प्रोक्तं नानाविघ्नानि भानुजे ॥५१॥ बुधे द्रविणसंपत्तिर्गुरौ धर्माभिवर्द्धनम् । यथाकामविनोदेन भृगौ कामं व्रजेत्फलम् ॥ ५२ ॥ तृतीयस्थेषु पापेषु सौम्येष्वेव विशेषतः । सिद्धिः स्यादचिरादेव यथाभिलषितं प्रति ॥५३॥ चतुर्थस्थानगे जीवे पूजा संपद्यते नृपात् । चन्द्रजे चार्थलाभः स्याद्भूमिलाभश्च भार्गवे ॥ ५४ ॥ वियोगः सुहृदां भानौ मन्त्रभेदो महीसुते । बुद्धिनाशो निशानाथे सर्वनाशोऽर्कनन्दने ॥ ५५ ॥ पञ्चमे तु सुराचार्ये मित्र वसुधनागमः । शुक्रे पुत्रसुखावाप्तौ रत्नलाभस्तथेन्दुजे ॥ ५६ ॥

विशेषकर सौम्यग्रह होय तो अल्प कालमेंही अपनी इच्छानुसार सिद्धि होती है ॥ ५३ ॥ चौथे स्थानमें बृहस्पति होय तो राजासे पूजा प्राप्त होती है, बुध होय तो धनका लाभ और शुक्र होय तो भूमिका लाभ होता है ॥ ५४ ॥ सूर्य होय तो मित्रका वियोग, मंगल होय तो मंत्रका भेद, चंद्रमा होय तो बुद्धिका नाश और शनैश्चर होय तो सबका नाश होता है ॥ ५५ ॥ पंचममें बृहस्पति होय तो मित्र और रत्न

धनका आगमन होता है. शुक्र होय तो पुत्र और सुखकी प्राप्ति, बुध होय तो रत्नोंका लाभ होता है ॥ ५६ ॥ सूर्य होय तो पुत्रोंका दुःख, चन्द्रमा होय तो कलह कहा है, मंगल होय तो कार्यका विरोध, शनैश्चर होय तो बन्धुओंमें लड़ाई होती है ॥ ५७ ॥ छठे स्थानमें सूर्य होय तो रोगके नाशको कहे. चन्द्रमा होय तो पुष्टि. मंगल होय तो प्राप्ति, शनैश्चर होय तो शत्रुओंके बलका क्षय होता है ॥ ५८ ॥ बृहस्पति होय तो मंत्रका उदय कहा है. शुक्र होय तो विद्याका आगम कहा है और बुध होय तो भलीप्रकार ज्ञान और अर्थमें कुश

सुतदुःखसहस्रांशौ शशांके कलहः स्मृतः ॥ भौमे कार्यविरोधः स्यात्सौरे बंधुविमर्दनम् ॥ ५७ ॥ षष्ठस्थानगते सूर्ये रोगनाशं विनिर्दिशेत् । चन्द्रे पुष्टिः कुजे प्राप्तिः सौरे शत्रुबलक्षयः ॥५८॥ गुरौ मन्त्रोदयः प्रोक्तो भृगौ विद्यागमो भवेत् । सम्यग्ज्ञानार्थकौशल्यं नक्षत्रपतिनन्दने ॥ ५९ ॥ सप्तमस्थानगे जीवे बुधे दैत्यपुरोहिते । गजवाजिधरित्रीणां क्रमाल्लाभं विनिर्दिशेत् ॥ ६० ॥ भास्करे कीर्तिभङ्गः स्यात्कुजे विपदमादिशेत् । हिमगौ क्लेश आयासः पतंगे व्यङ्गताभयम् ॥६१॥ नैधने च सहस्रांशौ विद्विषो जनितापदः । हानिः शीतमयूखे च भौमे सौरे च रुग्भयम् ॥ ६२ ॥ बुधे मानधनप्राप्तिर्जीवे च विजयो भवेत् । शुक्रे स्वजन भेदः स्यान्मंत्रज्ञस्यापि देहिनः ॥ ६३ ॥

लता होती है ॥ ५९ ॥ सातवें स्थानमें बृहस्पति बुध और शुक्र होय तो क्रमसे गज वाजी और पृथिवीके लाभको कहै ॥ ६० ॥ सूर्य होय तो कीर्तिका नाश होता है. मंगल होय तो विपत्तियोंको कहै. चंद्रमा होय तो क्लेश और परिश्रम होता है, सूर्य होय तो अंग हीनता और भय होता है ॥ ६१ ॥ अष्टमस्थानमें सूर्य होय तो वैरियोंसे दुःख होता है. चन्द्रमा होय तो हानि, मंगल शनैश्चर होयँ तो रोगका भय होता है ॥६२॥ बुध होय तो मान और धनकी प्राप्ति, बृहस्पति होय तो विजय होता है. शुक्र होय तो मंत्रके ज्ञाताभी मनुष्यके

यहां अपने जनोंसे भेद होता है ॥ ६३ ॥ बृहस्पति नवमस्थानमें होय तो विद्या भोग आदिका आनंद होता है. बुध होय तो अनेक प्रकारके भोग, शुक्र होय तो विजय होता है ॥ ६४ ॥ चन्द्रमा होय तो धातुओंका नाश कहा है, सूर्य हो तो धर्मकी हानि, मंगल होय तो धनका नाश, शनैश्चर होय तो धर्ममें दूषण होता है ॥ ६५ ॥ दशवें स्थानमें शुक्र होय तो शयन आसनकी सिद्धि होती है. बृहस्पति होय तो महान् सुख, बुध होय तो विजय और स्त्री धनकी वृद्धि होती है ॥ ६६ ॥ सूर्य होय तो मित्रोंकी वृद्धि, चन्द्रमा होय तो शोककी वृद्धि होती है. मंगल

वागीशे नवमस्थाने विद्याभोगादिनन्दनम् । बुधे विविधभोगाश्च जीवे च विजयो भवेत् ॥ ६४ ॥ चन्द्रे धातुक्षयः प्रोक्तो धर्महा निश्च भास्करे । कुजे चार्थक्षयं विद्याद्रविजे धर्मदूषणम् ॥ ६५ ॥ दशमस्थानगे शुक्रे शयनासनसिद्धयः । सुराचार्ये महत् सौख्यं विजयं स्त्री धनं बुधे ॥ ६६ ॥ मार्तण्डे च सुहृद्वृद्धिश्चन्द्रे शोकविवर्द्धनम् । भौमे रत्नागमः प्रोक्तः कोणे कीर्तिविलोपनम् ॥६७॥ लाभस्थानेषु सर्वेषु लाभस्थानं विनिर्दिशेत् । व्ययस्थानेषु सर्वेषु विनिर्देश्यो व्ययः सदा ॥ ६८ ॥ स्वोच्चे पूर्णफलः प्रोक्तः पादोनं स्वर्क्षगो ग्रहः । स्वत्रिकोणेऽर्द्धफलदः पादं मित्रगृहाश्रितः ॥ ६९ ॥ समर्क्षे रिपुराशौ च समकष्टफलौ ग्रहौ । नीचस्थो निष्फलः प्रोक्तो वर्गे सत्फलदः शुभः ॥ ७० ॥ इति वास्तुशास्त्रे तृतीयोऽध्यायः ॥ ३ ॥

होय तो रत्नोंका आगम, शनि होय तो कीर्तिका लोप होता है ॥ ६७ ॥ लाभस्थानमें संपूर्ण ग्रह होयँ तो लाभको कहे. व्यय १२ स्थानमें संपूर्ण ग्रह होयँ तो सदैव व्ययको कहै ॥ ६८ ॥ अपने उच्चका ग्रह होय तो पूर्ण फल कहा है, अपनी राशिका ग्रह हो तो पादोन कहा है. अपने त्रिकोणका होय तो आधा फल देता है. मित्रके गृहका होय तो चौथाई फलको देता है ॥ ६९ ॥ समराशि वा रिपुकी राशिके ग्रह होयँ तो समता और कष्ट फलको देते हैं, नीचराशिमें स्थित ग्रह निष्फल कहा है. वर्गका होय तो श्रेष्ठफलका दाता शुभ कहा है ॥७०॥ इति पं० मिहिर

चंद्रकृतभाषाविवृतिसहिते वास्तुशास्त्रे तृतीयोऽध्यायः ॥ ३ ॥ उत्तम मध्यम निंदितभेदसे तीन प्रकारके गृह चौदह १४ प्रकारके कहे हैं, उनके संक्षेपसे प्रमाणको कहताहूं ॥ १ ॥ वह गृह दो प्रकारका कहा है. शरीर भित्र २ प्रकारका होता है. गृह नामका शरीर होता है. और शयनके चक्रमें शय्याको गृह कहते हैं ॥ २ ॥ सुखका अभिलाषी मनुष्य शय्याका प्रमाण अपने देहके प्रमाण करै. शय्या ८१ इक्यासी अंगुलकी वा नव्वे अंगुलके प्रमाणकी होती है ॥ ३ ॥ उसके आधे प्रमाणसे उसका विस्तार होता है और उसके पादुका (पावे) उद्यतां

चतुर्दशविधाः प्रोक्ता गृहाश्चोत्तममध्यमाः। निन्दिताश्च प्रमाणञ्च कथयामि समासतः ॥ १ ॥ गृहं तद्द्विविधं प्रोक्तं शरीरं तु पृथग्विधम् । शरीरन्तु गृहन्नामशय्याशयनचक्रके ॥ २ ॥ शय्यामानं स्वदेहेन समं कार्यं सुखेप्सुना । एकाशीत्यंगुला शय्या नवत्यंगुलसम्मिता ॥३॥ तदर्द्धेन च विस्तीर्णा पादुकावुद्यतांगुलौ । आसनं तु प्रकर्तव्यं शय्याविस्तारमानकम् ॥ ४ ॥ विस्तारं पादहीनं तु तद्विस्तारं प्रकल्पयेत् । उपानहौ प्रकर्तव्यौ स्वपादप्रमितौ तथा ॥ ५ ॥ पादुकेऽपि यथा कार्ये अन्यथा दुःखशोकदौ । अष्टांगुलेन मानेन शय्यामानं प्रकल्पयेत् ॥ ६ ॥ अथवा ह्यपरा प्रोक्ता नृपाणां काम्यमिच्छताम् ॥ ७ ॥

गुल होते हैं अर्थात आधे अंगुल ऊँचे होते हैं. शय्याके विस्तारके प्रमाणकाही आसन बनवाना ॥ ४ ॥ उसके विस्तारसे पाद कम उसके विस्तारको अर्थात चौडाईको करे. अपने चरणोंके समान उपानह बनवावे ॥ ५ ॥ पादुकाभी चरणोंके समान ही बनवावे अन्यथा बनवावे तो दुःख और शोकको देते हैं. आठ अंगुलके मानसे शय्याका प्रमाण बनवावे ॥ ६ ॥ अथवा कामकी इच्छावाले राजाओंकी अन्यभी

१ पादुके न यथा इति पाठो दृश्यते ।

शय्या कही है ॥ ७ ॥ सौ अंगुलकी शय्या राजाओंकी बडी कही है ॥ ८ ॥ राजाके कुमारोंकी शय्या नव्वे अंगुलकी और मंत्रियोंकी शय्या चौरासी ८४ अंगुलकी होती है. उससे बारह १२ अंगुल कम वलय और पर्यंकके ऊपर कल्पना की हुई ॥ ९ ॥ अथवा २८ अंगुल कम पुरोहितोंकी शय्या होती है. उससे आधा और ८ अंश कम विष्टंभ (पाया) कहा है ॥ १० ॥ तीस ३० अंगुलके मानका आयाम (चौडाई) और एक पादभर ऊँचाई कही है. संपूर्ण वर्णोंकी शय्या ८१ अंगुलकी कही है ॥ ११ ॥ सामन्तोंकी शय्या ९० अंगुल वा ८१ अंगुल कही

शतांगुला नृपाणान्तु महती परिकीर्तिता ॥ ८ ॥ कुमाराणां तु नवतिः सा षड्ना तु मंत्रिणाम् । सा द्वादशोना वलयपर्यङ्कोपरि कल्पिता ॥ ९ ॥ पुरोहितानां च तथा हीना धृत्यंगुलैस्ततः । अर्द्धं ततोऽष्टांशहीनं विष्टम्भः परिकीर्तितः ॥ १० ॥ आया मास्त्र्यंशमानं तु पादोच्छ्रायं तु निर्दिशेत् । सर्वेषां चैव वर्णानामेकाशीतिमिता स्मृता ॥ ११ ॥ सामन्तानां तु नवतिः सैकाशीति मिता तथा । स्वदेहान्नातिदीर्घा सा न विस्तारा तथैव च ॥ १२ ॥ हीना रोगप्रदा दीर्घा दुःखदा सुखदा समा । पाषाणैर्निर्मितं यत्तु तद्गृहं मन्दिरं स्मृतम् ॥ १३ ॥ पक्वेष्टकं वास्तुनाम भवनं हितमुत्तमम् । अनिष्टकैः सुमनन्तु सुधारं कर्दमेन तु ॥ १४ ॥ मानस्यं वर्द्धितं काष्ठैर्वेत्रैश्च चन्दनं स्मृतम् । वस्त्रैश्च विजयं प्रोक्तं राज्ञां शिल्पिविकल्पितम् ॥ १५ ॥

है. वह शय्या न अपने देहसे लम्बी हो और न चौडी हो ॥ १२ ॥ अपने शरीरसे हीन शय्या रोगको देती है और शरीरसे लम्बी दुःखको और समान शय्या सुखको देती है. पत्थरोंसे बनाया जो घर उसे मंदिर कहते हैं ॥ १३ ॥ पक्की ईंटोंसे बनाया जो घर है उसे भवन कहते हैं वह हित और उत्तम होता है. कच्ची ईंटोंसे जो बनाहो उसे सुमन और कीच वा गारेसे बनाहो उसे सुधार कहते हैं ॥ १४ ॥ काष्ठोंसे जो

बनाया हो उसको मानस्य, बेतोंसे जो बनाया हो उसको चन्दन कहते हैं. राजाओंका वस्त्रोंसे बनाया जो शिलिपयोंकी कल्पनासे स्थान उसे विजय कहते हैं ॥ १५ ॥ जो आठवां तृणकी जातियोंसे बनायाहुआ स्थान है उसे कालिमा कहते हैं. गृहस्थियोंके चार स्थान उत्तम होते हैं ॥ १६ ॥ सुवर्णसे चांदीसे तांबेसे और लोहेसे बनेहुए वे चारों कहे हैं-सुवर्णसे बनेहुएको कर और चांदीसे बनेहुएको श्रीभव कहते हैं ॥ १७ ॥ तांबेसे बनेहुएको सूर्यमंत्र और लोहेसे बनेहुएको चण्ड नाम कहते हैं. देव दानव गंधर्व यक्ष राक्षस और पन्नग ॥ १८ ॥ ये पूर्वोक्त

कालमेति च विज्ञेयमष्टमं तृणजातिभिः । उत्तमानि च चत्वारि गृहाणि गृहमेधिनाम्॥१६॥ सौवर्णं राजतं ताम्रमायसं च प्रकीर्तितम् । सौवर्णं तु करं नाम राजतं श्रीभवं तथा॥१७॥ताम्रेण सूर्यमन्त्रन्तु चण्डनाम तथायसम् । देवदानवगन्धर्वयक्षराक्षसपन्नगाः ॥१८॥द्वादशैते प्रकारास्तु गृहाणां नियताः स्मृताः । जातुपं त्वनिलं नाम प्रायुवं वारिबन्धकम् ॥ १९ ॥ एवं सर्वासु जातीषु गृहाणि च चतुर्दश । चत्वारश्चोत्तमा ये च ते गृहा वर्णपूर्वकाः ॥ २० ॥ शुभदा ब्राह्मणादीनां सर्वेषामपि शोभनाः । उत्तमाः शुद्धकालेषु स्थाप्याः शुद्धविधानतः॥२१॥काष्ठादिकृतगेहेषु कालापेक्षां न कारयेत् । तृणदारुगृहारम्भे विकल्पं नैव कारयेत्॥२२॥

गृहोंसे बारह प्रकार नियमसे कहे हैं, लाखसे बनाया जो घर उसको अनिल और जलका बन्धन जिसमें हो उसको प्रायुव कहते हैं ॥ १९ ॥ इस प्रकार संपूर्ण जातियोंमें १४ प्रकारके घर होते हैं. चार जो पूर्वोक्त उत्तम घर हैं वे ब्राह्मण आदि वर्णोंके क्रमसे होते हैं ॥ २० ॥ ब्राह्मण आदिकोंको शुभदायी होते हैं और सब वर्णोंके लियेभी शोभन हैं उत्तम घरोंका शुभकालमें और शुद्धविधिसे स्थापन करना ॥ २१ ॥ काष्ठआदिसे बनायेहुए घरोंमें कालकी अपेक्षाको न करै तृण और काष्ठके गृहारंभमें भी विकल्प न करै ॥ २२ ॥

सुवर्णआदिके गृहारंभमें मासका दोष नहीं होता. पंचाङ्गके शुद्ध कालमें प्रारंभ करै. चैत्र भाद्रपद और पौष इनमें प्रवेश न करै ॥ २३ ॥ महोत्सवमें प्रवेश (न) करै. पक्की ईंटोंसे बनाये हुए शिल्पके मानको कहते हैं ॥ २४ ॥ काष्ठ आदिसे बनायेहुए घरमें स्तंभके मानको कहते हैं, सुवर्ण आदिके घरमें हस्तप्रमाणको कहते हैं. लाखआदिसे बनाये घरमें किंचित्भी प्रमाणको नहीं कहते हैं ॥ २५ ॥ पादुक और उपानह अंगुलके प्रमाणसे बनवाने, मंच आदि और आसनभी अंगुलसेही बनवाने ॥ २६ ॥ प्रतिमा पीठिका लिंग और स्तंभ गवाक्षोंका

सौवर्णादिगृहारम्भे मासदोषो न विद्यते । पञ्चाङ्गशुद्धकाले तु न चैत्रे सिंहपौषके ॥ २३ ॥ प्रवेशनं च कर्तव्यं महोत्सवदिने तथा । पक्वेष्टकानिर्मिते तु शिल्पमानं प्रवक्ष्यते ॥ २४ ॥ काष्ठादिनिर्मिते गेहे स्तम्भमानं प्रचक्षते । सौवर्णाद्ये हस्तमानं जांतु पाद्ये न किञ्चन ॥ २५ ॥ पादुकोपानहौ कार्यौ अंगुलस्य प्रमाणतः । मञ्चादिकञ्चासनञ्च अंगुलेनैव कारयेत् ॥ २६ ॥ प्रतिमा पीठिका चापि लिङ्गं वा स्तम्भमेव वा । गवाक्षाणां प्रमाणञ्च शिलामानं तथैव च ॥२७॥ खड्गचर्मायुधादीनां प्रमाणं चांगुलानि च । विषमाः शुभदाः पुंसां समाः सौख्यविनाशकाः ॥ २८ ॥ अंगुलस्य प्रमाणन्तु कथयामि समासतः । नवाष्टसप्तषट्पूर्वा अंगुलाः परिकीर्तिताः ॥ २९ ॥ त्रिविधस्यापि हस्तस्य प्रत्यकं कर्म दर्शितम् । ग्रामखेटपुरादीनां विभागोऽयमविस्तरात् ॥३०॥

प्रमाण और शिलाका मान ॥ २७ ॥ खड्ग, चर्म और आयुध इनका प्रमाण अंगुलसेही होता है. विषम अंगुल पुरुषोंको सुखदायी और सम अंगुल पुरुषोंके सुखके नाशक होते हैं ॥ २८ ॥ अब संक्षेपसे अंगुलके प्रमाणको कहताहूं-नव आठ सात छः ये हैं पूर्व जिनके ऐसे अंगुल कहे हैं ॥ २९ ॥ तीन प्रकारके भी हाथका प्रत्येक कर्म दिखाया है ग्राम खेट पुर आदिकोंका यह विभाग विना विस्तारसे है ॥ ३० ॥

परिखा (खाँई) द्वार रथ्या (गली) स्तम्भ जो प्रासाद (घरों) के होते हैं. उनके निकसनेके मार्गमें और सीमाके अन्तमें अन्त्रान्तर ॥ ३१ ॥ दिशान्तरोंका विभाग वस्त्र और आयोधनका विभाग और मार्गका परिमाण क्रोश गव्यूति और योजनोंसे होता है ॥ ३२ ॥ खात ककच इनकी राशि प्रासादका आंगन और आयत इनको नौ ९ जिसमें यव हों ऐसे अंगुलके हाथसे मापकर बनवावे ॥ ३३ ॥ अयोधनचर्म और चण्ड आयुध वापी कूपका और हाथी और घोडोंका प्रमाण ॥ ३४ ॥ इक्षुयन्त्र (कोल्हू) आरघण्ट हलयूप युग (जूआ) ध्वजा और

परिखाद्वाररथ्याश्च स्तम्भाः प्रासादवेश्मनाम् । तेषां निर्गममार्गे च सीमान्तेऽन्त्रान्तराणि च ॥३१॥ दिशान्तरविभागाश्च वस्त्रायोधनयोस्तथा । अध्वनः परिमाणं च कोशगव्यूतियोजनैः ॥ ३२ ॥ खातककचराशी च प्रासादायनमापनम् । नवयावांगुले हस्ते तस्य मानं प्रचक्षते ॥ ३३ ॥ आयोधनानि चर्माणि तथा चण्डायुधानि च । वापीकूपप्रमाणानि तथा च गजवाजिनाम् ॥३४॥ इक्षुयंत्रारघण्टाश्च हलयूपयुगध्वजाम् । अतोयानि च नावश्च शिल्पिनां वाप्युपस्करम् ॥३५॥ पादुके वदशी छत्रं धर्मोद्यानानि चैव हि । मात्राष्टयवहस्तेन न च दण्डांश्च मापयेत् ॥ ३६ ॥ जालन्धरे हस्तसंख्यांऽवधे च दण्डकास्तथा । मध्यदेशे क्रोशसंख्या द्वीपान्तरे तु योजनम् ॥ ३७ ॥ चतुर्विंशत्यङ्गुलैस्तु हस्तमानं प्रचक्षते । चतुर्हस्तो भवेद्दण्डः क्रोशं तद्द्विसहस्रकम् ॥३८॥

जिनमें जल न हो ऐसी नाव और शिल्पियोंकी गजआदि वस्तु ॥ ३५ ॥ पादुक वदशी (कोठी) छत्र धर्मके उद्यान इनका प्रमाण आठ ८ जौके हाथसे करे और दण्डोंको न मापै ॥ ३६ ॥ जालन्धरमें हस्तकी संख्या और अवधमें दण्डकी और मध्यदेशमें क्रोशकी संख्या और द्वीपान्तरमें योजनकी संख्या होती है ॥ ३७ ॥ चौवीस अंगुलोंसे हाथका प्रमाण कहते हैं चार हाथका दण्ड और दो सहस्र हाथका

१ संख्यावेधे च इति पाठान्तरम् ।

क्रोश होता है ॥ ३८ ॥ चार क्रोशका योजन और दश हाथका एक वंश होता है बीस हाथका निवर्तन और चौबीस हाथका क्षेत्र होता है ॥ ३९ ॥ सौ घरोंका स्थान और गृह आदिकोंका निवर्तन इन सबका स्थान ८१ इक्यासी पदोंके वास्तुसे मापकर बनावे ॥ ४० ॥ चल और अत्यन्त स्थिरभेदसे दो प्रकारके प्रासाद कहे हैं. चौसठ ६४ प्रकारके मण्डप और देवताओंके आश्रय प्राकार ॥ ४१ ॥ और विशेष कर जो छत्र (तम्बू) हैं और जो आठ प्रकारके मण्डप हैं इन सबकी कल्पनाभी ६४ पदके वास्तुसेंही करे ॥ ४२ ॥ नगर ग्राम कोट और राजाओंके

चतुष्क्रोशं योजनं तु वंशो दशकरैर्मितः । निवर्त्तनं विंशतिकरैः क्षेत्रं तच्च चतुष्करैः ॥ ३९ ॥ शतवेश्मनि देशांश्च गृहादीनां निवर्त्तनम् । एकाशीतिपदेनैव सर्वं स्थानं च मापयेत् ॥ ४० ॥ प्रासादा द्विविधाः प्रोक्ताश्चलाः स्थिरतरास्तथा । मण्डपाश्च चतुष्षष्टिः प्राकारा देवताश्रयाः ॥ ४१ ॥ विशेषेणापि ये छात्रास्तथा ये चाष्टमण्डपाः । चतुष्षष्टिपदेनैव सर्वानेतान्प्रमापयेत् ॥ ४२ ॥ नगरग्रामकोटादि स्थावराणि च भूभृताम् । स्थपतिस्थास्थितयतिप्रविभागेन मापयेत् ॥ ४३ ॥ स्निग्धादिभूभागसमुत्थितानां न्यग्रोधबिल्वद्रुमखादिराणाम् । शमीवटोदुम्बरदेवदारुक्षीरस्वदेशोत्थफलद्रुमाणाम् ॥ ४४ ॥ उपोषितः शिल्पिजनस्तु येषां मध्यान्तु तीक्ष्णेन कुठारकेण । छिन्द्यात्ततो दिक्पतितोत्तरस्यां शुभे विलग्ने परिगृह्य शंकुम् ॥ ४५ ॥

स्थावर गृह इनको स्थपति (प्रधान पुरुष कारीगर) के यहां स्थित जो यति अर्थात् अकस्मात् आयाहुआ संन्यासी उसके प्रमाणसे मापे ॥ ४३ ॥ स्निग्धआदि भूमिके भागमें पैदा हुए जो वट बेल खैर शमी न्यग्रोध गूलर देवदारु क्षीरके वृक्ष और अपने देशमें पैदाहुए फलके वृक्ष ॥ ४४ ॥ इन सबको उपवास किया है जिसने ऐसा शिल्पीजन मध्यभागमें तीक्ष्ण कुठारसे छेदन करे फिर (दिशाके पतिसे) उत्तर दिशामें

करप्रमाणं परतश्चतस्रस्तदर्द्धमानेन ततोऽनुगृह्य । नीत्वा न्यसेत्तानि गृहे च तावद्यावत्प्रतिष्ठानसमश्च शङ्कोः ॥ ४६ ॥ नन्दन्ति शुक्रा कथितैशकोणे हुताशनाख्ये सुभगेति चान्या । सुमङ्गली नैर्ऋतिभागसंस्था भद्रङ्करी मारुतकोणयाता ॥ ४७ ॥ वृषाश्व पुन्नागपदाङ्कितानां नन्दादिकानां क्रमशश्शिलानाम् । अखंडितानां सुदृढीकृतानां सुलक्षणानां ग्रहणं निरुक्तम् ॥ ४८ ॥ कूर्मश्च शेषश्च जनार्दनः श्रीर्ध्रुवश्च मध्ये भवनस्य संस्थाः । निवेशनीयाः क्रमशः शिलानां प्रमाणमेतन्मुनिभिः प्रदिष्टम् ॥ ४९ ॥ शिलाप्रमाणं क्रमशः प्रदिष्टं वर्णानुपूर्व्येण तथाङ्गुलानाम् । अथैकविंशं घनविश्वनन्दाविस्तारके व्यासमितं तदर्धम् ॥ ५० ॥ तदर्धमानं त्वथ पिंडिका स्यादूर्ध्वाधिका न्यूनतरा न कार्या । प्रमाणहीना सुतनाशकारिणी व्यङ्गाव्ययं भ्रष्टविवर्णदेहा ॥ ५१ ॥

पतितवृक्षसे शुभ लग्नमें शंकु (खूँटी) आदिको ग्रहण करके ॥ ४५ ॥ उस शंकुके चारोंतरफ चार हाथभर वा उसके आधे प्रमाणसे भूमिको ग्रहण करके छेदन किये हुए उन पूर्वोक्त वृक्षोंको लेजाकर तबतक रखदे जबतक शंकुकी प्रतिष्ठाकी समानता हो ॥ ४६ ॥ ईशकोण (ईशान) की नन्दन्ती (शिला) को शुक्रा अग्निकोणकी सुभगा और नैर्ऋतकोणकी सुमंगली और वायुकोणकी भद्रंकरी नाम कहते हैं ॥ ४७ ॥ वृष अश्व पुरुष नाग इनके समान पैरोंसे क्रमसे अंकित जो नन्दन्ती आदि शिला हैं उनका ऐसियोंका ग्रहण करना कहा है जो अखण्डित हों भली प्रकार दृढ हों और जो शुभ लक्षणकी हों ॥ ४८ ॥ उन शिलाओंके मध्यमें क्रमसे कूर्म्म (कच्छप) शेष जनार्दन और श्री ध्रुव इन चारोंके भवनके मध्यमें स्थितिके लिये स्थापन करे यह प्रमाण मुनियोंने कहा है ॥ ४९ ॥ शिलाओंका प्रमाण वर्णोंके क्रमसे यह कहा है कि, इक्कीस २१ घन [१७] तेरह १३ नन्द [९] इतने अंगुलोंका विस्तार वर्णोंके क्रमसे जानना और इनसे आधा व्यास होता है ॥ ५० ॥ उससे आधा प्रमाण पिण्डिकाका होता है वह ऊपरको अधिक बनानी अत्यन्त न्यून न बनानी और प्रमाणसे हीन होय तो पुत्रके नाशको

करती है और व्यंग (टूटी) भ्रष्ट और विवर्ण देह (मैली) व्यय अर्थात् अधिक खर्च वा नाशको करती है ॥ ५१ ॥ धनकी भी नष्टताको करती है. विस्तारके घरका जो प्रमाण हो उसके समान शिल्पिजनोंके अनुकूल शिला बनवानी, पत्थरके घरमें शिला पत्थरकी ही बनवानी, शिलाके घरमें शिलाओंसे बनवानी और ईंटके घरमें ईंटकाही पीठ कहा है ॥ ५२ ॥ भद्रनामके घरमें मूलपाद शिलास्थापन आदिका कहा है और पक्की ईंटोंके घरमें ईंटोंकाही मूलपाद बनवावे ॥ ५३ ॥ ईंटोंकाही बनवायेहुए घरमें वास्तुके विषे शिलाके प्रमाणको देखना

धनार्त्तिदा प्रस्तरगेहमाने कार्या शिला शिल्पिजनानुकूला॥पाषाणगेहे कर्तव्या शिला पाषाणसंभवा। शैलजे शैलजः पीठश्चैष्टके चैष्टकः स्मृतः ॥ ५२ ॥ शिलान्यासादिको भद्रे मूलपादो विधीयते । पक्केष्टनिर्मिते चैव इष्टकानां च कारयेत् ॥ ५३ ॥ इष्टका निर्मिते गेहे प्रमाणमिह लक्षयेत । अपरेषां गृहाणां तु शिलामानं न चिन्तयेत् ॥ ५४ ॥ आधारभूता तु शिला प्रकल्प्या दृढा मनोज्ञा परिमाणयुक्ता । सल्लक्षणा चापरिमाणमाना न चाधिका न्यूनतरा न कृष्णा ॥५५॥ द्वाराधिपादीन्पतयो गजाश्वाः सम्पूजनीया बलिभिः समंत्रैः । स्नानार्थमानीय सुतीर्थतोयं ततोपहारैः प्रतिपूज्य कुम्भम् ॥५६॥ ध्रुवे शिलायास्तु ततः खनित्वा कुम्भं प्रतिष्ठाप्य शराङ्गुलीयम् । विप्रादिवर्णानुगतः प्रशस्तस्तदर्द्धमानं तु तदर्द्धमानम् ॥ ५७ ॥

और अन्य घरोंमें शिलाके प्रमाणकी चिन्ता न करनी ॥ ५४ ॥ आधारकी जो शिला है वह ऐसी बनवानी जो दृढ मनोहर परिमाणसे युक्त उत्तम जिसके लक्षण हों जो परिमाणके मानसे न अधिक न अत्यन्त न्यून हो और जिसका रंग काला हो ॥ ५५ ॥ द्वारके अधिप आदि स्वामी गज अश्व इनका बलि और मंत्रोंसे भलीप्रकार पूजन करे फिर स्नानके लिये सुन्दर तीर्थके जलको लाकर पूजाकी सामग्रियोंसे कुंभका पूजन कर ॥ ५६ ॥ फिर शिलाके ध्रुवभागमें पांच अंगुल खोदकर इस कुंभका स्थापन करे वह कुम्भ ब्राह्मण आदि वर्णोंके अनुसार

आधे २ न्यून प्रमाणसे प्रशस्त होता है ॥ ५७ ॥ उस कुंभको जल अक्षत व्रीहि पंचगव्य मधु घृत आदिसे भलीप्रकार पूर्ण करके ॥ ५८ ॥ शिलाके स्थापन समयमें सामग्रियोंको इकट्ठी करे समुद्रमें जितने रत्न हों उनको और, सुवर्ण चांदी सर्व बीज गन्ध शर कुशा ॥ ५९ ॥ सफेद पुष्प घी सफेद मधु गोरोचन आमिष (मांस) और मदिरा नानाप्रकारके फल ॥ ६० ॥ नैवेद्यके लिये पक्वान्न और ऐसे भूषण जो सफेद पीले रक्त और कृष्णवर्णके क्रमसे हों ॥ ६१ ॥ गन्धआदि वस्त्र और पुष्प इनको वास्तुविधानके ज्ञाताओंसे बडी सावधानीसे इकट्ठे कर

जलाक्षतव्रीहिसपञ्चगव्यमधवाज्यजातं परिपूर्य्य सम्यक् ॥५८॥ शिलाविन्यासकाले तु संभारांश्चोपकल्पयेत् । समुद्रे यानि रत्नानि सुवर्णं रजतं तथा । सर्वबीजानि गन्धाश्च शरा दर्भास्तथैव च ॥५९॥ शुक्लाः सुमनसः सर्पिः श्वेतञ्च मधु रोचना॥आमिषञ्च तथा मद्यं फलानि विविधानि च ॥६०॥ नैवेद्यार्थं च पक्वान्नं वस्त्राण्याभरणानि च । श्वेतं पीतं तथा रक्तं कृष्णं वर्णक्रमेण च ॥६१॥ गन्धादींश्चैव वस्त्रं च पुष्पाणि च तथैव च । वास्तुविद्याविधानज्ञैः कारयेत्सुसमाहितः ॥ ६२ ॥ इति वास्तुशास्त्रे गृहादिनिर्माणे चतुर्थोऽध्यायः ॥ ४ ॥ प्रोक्तं यद्भवता सम्यक्प्रासादानां यथाक्रमम् । अधुना श्रोतुमिच्छामि वास्तुदेहस्य लक्षणम् ॥ १ ॥ पुरा स भगवान्वास्तुपुरुषः परिकीर्तितः । पूर्वोत्तरमुखो वास्तुपुरुषः परिकल्पितः ॥ २ ॥ देवैः सेन्द्रादिभिस्तस्मिन्काले भूमौ निपातितः । अवाङ्मुखो निपतित ईशान्यां दिशि संस्थितः ॥ ३ ॥

वावे ॥ ६२ ॥ इति पण्डित मिहिरचंद्रकृत भाषाविवृतिसहिते वास्तुशास्त्रे गृहादिनिर्माणवर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥ जो आपने भली प्रकार प्रासादोंका क्रम कहा वह हमने सुना अब वास्तुदेहके लक्षणको सुना चाहते हैं ॥ १ ॥ पहिले वह भगवान् वास्तुपुरुष आपने कहा और पूर्वोत्तरमुख वास्तुपुरुषकी रचना आपने कही ॥ २ ॥ इन्द्र आदि देवताओंने उस कालमें उसे भूमिमें पतन किया और वह नीचेको मुख

किये गिरा और ईशानदिशामें स्थितहुआ ॥ ३ ॥ उसके शिरभागमें अग्नि स्थित है मुखमें जल स्तनमें यम उत्तरभागमें स्थित आपवत्स वामस्तनमें स्थित रहताहै ॥ ४ ॥ पर्जन्य आदि देवता नासिका नेत्र कर्ण उरःस्थल और स्कन्धोंमें स्थित रहते हैं और सप्त आदि पांच पुरुषोत्तमकी भुजामें स्थित करे और हस्तमें सूर्य सावित्री इनका हाथमें वितथ और गृहक्षत ॥ ५ ॥ इनका पार्श्वमें और जठर (पेट) चारों तरफ विवस्वान् स्थित रहताहै और ऊरू (जंघा) जानु स्फिक् ये यमदिशा आदिसे स्थित रहते हैं ये दक्षिणपार्श्व और वामपार्श्व दोनोंमें स्थित

शिरोभागे स्थितो वह्निर्मुखे आपः स्तने यमः । आपवत्सश्चोत्तरस्यां सव्यमार्गसमाश्रितः ॥ ४ ॥ पर्जन्याद्यास्तथा नासाद्यक्कर्ण्वोरः स्थलांसगाः । सप्ताद्याः पञ्च च भुजे विन्यस्य पुरुषोत्तमे । हस्ते सविता सावित्री वितथोऽथ गृहक्षतः ॥ ५ ॥ पार्श्वे जठरे विवस्वाँश्च आस्थितः परितस्सदा । ऊरू जानू जङ्घस्फिचो यमाद्यैः परिवेष्टिताः । एते दक्षिणपार्श्वस्था वामपार्श्वे तथैव च ॥ ६ ॥ शेषा दण्डजयन्तौ च मेढ्रे ब्रह्मा हृदि स्थितः ॥ पादे समाश्रित इति पितृभिः परिवारितः । चत्वारिंशत्पञ्चयुक्ताः परितो ब्रह्मणस्तथा ॥ ७ ॥ चतुष्पष्टिपदे वास्तौ देवा ब्रह्मादयस्तथा । कोणे तेषां प्रकर्तव्यास्तिर्यक्कोष्ठगता द्विजाः ॥ ८ ॥ चतुःपष्टिपदो वास्तुः प्रासादे ब्रह्मणा स्मृतः । ब्रह्मा चतुष्पदो ह्यत्र कोणाद्यर्द्धं पदाः स्मृताः ॥ ९ ॥

रहते हैं ॥६॥ शेष देवता और दण्ड जयन्त ये लिंगइन्द्रियमें स्थित रहते हैं और चरणोंमें पितरों सहित वास्तुपुरुष रहता है (४५) पैंतालीस कोष्ठ चारों तरफ ब्रह्माके होते हैं ॥ ७ ॥ चौंसठ पदके वास्तुमें ब्रह्मा आदिक देवता रहते हैं और उनके कोणमें तिरछे कोष्ठोंमें द्विज रहते हैं ॥ ८ ॥ ब्रह्माने चौंसठ पदका वास्तु प्रासादमें कहा है, ब्रह्मा वास्तुमें चतुष्पद कहा है और कोणके विषे आधे २ पद कहे हैं ॥ ९ ॥ सोलह कोणोंमें सार्द्ध

षोडशकोणगाः सार्द्धपदाश्चाथोभयस्थिताः । विंशतिर्द्विपदाश्चैव चतुष्पट्टिपदे स्मृताः ॥ १० ॥ जीर्णोद्धारे तथोद्याने तथा गृह निवेशने । नवप्रासादभवने प्रासादपरिवर्तने ॥ ११ ॥ द्वाराभिवर्तने तद्वत्प्रासादेषु गृहेषु च । वास्तूपशमनं कुर्यात्पूर्वमेव विचक्षणः ॥ १२ ॥ वास्तुमण्डलकोणेषु ईशानादिक्रमेण च ॥ शंकूनां रोपणं शस्तं प्रादक्षिण्येन मार्गतः ॥ १३ ॥ विशन्तु भूतले नागा लोकपालाश्च सर्वशः । अस्मिन्गृहेऽवतिष्ठन्तु आयुर्बलकराः सदा ॥ १४ ॥ प्रासादारामवापीषु कूपोद्यानेषु चैव हि । तन्नाम पूर्विका रौप्या कोणे शङ्कुचतुष्टयम् ॥ १५ ॥ अग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तत्समाश्रिताः । तेभ्यो बलिं प्रयच्छामि पुण्य मोदनमुत्तमम् ॥ १६ ॥ एकाशीतिपदं कुर्य्याद्रेखाभिः कनकेन च । पश्चात्पिष्टेन चालिख्य सूत्रेणालोडच सर्वतः ॥ १७ ॥ दश पूर्वायता रेखा दश चैवोत्तरायताः । सर्वा वास्तुविभागेषु विज्ञेया नवका नव ॥ १८ ॥

(१॥) पद दोनों भागोंमें स्थित होते हैं और बीस दो दो पदके वास्तुमें कहे हैं ॥ १० ॥ जीर्णोद्धारमें. उद्यानमें, गृहके प्रवेशमें, नवीन प्रासाद, प्रासादके परिवर्तन (बनाना) में ॥ ११ ॥ द्वारके बनवाने और प्रासाद गृहोंमें बुद्धिमान मनुष्य पहिलेही वास्तुशान्तिको करे ॥१२॥ वास्तुमण्डलके कोणोंमें ईशानदिशा आदिके प्रदक्षिण क्रमसे शंकुओंका रोपण (रखना) श्रेष्ठ होता है ॥ १३ ॥ 'नाग ! भूतलके विषे प्रवेश करो और समस्त लोकपाल जो आयु और बलके करनेहारे हैं वे सदैव इस ग्रहके विषे टिको' इस मंत्रको पढ़कर वास्तुके कोणमें शंकुओंको रक्खे ॥ १४ ॥ प्रासाद आराम वापी कूप उद्यानमें नामोच्चारणपूर्वक कोणोंमें चार शंकुओंका स्थापन करे ॥ १५ ॥ अग्नि सर्प और जो अन्य दिशामें देवता स्थित हैं उनके लिये पवित्र और उत्तम ओदनकी बलिको देताहूं ॥ १६ ॥ सुवर्णकी रेखाओंसे वास्तुके विषे (८१) इक्यासी पद करै फिर सूत्रको चारों तरफ रखकर चूनसे आलेखन करै ॥ १७ ॥ दशरेखा पूर्वको लम्बी और दशरेखा उत्तरको लंबी करै संपूर्ण वास्तु-

ओंके विभागोंमें नौ ९ नवक जानने ॥ १८ ॥ शान्ता यशोवती कांता विशाला प्राणवाहिनी सती सुमना नंदा सुभद्रा और सुस्थिता ॥ १९ ॥ ये दश १० रेखा पूर्वपश्चिमके गत (गई) होती हैं और उत्तर और दक्षिणके आश्रित ये होती हैं हिरण्या सुव्रता लक्ष्मी विभूति विमला प्रिया ॥ २० ॥ जया काला विशोका और दशमी इंद्रा कही है । इक्यासी पदके वास्तुमें ये शिरा कही हैं ॥ २१ ॥ श्रिया यशोवती कांता सुप्रिया परा शिवा सुशोभा सधना और नौमी इभा ॥ २२ ॥ ये नौ शिरा पूर्वसे पश्चिमपर्यंत चौंसठ पदके वास्तुमें होती हैं. धन्या धरा विशाला

शान्ता यशोवती कान्ता विशाला प्राणवाहिनी । सती च सुमनानन्दा सुभद्रा सुस्थिता तथा ॥१९॥ पूर्वापरागता ह्येता उदग्र्या म्याश्रितास्तथा । हिरण्या सुव्रता लक्ष्मीर्विभूतिर्विमला प्रिया ॥ २० ॥ जया काला विशोका च तथेन्द्रा दशमी स्मृता । एकाशीतिपदे ह्येता शिराश्च परिकीर्तिताः ॥ २१ ॥ श्रिया यशोवती कान्ता सुप्रियापि परा शिवा । सुशोभा सधना ज्ञेया तथेभा नवमी स्मृता ॥ २२ ॥ पूर्वापरा तथा ह्येताश्चतुष्षष्टिपदे स्थिताः । धन्या धरा विशाला च स्थिरा रूपा गदा निशा ॥ २३ ॥ विभवा प्रभवा चान्या सौम्यासौम्याश्रिताः शिराः । पदस्याष्टांशको भागस्तत्प्रोक्तं कर्मसंज्ञकम् ॥२४॥पदहस्तसंख्यया सम्मितो निवेशोऽङ्गुलानि । विस्तीर्णवंशव्यासोर्द्धं शिरामानं प्रचक्षते ॥ २५ ॥ संपाता अपि वंशानां मध्यमानि समानि च । पदानां पाति तान्विद्यात्सर्वाणि भयदान्यपि ॥ २६ ॥

स्थिररूपा गदा और निशा ॥ २३ ॥ विभवा प्रभवा और सौम्या ये उत्तरदिशामें नौ ९ शिरा होती हैं पदके आठवें अंशको कर्मसंज्ञक भाग कहते हैं ॥ २४ ॥ पदके हाथकी संख्यासे जो निवेश उसे अंगुल कहते हैं. विस्तारकिये वंशका जो ऊर्ध्वभाग उतना शिरका प्रमाण कहते हैं ॥ २५ ॥ बासोंका जो सम्पात उसका भी मध्यम और समभाग जो हो वह भी शिराका मान जानना और उसके मध्यमें जो पद हो उन सबको भयके

दाता जाने ॥ २६ ॥ बुद्धिमान मनुष्य उन पदोंके शुद्ध भाण्ड और कीलोंसे पीडित न करै. न स्तम्भ और शल्यके दोषोंसे पीडित करै, करै तो गृहके स्वामीको पीडा ॥ २७ ॥ उसी अवयवमें होती है जिस अवयवमें वास्तुपुरुषके हो और जिस वास्तुके अंगमें कण्डूति (खजुली) करै उसी अंगमें घरके स्वामीके कण्डूति होती है ॥ २८ ॥ होमके समयमें यज्ञ और भूमिकी परीक्षामें जहां अग्निका विकार होजाय वहां शल्यको कहै अर्थात विघ्नकी शंका होती है ॥ २९ ॥ काष्ठके बांसमें धनकी हानि, अस्थिके बांसमें पशुओंमें पीडा और रोगका भय कहा

न तानि पीडयेत्प्राज्ञः शुचिभाण्डैश्च कीलकैः । स्तम्भैश्च शल्यदोषैश्च गृहस्वामिषु पीडनम् ॥ २७ ॥ तस्मिन्नवयवे तस्य बाधा चैव प्रजायते । कण्डूयते यदङ्गं वा गृहस्वामी तथैव च ॥ २८ ॥ होमकाले च यज्ञादौ तथा भूमिपरीक्षणे । अग्नेर्वा विकृतिर्यत्र तत्र शल्यं विनिर्दिशेत् ॥ २९ ॥ धनहानिर्दारुमये पशुपीडास्थिसंभवे । रोगस्यापि भयं प्रोक्तं नागदन्तोऽपि दूषकः ॥ ३० ॥ वंशानिमान्प्रवक्ष्यामि बहूनपि पृथक्पृथक् । वायुं यावत्तथा रोगात्पितृभ्यः शिष्यतस्तथा ॥ ३१ ॥ मुख्याद्भृङ्गस्तथाशोकाद्वितथं यावदेव तु । सुग्रीवाददितिं यावद्भृङ्गात्पर्जन्यमेव च ॥ ३२ ॥ एते वंशाः समाख्याताः क्वचिद्दुर्जय एव तु । एतेषां यस्तु संपातः पदमध्ये समन्ततः ॥३३॥ एतत्प्रवेशमाख्यातं त्रिशूलं कोणकं च यत् । स्तम्भन्यासेषु वर्ज्यानि तुलाबन्धेषु सर्वदा॥३४॥

है. हाथीदांत भी दूषित है ॥ ३० ॥ इससे इन बहुत प्रकारके बांसोंको पृथक् २ कहताहूं कि, रोगसे वायुपर्यंत. और शिखीसे पितरोंतक ॥ ३१ ॥ मुख्यसे भृंगतक. शोकसे वितथपर्यंत, सुग्रीवसे अदितिपर्यंत, भृंगसे पर्जन्यपर्यंत ॥ ३२ ॥ ये बांस शास्त्रकारोंने कहे हैं और कहीं दुर्जयभी कहा है इनका जो पदके मध्यमें चारों तरफका संपात है ॥ ३३ ॥ उसको प्रवेश कहते हैं वह त्रिशूल वा कोणके आकारका जो

होता है वह स्तंभोंको रखने और तुलाके रखनेमें सदैव वर्जित है ॥ ३४ ॥ संपूर्ण कर्मोंमें वास्तुपुरुष दक्षिण और अग्रकोणमें आयत (लम्बा) कहा है, इक्यासी ८१ पदके इस वास्तुमें देवताओंके स्थापनको सुनो ॥ ३५ ॥ उसमें रेखाओंके फलकोभी संक्षेपसे कहताहूं और वर्णोंके क्रमसे श्रेष्ठ अंगके स्पर्शको कहताहूं ॥ ३६ ॥ ब्राह्मण शिरका स्पर्श करके, क्षत्रिय नेत्रका स्पर्श करके, वैश्य जंघाओंका स्पर्श करके और शूद्र चरणोंका स्पर्श करके वास्तुके पूजनका प्रारंभ करै ॥ ३७ ॥ अंगूठेसे वा मध्यकी अंगुलीसे वा प्रदेशिनीसे अथवा सुवर्ण चांदी आदि धातुसे

सर्वत्र वास्तुनिर्दिष्टः पितृवैश्वानरा यतः । एकाशीतिपदे ह्यस्मिन्देवतास्थापने शृणु ॥ ३५ ॥ रेखाणां च फलं तत्र कथयामि समासतः । वर्णानुपूर्व्येण तथा अङ्गस्पर्शनकं परम् ॥३६॥ विप्रः स्पृष्ट्वा तथा शीर्षं चक्षुः क्षत्रियकस्तथा । वैश्यश्चोरू च शूद्रश्च पादौ स्पृष्ट्वा समारभेत् ॥३७॥ अंगुष्टकेन वा कुर्यान्मध्यांगुल्या तथैव च । प्रदेशिन्या ह्यपि तथा स्वर्णरौप्यादिधातुना॥३८॥ मणिना कुसुमैर्वापि तथा दध्यक्षतैः फलैः । शस्त्रेण शत्रुतो मृत्युर्बन्धो लोहेन भस्मना ॥३९॥अग्नेर्भयं तृणेनापि काष्ठादिलिखितेन च । नृपाद्भयं तथा वक्रे खंडे शत्रुभयं भवेत् ॥ ४० ॥ विरूपा चर्मदन्तेन चांगारेणास्थिनापि वा । न शिवाय भवेद्रेखा स्वामिनो मरणं तथा ॥४१॥ अपसव्यक्रमे वैरं सव्ये संपदमादिशेत् । तस्मिन्कर्मसमारंभे क्षुतं निष्ठीवितं तथा ॥ ४२ ॥

पूजनको करे ॥ ३८ ॥ अथवा मणिसे वा पुष्पोंसे वा दही अक्षत फलोंसे पूजन करे और शस्त्रसे पूजन करे तो शत्रुसे मृत्यु होती है. लोहेसे बन्धन और भस्मसे ॥ ३९ ॥ अग्निका भय, तृण और काष्ठ आदिके लिखनेसे राजासे भय होता है. वक्र (टेढा) और खंडित होनेपर शत्रुसे भय होता है ॥ ४० ॥ कुरूप रेखा, चर्म और दांतोंसे बनाई रेखा, कोला और अस्थिसे बनाई रेखा कल्याणके लिये नहीं होती और स्वामीके मरणको करती है ॥ ४१ ॥ अपसव्य (वाम) क्रमसे करै तो वैर, दक्षिणसे करै तो सम्पदा होती है. वास्तुकर्मके प्रारंभमें

छिक्का और छींवन (थूक) इनको वर्ज दे ॥ ४२ ॥ जो कठोरवाणी और जो बुरे शकुन हैं उनको वर्जकर वास्तुकर्मका प्रारंभ करै ॥ ४३ ॥ अ क च ट त प य श ष ये वर्ग आठों दिशाओंमें पूर्वदिशासे लेकर स्थित हैं उसके अन्तर फलको कहैं ॥ ४४ ॥ वर्णप्रश्नके कालमें मध्यमें एक अक्षर जो होता है उससे उसी दिशाके विषे घरमें शल्य (विघ्न) को जाने ॥ ४५ ॥ इनसे परे बाहिरके देशमें यदि दो अक्षरका प्रश्न होय तो तब गृहके मध्यमें शल्यको न जाने यह शास्त्रका निश्चय है ॥ ४६ ॥ वास्तुका ज्ञाता पुरुष सम्पूर्ण वास्तुओंमें ८१ इक्यासी पदके वास्तुको

वाचस्तु परुषास्तत्र ये चान्ये शकुनाधमाः । तान्विवर्ज्य प्रकुर्वीत वास्तुपूजनकर्मणि ॥ ४३ ॥ अकचटतपयशवर्गा इत्यष्टदिक्षु च । प्राचीप्रभृतिषु वर्णास्तत्परं कारयेत्फलम् ॥ ४४ ॥ एते वर्णाः प्रश्नकाले मध्ये पञ्चैकमक्षरम् । तेन शल्यं विजानीयादिशि तस्यां च वेश्मनः ॥ ४५ ॥ एतेभ्यो वा परं बाह्ये प्रश्नं यदूद्व्यक्षरं भवेत् । तदा शल्यं न जानीयाद्गृहमध्ये विनिश्चयः ॥ ४६ ॥ एकाशीतिपदं कुर्याद्वास्तुवित्सर्ववास्तुषु । आदौ सम्पूज्य गणपं दिक्पालान् पूजयेत्ततः ॥ ४७ ॥ धरित्र्यां कलशं स्थाप्य मातृकाः पूजयेत्ततः । नांदीश्राद्धं ततः कुर्यात्पुण्यानभ्यर्चयेत्ततः ॥ ४८ ॥ अग्निसंस्थापनार्थन्तु मेखलात्रयसंयुतम् । कुण्डं कुर्याद्विधानेन योन्याकारं विशेषतः ॥४९॥ स्थंडिलं वा प्रकुर्वीत मतिमान्सर्वकर्मसु । पदस्थान्पूजयेत्सर्वान्पञ्चत्रिंशत्तथैव च ॥५०॥

करै, प्रथम गणेशजीका पूजन करके फिर दिक्पालोंका पूजन करै ॥ ४७ ॥ भूमिपर कलशका स्थापन करके फिर मातृकाओंका पूजन करे फिर नान्दीमुख श्राद्धको करे फिर उसके अनन्तर पवित्र ब्राह्मण और देवता आदिका पूजन करै ॥ ४८ ॥ अग्निकी स्थापनाके लिये तीन मेखलाओंसे युक्त विशेषकर योनिके आकारका कुण्ड बनावे ॥ ४९ ॥ अथवा बुद्धिमान् मनुष्य सम्पूर्ण कर्मोंमें स्थण्डिलकोही करै और पदमें स्थित

सम्पूर्ण देवताओंका और ३५ पैंतीस देवताओंका पूजन करै ॥ ५० ॥ शिखी देवता एक पदका कहा है और पर्जन्य भी एकही पदका होता है. जयन्त दो पदका और सूर्यभी दो पदका सत्य भृश ये दोनों दो कोष्ठके होते हैं ॥ ५१ ॥ अन्तरिक्ष एक पदका और वायुभी एक पदका है ॥ ५२ ॥ पूषा एक पदका और वितथ दो पदका होता है. दक्षिणदिशामें स्थित गृहक्षत और यम ये दोनों दो पदके होते हैं ॥ ५३ ॥ गन्धर्व और मृगराज ये भी दो पदके कहे हैं. मृग पितृगण और दौवारिक ये एकपदके होते हैं ॥ ५४ ॥ सुग्रीव पुष्पदन्त और वरुण ये दो पदके

शिखी चैकपदं प्रोक्तः पर्जन्यश्च तथैव च । जयन्तो द्विपदः सूर्यः सत्यभृशौ द्विकोष्ठकौ ॥५१॥ पदैकमन्तरिक्षस्तु वायुश्चैकपदः स्मृतः ॥ ५२॥ पूषा चैकपदो ह्यस्मिन्द्विपदो वितथस्तथा । द्विपदौ दक्षिणाशास्थौ गृहक्षतयमावुभौ ॥ ५३ ॥ गन्धर्वमृगराजौ तु द्विपदौ परिकीर्तितौ । मृगः पितृगणश्चैव दौवारिकश्चैकपादकः ॥ ५४ ॥ सुग्रीवपुष्पदन्तौ च द्विपदौ वरुणस्तथा । असुरश्च तथा शोको द्विपदाः परिकीर्तिताः ॥५५॥ पापो रोगस्तथा सर्पस्त्रयश्चैकपदा मताः । मुख्यभल्लाटसोमाख्यास्त्रिपदास्ते त्रयः स्मृताः ॥ ५६॥ सर्पश्च द्विपदः प्रोक्तो ह्यदितिश्च तथैव च । दितिश्चैकपदा प्रोक्ता द्वात्रिंशद्बाह्यतः स्थिताः ॥५७॥ ईशानादिचतुष्कोणे संस्थितान्पूजयेद्बुधः । आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ॥ ५८ ॥

असुर अशोक ये भी दो पदके कहे हैं ॥ ५५ ॥ पाप रोग और सर्प ये तीनों एक पदके कहे हैं, मुख भल्लाट और सोम ये तीनोंभी एक एक पदके कहे हैं ॥ ५६ ॥ सर्प और अदिति ये दोनों दोदो पदके कहे हैं, दिति एक पदकी कही है, और बत्तीस ३२ देवता कोष्ठोंसे बाहिर स्थित हैं ॥ ५७ ॥ ईशानआदिचारों कोणोंमें जो स्थित हैं इनका पूजन बुद्धिमान मनुष्य करै जल और सावित्र जय और रुद्र ॥ ५८ ॥

इनके अन्तमें स्थित जो हैं इन सबको एक एक पदमें ईशान आदि दिशाओंमें स्थित करे, अर्यमा तीन पदका और सविता एक पदका होता है ॥ ५९ ॥ विवस्वान् तीनपदका दक्षिण दिशामें होता है. इंद्र एक पदका नैर्ऋतमें और मित्र एकपदका पश्चिममें कहा है ॥ ६० ॥ वायव्यमें एक पदका राजयक्ष्मा कहा है, उत्तरमें त्रिपदा और धराय एक पदके कहे हैं ॥ ६१ ॥ मध्यमें नौ ९ पदका ब्रह्मा पीत श्वेत और चतु

तदंतगांश्चैकपदानीशानादिषु विन्यसेत् । अर्यमा त्रिपदः पूर्वे सविता च तथैकपात् ॥ ५९ ॥ विवस्वांस्त्रिपदो याम्ये इन्द्रश्चैक पदस्तथा । नैर्ऋते पश्चिमे मित्रस्त्रिपदः परिकीर्तितः ॥ ६० ॥ वायव्ये राजयक्ष्मा च एकपादः प्रकीर्तितः । उत्तरे त्रिपदा पृथ्वी धरायश्चैकपात्तथा ॥ ६१ ॥ मध्ये नवपदो ब्रह्मा पीतः श्वेतश्चतुर्भुजः । आब्रह्मन्ब्राह्मण इति मंत्रोऽयं समुदाहृतः ॥ ६२ ॥ अर्यमा कृष्णवर्णश्च अर्यम्णा च बृहस्पतिः । सविता रक्तवर्णस्तु उपयामगृहीतकम् ॥६३॥ विवस्वाञ्छुक्लवर्णश्च विवस्वन्नादित्यमन्त्रतः । इन्द्रो रक्तेन्द्रसुत्रामा मंत्रोऽयं समुदाहृतः ॥ ६४ ॥

भुजी कहा है. उसकी पूजाका मन्त्र आब्रह्मन्ब्राह्मणः० यह कहा है ॥ ६२ ॥ अर्यमा कृष्णवर्णका और अर्यमणं बृहस्पतिम् यह उसका मंत्र कहा है, सविता (सूर्य) रक्त वर्ण और उपयाम गृहीतः० यह उसका मंत्र कहा है ॥ ६३ ॥ विवस्वान् शुक्ल वर्ण और विवस्वन्नादित्य० यह उसका मंत्र रक्त और इंद्र सुत्रामा० यह उसका मन्त्र कहा है ॥ ६४ ॥

---

१ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रेराजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठासभेयो युवास्य यजमानस्य वीरो जायतां निकामेनिकामेनः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥ २ अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय । वाचं विष्णु ꣳ सरस्वतीं ꣳ सवितारं च वाजिनम् स्वाहा ॥ ३ उपयाम गृहीतोसि इत्यादिमंत्राः॥४ विवस्वन्नादित्यैषते सोमपीथस्तस्मिन्मत्स्व । श्रदस्मै नरो वचसे दधातन यदाशीर्दा दम्पती वामम्श्नुतः । पुमान् पुत्रं जायते विन्दते वस्वधाविश्वाहारप एधते गृहे ॥ ५ इन्द्रस्सुत्रामा स्ववाँ २ अवोभिस्समृडीको भवतु विश्ववेदाः । बाधन्तां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥

मित्र श्वेत और तन्मित्रस्य वरुणस्याभिचक्षे० यह उसका मंत्र कहा है और राजयक्ष्मा रक्तवर्ण और अभिगोत्राणि० यह उसका मन्त्र कहा है ॥ ६५ ॥ पृथ्वीधर रक्तवर्ण और पृथ्वीछन्द यह उसका मन्त्र कहा है आपवत्स शुक्ल वर्ण और भवतन्न० यह उसका मन्त्र कहाहै ॥ ६६ ॥

मित्रः श्वेतश्च तन्मित्रं वरुणस्याभिचक्षे त्विति । राजयक्ष्मा रक्तवर्णो ह्यभिगोत्राणि मन्त्रतः ॥६५॥ पृथ्वीधरो रक्तवर्णः पृथिवी छन्दमंत्रतः । आपवत्सः शुक्लवर्णो भवतन्नेति मन्त्रतः ॥ ६६ ॥ आपः शुक्लवर्णश्च तद्बाह्ये आपो अस्मान्मातरेति च । सवि त्राग्नेयदिग्भागे शुक्लवर्णैकपात्तथा॥६७॥उपयामगृहीतोऽसि सावित्रोसीतिमन्त्रतः। जयन्तः श्वेतो नैर्ऋत्ये मर्माणिेतति मन्त्रतः॥६८॥

और उसके बाह्य देशमें आप शुक्ल वर्ण और आपोअस्मान्मातरः यह उसका मन्त्र कहा है और सवित्रा० अग्निकोणके दिग्भागमें शुक्लवर्णका एकपद कहा है ॥ ६७ ॥ और उपयाम गृहीतोसि० और सवितात्वा ये उसके मन्त्र कहे हैं और जयन्त श्वेत मर्माणि० इस मन्त्रसे कहाहै ॥ ६८ ॥

---

१ तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे । अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितस्सम्भरन्ति ॥ २ अभिगोत्राणि सहसा गाहमानोदयो वीरः शतमन्यु-रिन्द्रः । दुश्च्यवनः पृतनाषाडयुध्योऽस्माक॑ सेना अवतु प्रयुत्सु ॥ ३ पृथिवीच्छन्दोऽन्तरिक्षं छन्दो द्यौश्छन्दः समाश्छन्दो नक्षत्राणि छन्दो वाक्छन्दो मनश्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दोऽजाश्छन्दोऽश्वश्छन्दः ॥ ४ भवतन्नस्समनसौ सचेतसावरेपसौ । मा यज्ञ॑ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥ ५ आपो अस्मान्मातरश्शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्व॑ हिरिप्रं प्रवहन्ति देवी रुदिदाभ्यः शुचिरापूत एमि । दीक्षा तपसोस्तनूरसि तान्वा शिवा शग्मां परिदेहि भद्रं वर्ण पुष्यन् ॥ ६ सवित्रा प्रसवित्रा सरस्वत्या वाचा त्वष्ट्रा रूपैः पूष्णा पशुभिरिन्द्रेणास्मे बृहस्पतिना ब्रह्मणा वरुणेनौजसाग्निना तेजसा सोमेन राज्ञा विष्णुना दशम्या देवतया प्रसूतः प्रसर्पामि ॥ ७ उपयाम गृहीतोसि सावित्रोसि चनोधाश्चनोधा असि चनोमयि धेहि। जिन्व यज्ञं जिन्व यज्ञपतिं भगाय देवाय त्वा सवित्रे ॥ ८ मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानुवस्ताम । उरोर्वरीया वरुणस्ते कृणोतु जयतन्त्वानुदेवामदन्तु ॥

रुद्र रक्त वायव्यदिशामें सुत्रामाणम् इस ऋचासे कहा है ईशानमें रक्तवर्णका शिखी तमीशानम्० इस मंत्रसे कहाहै ॥ ६९ ॥ पीतवर्णका पर्जन्य महां इंद्र० मन्त्रसे कहाहै जयंत पीतवर्णका धन्वनागा० इस मन्त्रसे कहाहै ॥ ७० ॥ कुलिशायुध पीतवर्णका महांइन्द्र० इस मन्त्रसे कहाहै सूर्य रक्तवर्णका

रुद्रो रक्तश्च वायव्ये सुत्रामा इति मन्त्रतः । ईशाने रक्तवर्णश्च तमीशानेति वै शिखि ॥ ६९ ॥ पर्जन्यः पीतवर्णश्च महाँ इन्द्रेति वै तथा । जयन्तः पीतवर्णश्च धन्वनागा इति स्मृतः ॥ ७० ॥ कुलिशायुधः पीतवर्णो महाँइन्द्रेति वै तथा । सूर्यो रक्तः सूर्यरश्मि र्हरिकेशेति मन्त्रतः ॥ ७१ ॥ सत्यश्च शुक्लो व्रतेन दीक्षामाप्नोति मन्त्रतः । भृशः कृष्णो मन्त्रमस्य भद्रङ्कर्णेभिरेव च ॥ ७२ ॥ अन्तरिक्षः कृष्णवर्णो वयं सोमश्च इत्यपि । वायुर्धूम्रस्तथा वर्ण आवायोरिति मन्त्रतः ॥ ७३ ॥

और सूर्यरश्मि हरिकेश इस मन्त्रसे कहा है ॥ ७१ ॥ सत्य शुक्लवर्णका व्रतेनदीक्षामाप्नोति० इस मन्त्रसे कहा है, भृश कृष्णवर्णका और इसका मन्त्र भद्रं कर्णेभिः० यह कहा है ॥ ७२ ॥ अन्तरिक्ष कृष्णवर्णका और वयंसोम० यह उसका मन्त्र कहा है, वायु धूम्रवर्णका और आवायो०

---

१ सुत्रामाणं पृथिवीं द्यामनेहस ꣳ सुशर्माणमदितिꣳ सुप्रणीतिम् । दैवीं नावꣳ स्वरित्रामनागसमस्रवन्तीमारुहेमा स्वस्तये ॥ २ तमीशानं जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् । पूषानो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ३ महाँ २ इन्द्रो नृवृदाचर्षणिप्रा उतद्विबर्हा अमिनः सहोभिः । अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुःसुकृतः कर्तृभिर्भूत् । उपयाम गृहीतोसि महेन्द्राय त्वैषते योनिर्महेन्द्राय त्वा ॥ ४ धन्वना गा धन्वनाजिꣳयेम धन्वना तीव्राः समदो जयेम । धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥ ५ महाँ २ इन्द्रो वज्रहस्तः षोडशी शर्म यच्छतु । हन्तु पाप्मानं योऽस्मान्द्वेष्टि । उपयाम गृहीतोसि महेन्द्राय त्वैषते योनिर्महेन्द्राय त्वा ॥ ६ सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ२ अजस्रम् । तस्य पूषा प्रसवे याति विद्वान्त्संपश्यन्विश्वा भुवनानि गोपाः ॥ ७ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् । दक्षिणाश्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥ ८ भद्रङ्कर्णेभिः शृणुयामदेवाभद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमदेवहितं यदायुः ॥ ९ वयꣳसोमव्रतेतवमनस्तनूषु बिभ्रतः । प्रजावन्तस्सचेमहि ॥ १० आवायो भूषशुचिपा उपनः सहस्रंते नियुतो विश्ववार । उपाते अन्धोमदयमयामि यस्य देव दधिषे पूर्वपेयं वायवे त्वा ॥

यह उसका मंत्र कहा है ॥ ७३ ॥ पूषा रक्तवर्णका और पूषन्तव० यह उसका मंत्र कहा है, वितथ शुक्लवर्ण सविता प्रथम० यह उसका मन्त्र कहा है ॥ ७४ ॥ गृहक्षत पीतवर्णका सवितात्वा० यह उसका मन्त्र कहा है और यम दक्षिणमें कृष्णशरीर यमाय त्वा मखाय० इस मंत्रसे कहा

पूषा च रक्तवर्णश्च पूषन्तव इतीरितः । शुक्लवर्णश्च वितथ सविता प्रथमेति च ॥ ७४ ॥ गृहक्षतः पीतवर्णः सविता त्वेति मन्त्रतः ।
यमः कृष्णवपुर्याम्ये यमाय त्वा मखाय च ॥ ७५ ॥ गन्धर्वो रक्तवर्णश्च पृतद्वो वेति मन्त्रतः । भृङ्गराजः कृष्णवर्णो मृत्युः सुप
र्णेति वा तथा ॥ ७६ ॥ मृगः पीतश्च तद्विष्णोर्मन्त्रेण निर्ऋतिस्थितः । पितृगणा रक्तवर्णाः पितृभ्यश्चेति पूजयेत् ॥ ७७ ॥
दौवारिको रक्तवर्णो द्रविणोदाः पिपीषति । शुक्लवर्णश्च सुग्रीवः सुषुम्नः सूर्यरश्मिना ॥ ७८ ॥

है ॥ ७५ ॥ गन्धर्व रक्तवर्णका और पृतद्वोवः० इस मन्त्रसे कहा है, भृंगराज कृष्णवर्णका (मृत्युः) सुपर्ण० इस मंत्रसे कहा है ॥ ७६ ॥ मृग पीतवर्णका तद्विष्णोः० इस मंत्रसे नैर्ऋत दिशामें स्थित है पितरोंके गण रक्तवर्णके पितृभ्यश्च० इस मन्त्रसे पूजित करने ॥ ७७ ॥ दौवारिक रक्तवर्ण

१ पूषन्तवव्रते वयं नरिष्येम कदाचन । स्तोतारस्त इहस्मसि ॥ २ सविता प्रथमेहन्नग्निर्द्वितीयो वायुस्तृतीय आदित्यश्चतुर्थे चन्द्रमाः पञ्चमः ऋतुःषष्ठ मरुतः सप्तमे बृहस्पति रष्टमे । मित्रो नवमे वरुणो दशम इन्द्र एकादशे विश्वेदेवा द्वादशे ॥ ३ सवितात्वासवाना सुवतामग्निर्गृहपतीना सोमो वनस्पतीनाम् । बृहस्पतिर्वाच इन्द्रोज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रस्सत्यो वरुणो धर्मपतीनाम् ॥ ४ यमायत्वा मखायत्वा सूर्यस्य त्वा तपसे । देवस्त्वा सविता मध्वानक्तु पृथिव्याःस स्पृशस्पाहि । अर्चिरसि शोचिरसि तपोसि ॥ ५ प्रत द्विष्णुस्तवते वीर्याय । ६ सुपर्णः पार्जन्य आतिवाहसोदर्विदाते वायवे बृहस्पतये वाचस्पतये पङ्क्तराजोलज आन्तरिक्षःप्लवोमद्गुर्गुर्मत्स्यस्तेनदीपतये द्यावापृथिवीयः कूर्मः॥ ७ तद्विष्णोः परमं पद सदा पश्यंति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवा सस्समिन्धते । विष्णोर्यत्परमं पदम् ॥ ८ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः । अक्षन्पितरोऽमीमदन्त पितरोतीतृपन्तपितरः पितरः शुन्धध्वम् ॥ ९ द्रविणोदाः पिपीषति जुहोत प्रचतिष्ठत । नेष्टादृतुभिरिष्यत ॥ १० सुषुम्णस्सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयोनाम । सनइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहावाट् ताभ्यः स्वाहा ॥

द्रविणोदाः पिपीषति० यह उसका मन्त्र कहा है सुग्रीव शुक्लवर्ण सुषुम्नः सूर्यरश्मि० इस मंत्रसे पूजित करना ॥ ७८ ॥ पुष्पदन्त रक्त वर्ण नक्षत्रेभ्यः० इस मन्त्रसे पूजित करना, वरुण शुक्ल इतरो मित्रावरुणाभ्यां० इस मन्त्रसे पूजित करना ॥ ७९ ॥ आसुर पीतरक्त ये रूपाणि०

पुष्पदन्तो रक्तवर्णो नक्षत्रेभ्येति मन्त्रतः । वरुणः शुक्ल इतरो मित्रोस्य वरुणास्यतः ॥ ७९ ॥ आसुरः पीतरक्तश्च येरूपाणीति मन्त्रतः । शोकः कृष्णवपुर्मन्त्रमसवेस्वाहेत्यावाहयेत् ॥ ८० ॥ पापयक्ष्मा पीतवर्णः सूर्यरश्मीति मन्त्रतः । रक्तवर्णस्तथा रोगः शिरो मे इतिकोणके ॥८१॥ द्विपदोऽहिर्वायुकोणे रक्तो नमोऽस्तु सर्पेभ्यश्च । मुख्यो रक्तवपुः कार्य इषेत्वा इति पूजयेत् ॥ ८२ ॥

इस मन्त्रसे पूजित करना, शोक कृष्णवर्णका उसका असवे स्वाहा इस मंत्रसे आवाहन करे ॥ ८० ॥ पापयक्ष्मा पीतवर्णका सूर्य रश्मि० इस मन्त्रसे पूजित करना, कोणमें स्थित रोग रक्तवर्ण है उसकी पूजा शिरो मे० इस मन्त्रसे करनी ॥ ८१ ॥ वायु कोणमें द्विपद रक्त उसकी पूजाका

१ नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यस्स्वाहाहोरात्रेभ्यः स्वाहार्धमासेभ्यः स्वाहा मासेभ्यः स्वाहाऋतुभ्यः स्वाहार्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्या* स्वाहा चन्द्राय स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहादित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥ २ मित्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्रायत्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राग्निभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राबृहस्पतिभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राविष्णुभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि ॥ ३ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । परापुरोनिपुरो ये भरन्त्यग्निष्टाल्लोकात्प्रणुदात्यस्मात् ॥ ४ असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा गण श्रि ये स्वाहा गणपतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा शूराय स्वाहा स* सर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवापतये स्वाहा ॥ ५ सूर्यरश्मि र्हरिकेशः पुरस्तात्सविताज्यौतिरुदयाः अजस्रम् । तस्य पूषा प्रसवे याति विद्वान्त्संपश्यन्विश्वाभुवनानि गोपाः ॥ ६ शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि । राजा मे प्राणो अमृत* सम्राट्चक्षुर्विराट्श्रोत्रम् ॥ ७ नमोस्तु सर्पेभ्यो ये* केच पृथिवीमनु । ये अन्तरिक्षे ये दिवितेभ्यः सर्पेभ्यो नमः ॥ ८ इषेत्वोर्जेत्वावायवस्थदेवोवः सवितात्प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्न्या इन्द्रायभागं प्रजावतीरनमीवा अयक्ष्मामावस्तेन ईशतमाघशं* सोध्रुवा अस्मिन्गोपतौ स्यातबह्वीर्यजमानस्य पशून्पाहि ॥

मंत्र नमोस्तु सर्पेभ्यः० यह हु मुख्य रक्तशरीर बनाना और इषेत्वा० इस मंत्रसे पूजना ॥ ८२ ॥ भल्लाटक कृष्णवर्ण बण्महां असि० इस मंत्रसे पूजना । श्वेतवर्णका सोम उत्तरमें स्थित होता है उसका वयं सोम० इस मंत्रसे पूजन करना ॥ ८३ ॥ सर्प कृष्णवर्णका उसका उदुत्यं जातवेदसं० इस मंत्रसे पूजन करना । अदिति पीतवर्णकी उसकी उतनोहिर्बुध्न्य० इस मंत्रसे पूजा करनी ॥ ८४ ॥ दिति पीतवर्णकी उसकी पूजा अदितिर्द्यौ० इस मंत्रसे ईशानकोणमें करनी. ईशान आदि क्रमसे ही इनका स्थापन और पूजन अपने अपने

भल्लाटकः कृष्णवर्णो बण्महाँऽसि मन्त्रततः । सोमः श्वेतश्चोत्तरे च वयंसोमेति मन्त्रतः ॥ ८३ ॥ सर्पः कृष्णवपुः पूज्य उदुत्यं जातवेदसम् । अदितिः पीतवर्णा तु उतनोऽहिर्बुध्न्यमन्त्रतः ॥ ८४ ॥ दितिः पीता अदितिर्द्यौर्मन्त्रेणेशानकोणके । ईशानादि क्रमेणैव स्थाप्याः पूज्याः स्वमन्त्रतः ॥ ८५ ॥ नाममन्त्रेण वा स्थाप्याः पूज्याश्चैव यथाक्रमम् । भूर्भुवः स्वेति मन्त्रेण प्रणवाद्येन नावकैः ॥ ८६ ॥ ईशाने चरकी स्थाप्या धूम्रवर्णाथ बाह्यगाः । ईशावास्येति मन्त्रेण स्थाप्याः पूज्याः प्रयत्नतः ॥८७॥ विदारिका रक्तवर्णा अग्निर्दूतेति मन्त्रतः । पूतना पीतहरिता नमः स्वस्त्ययाय मंत्रतः ॥ ८८ ॥

मंत्रसे करना ॥ ८५ ॥ अथवा नाममंत्रसेही स्थान पूजन क्रमसे करना अथवा ॐकार है आदिमें जिनके ऐसे भूर्भुवः स्वः इस मंत्रसे नाम ले लेकर पूजन करना ॥ ८६ ॥ रेखाओंसे बाह्य देशमें ईशानकोणके विषे चरकी स्थापन कर और उसका स्थापन और पूजन बडे यत्नसे ईशावास्य० इस मंत्रसे करे ॥ ८७ ॥ विदारिका रक्तवर्ण उसका अग्निन्दूतम्० इस मंत्रसे पूजन करे, पूतना पीली और हरितवर्णकी उसका

१ बण्महाँ २ असि सूर्यस्यबडादित्यमहा ३ असि । महांस्ते सतो महिमापनस्यतेद्वा देवमहाँ २ असि ॥ २ वय ४ सोमवते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥ ३ उदुत्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्य ५ स्वाहा ॥ ४ उतनोहिर्बुध्न्यः शृणोत्वजएकपात्पृथिवी समुद्रः । विश्वेदेवा ऋतावृधो हुवानास्तुता मन्त्राः कविशस्ता अवन्तु ॥ ५ अदितिर्द्यौरन्तरिक्षमदितिर्माता सपितासपुत्रः । विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम् ॥

नमस्तुत्याय० इस मंत्रसे पूजन करे ॥ ८८ ॥ पापराक्षसी कृष्णवर्णकी उसके पूजन वायव्यैः इस मंत्रसे करे और बहिर्देशमें पूर्वआदि क्रमसे उसके अनन्तर पूजन करे ॥ ८९ ॥ स्कन्धघटी रक्त और कृष्णवर्ण एह्यत्रमय० इस मंत्रसे पूजित करनी, अर्यमा दक्षिणमें कृष्णवर्णकी अर्यम्णा च बृहस्पति० इस मंत्रसे दक्षिण दिशामें पूजित करना ॥ ९० ॥ पश्चिममें रक्त वर्णका जम्भक कहा है उसका पूजन सरोभ्यो भैरवं० इस मंत्रका उच्चारण करके करे ॥ ९१ ॥ पिलिपिच्छिक पीत वर्णका उसका पूजन कारंभमर० इस मंत्रसे करे, ईशानमें भीमरूप रक्त वर्णका उसका

पापराक्षसी कृष्णाभा वायव्यैरिति मन्त्रतः । बहिरेव च पूर्वादिक्रमेण च ततोऽर्चयेत् ॥ ८९ ॥ रक्तकृष्णस्कन्धघटी एह्यत्र मयमंत्रतः। अर्यमा दक्षिणे कृष्ण अर्यम्णा च बृहस्पतिः॥९०॥पश्चिमे रक्तवर्णस्तु जम्भकः परिकीर्तितः । सरोभ्यो भैरवं मंत्रं समुच्चार्य प्रपूजयेत् ॥ ९१ ॥ पिलिपिच्छिकः पीतवर्णः कारम्भमरेति मंत्रतः । भीमरूपस्तथेशाने यमाय त्वेति रक्तकः ॥९२॥ त्रिपुरारिः कृष्णवर्णरुयंबके त्वग्निकोणके । अग्निजिह्वस्तु नैर्ऋत्य असुन्वंतेति पीतकः ॥ ९३ ॥ कराला रक्तवर्णा तु वातोहत्वाहणास्थितः । हेतुकः पूर्वदिक्कृष्णो हेमन्ते ऋतुना तथा ॥ ९४ ॥ अग्निवेतालके याम्ये कृष्णोऽग्निं दूतमित्यपि । कालाख्यः पश्चिमे कृष्णो वरुणस्योत्तंभनं तथा ॥ ९५ ॥ एकपादः पीतवर्णः कुविदङ्गेति चोत्तरे । ईशानपूर्वयोर्मध्ये गन्धमाल्यश्च पीतकः ॥ ९६ ॥

पूजन यमायत्वा० इस मंत्रसे करे ॥ ९२ ॥ त्रिपुरारि कृष्णवर्ण है उसका त्र्यम्बक० इस मंत्रसे अग्निकोणमें पूजन करे, नैर्ऋत्में पीतवर्णका अग्निजिह्व उसका पूजन 'असुन्वन्त०' इस मंत्रसे करे ॥ ९३ ॥ कराल रक्त वर्ण उसका पूजन'वातोहत्वाहणास्थितः०'इस मंत्रसे करे हेतुक पूर्व दिशामें कृष्णवर्णका उसका पूजन ' हेमन्ते ऋतुना०' इस मन्त्रसे करे ॥ ९४ ॥ अग्निवेताल दक्षिण दिशामें उसका पूजन दक्षिणदिशामें अग्निंदूतम्०

१ वायव्यैर्वायव्यान्याप्नोति सतेन द्रोणकलशम्। कुम्भीभ्यामम्भृणौ सुतेस्थालीभिः स्थलीराप्नोति ॥

इस मन्त्रसे करे, काल पश्चिम दिशामें कृष्णवर्णका उसका 'वरुणस्योत्तम्भनमसि०' इस मंत्रसे पूजन करे॥ एकपाद उत्तरमें पीतवर्णका उसका 'कुविदंग' इस मंत्रसे पूजन करे, ईशान और पूर्व दिशाके मध्यमें पीत वर्णका गन्धमाल्य होता है॥ ९५॥ ९६॥ उसका पूजन अन्तरिक्षमें 'गंधद्वारा०' इस मंत्रसे करे नैर्ऋति दिशामें बुद्धिके मध्यमें स्थित श्वेतरूपधारी ज्वालास्य है॥ ९७॥ विधिसे उसका पूजन 'महीद्यौः०' इस मंत्रसे करे जो बाह्य देवता कहे हैं उनके पूजन प्रासादमें करै॥ ९८॥ दुर्ग और देवालय और शल्योद्धारमें विशेषकर पूजन करे और चतुष्षष्टि हैं पद

गंधद्वारेति मन्त्रेण पूज्यमानोऽन्तरिक्षके। नैर्ऋत्यां बुद्धिमध्यस्थो ज्वालास्यः श्वेतरूपधृक्॥ ९७॥ महीद्यौरितिमंत्रेण पूजनीयो विधानतः। या बाह्यदेवताः प्रोक्ता प्रासादे ताः प्रपूजयेत्॥९८॥ दुर्गे देवालये चैव शल्योद्धारे तथैव च। विशेषेणैव पूज्याश्च चतुःषष्टिपदं तथा॥९९॥ कलशे स्थापयेदेव वरुणं वरुणौ ततः। कलशं पूरयेत्तीर्थवारिणा सर्वबीजकैः॥ १००॥ सर्वौषधैः सर्व रत्नगन्धैश्च विविधैस्तथा। पल्लवैः पञ्चकाषायैर्मृदा शुद्धोदकेन वा॥ १०१॥ ग्रहाणां पूजनं तत्र कारयेद्वेदिकोपरि। मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम्॥ १०२॥ शुंठी चम्पकमुस्ता च सर्वौषधिगणः स्मृतः। अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधसंभवाः॥ १०३॥

जिसमें ऐसे वास्तुकोभी बनावे॥ ९९॥ कलशके विषे वरुणदेवका स्थापन करै और उस कलशको तीर्थके जल और सर्व बीजोंसे पूरित करै॥ १००॥ सर्वौषधि सर्वरत्न और अनेक प्रकारके गन्ध पंच कषाय और पल्लव और मिट्टी इनसे पूर्ण करे वा शुद्ध जलसे पूर्ण करे॥१०१॥वह वेदीके ऊपर ग्रहोंका पूजन करै मुरा जटामांसी वच कूट चंदन दोनों हलदी॥ १०२॥ शुंठी चम्पा नागरमोथा यह सर्वौषधियोंका गण कहा है.

१ कुविदङ्गयवमंतो यवश्चित्र्यथादान्त्यनुपूर्वं वियूय। इहेहैषां कृणुहि भोजनानि ये बर्हिषो नम उक्तिं यजन्ति। उपयामगृहीतोस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे॥
२ शठी इतिपाठान्तरे (कपूरकाचरी) इति भाषार्थः।

पीपल गूलर पिलखन आम्र और वड इनमें उत्पन्नहुए ॥ १०३ ॥ पंचपल्लव कहे हैं. ये सब कर्मोंमें श्रेष्ठ होते हैं. तुलसी सहदेवी विष्णुक्रान्ता शतावर ॥ १०४ ॥ यदि सौ औषधि न मिलैं तो इन मूलोंको ग्रहण करे. वड गूलर बेंत ॥ १०५ ॥ अश्वत्थ (पीपल) और मूल ये पंच कषाय कहे हैं. अश्वस्थान गजस्थान बमई दो नदियोंका संगम ॥ १०६ ॥ राजद्वारका प्रवेश इनसे मिट्टी मँगाकर कलशमें डारे. संपूर्ण समुद्र नदी तलाव और जल देनेवाले नद ॥ १०७ ॥ ये सब यजमानके पापनाशक कलशमें आओ ॥ १०८ ॥ और कलशमें शिखी आदि पैंतालीस

पञ्चभंगा इमे प्रोक्ताः सर्वकर्मसु शोभनाः । तुलसी सहदेवी च विष्णुक्रांता शतावरी ॥ १०४ ॥ मूलान्येतानि गृह्णीयाच्छतालाभे विशेषतः । वटीर्वटोदुम्बरस्य वेतसस्य तथैव च ॥ १०५ ॥ अश्वत्थश्चैव मूलश्च पञ्चकापायकाः स्मृताः । अश्वस्थानाद्गजस्थाना द्वल्मीकात्सङ्गमाद्धृदात् ॥१०६॥ राजद्वारप्रवेशाच्च मृदमानीय निक्षिपेत् । सर्वे समुद्राः सरितः सरांसि जलदा नदाः ॥१०७॥ आयान्तु यजमानस्य दुरितक्षयकारकाः ॥१०८॥ शिख्यादिपञ्चचत्वारिंशद्देवांस्तत्र प्रपूजयेत् ॥१०९॥ वेदमन्त्रैर्नाममन्त्रैः प्रणव व्याहृतिभिस्तथा । होमस्त्रिमेखले कार्यः कुण्डे हस्तप्रमाणके ॥ ११० ॥ यवैः कृष्णतिलैस्तद्वत्समिद्भिः क्षीरवृक्षकैः । पालाशैः खादिरैर्वापामार्गोदुम्बरसंभवैः ॥ १११ ॥ कुशदूर्वामयैर्वापि मधुसर्पिःसमन्वितैः । कार्यस्तु पञ्चभिर्बिल्वैर्बिल्वैर्बीजैरथापि वा ॥ ११२ ॥ होमान्ते भक्ष्यभोज्यैश्च वास्तुदेशे बलिं हरेत् । नमस्कारान्तयुक्तेन प्रणवाद्येन सर्वतः ॥ ११३ ॥

४५ देवोंका पूजन करै ॥ १०९ ॥ वह पूजन वेदके मंत्र वा नामके मंत्र ॐकार वा व्याहृतियोंसे करना और हस्तभर प्रमाणके तीन मेखला वाले कुण्डमें होम करना ॥ ११० ॥ जौ कालेतिल समिध और क्षीरवृक्ष पालाश खदिर अपामार्ग गूलर इनसे होम करै ॥ १११ ॥ अथवा सहत मिलीहुई कुशा और दूबसे घृत मिलाकर करै अथवा पांच बेल वा बेलकी बीजोंसे करैं ॥ ११२ ॥ होमके अन्तमें भक्ष्य और भोज्योंसे

वास्तुदेशमें, नमस्कार जिसके अन्तमें ॐकार जिसकी आदिमें हो ऐसे मन्त्रसे बलिको दे ॥ ११३ ॥ क्रमसे वेदोक्तमंत्रोंसे देवताओंका पूजनकरै फिर व्याहृतियोंसे होम करै और स्विष्टकृत् होमको करै ॥ ११४ ॥ फिर पूर्णाहुतिका हवन करै और संस्रवका प्राशन अर्थात् स्रुवेके घीका भक्षण करै और विधिसे वास्तुमण्डलदेवताओंको बलि दे ॥ ११५ ॥ शिखिको घृतान्न दे, पर्जन्यको घृतान्न और कमलकी बलि दे फिर जयन्त आदि वास्तुमण्डलदेवताओंको बलि दे ॥ ११६ ॥ कुलिशायुधको पंचरत्न और पुष्टिके पदार्थ दे सूर्यको कुशा और धूम्र रक्त चंदोवा

वेदोक्तैनैव मन्त्रेण संपूज्या देवताः क्रमात् । ततो व्याहृतिभिर्होमः स्विष्टकृद्धोममेव च ॥११४॥ पूर्णाहुतिञ्च जुहुयात्संस्रवप्राशनं ततः । वास्तुमण्डलदेवेभ्यो बलिं दद्याद्विधानतः ॥ ११५ ॥ घृतान्नं शिखिने दद्यात्पर्जन्याय च सोत्पलम् । जयन्तादिवास्तुमण्डलदेवेभ्यो बलिं ततः ॥ ११६ ॥ कुलिशायुधाय पञ्चरत्नं पौष्टिकसंभवम् । कौशं सूर्याय धूम्ररक्तविनापूपसक्तवैः ॥ ११७ ॥ सत्याय घृतगोधूमं मत्स्यान्नञ्च भृशाय च। अन्तरिक्षाय शष्कुली मांसं वापि च शाकुनम् ॥११८॥ वायसे सक्तवः प्रोक्ताः पूष्णे लाजाः स्मृता बुधैः । वितथाय चणकान्नं मध्वन्नं च गृहक्षते ॥११९ ॥ यमाय पिशितान्नं तु गन्धर्वाय गन्धौदनम्। भृंगराजाय मेषस्य जिह्वायाश्च बलिं हरेत्॥१२०॥मृगाय यावकं दद्याद्बलिं नीलपदस्तथा॥पितृभ्यः कृशरान्नं च तथा दौवारिकाय च॥१२१॥

अपूप और सत्तु दे ॥ ११७ ॥ सत्यको घी और गेहूं दे. भृशको मत्स्य और अन्न दे. अन्तरिक्षको शष्कुलि (पूरी) और पक्षियोंका मांस दे ॥ ११८ ॥ वायसको सत्तु और पूषाको लाजा (खील) बुद्धिमान् मनुष्योंने कही हैं. वितथको चणकान्न, गृहक्षतको मध्वन्न दे ॥ ११९ ॥ यमको पिशितान्न (मांस) गन्धर्वको गन्धौदन, भृंगराजको मेंढेके जिह्वाकी बलि दे ॥ १२० ॥ मृगको और नीलपदको जौकी बलि दे,

पितर और दौवारिकको कृशरान्न (खिचडी) की बलि दे ॥ १२१ ॥ सुग्रीवको दतोन कृष्णचूर्ण दंतकाष्ठ पूडे और जौ इनकी बलि दे ॥ १२२ ॥ पुष्पदन्त और वरुणको पायस (खीर) की बलि दे. और यमकी कुशाका स्तंभ पीठी और सुवर्णकी बलि दे ॥ १२३ ॥ असुरको मदिराकी बलि, शोषको घृतौदनकी बलि कही है. पापयक्ष्माको गोहकी और रोगको घी और ओदनकी बलि दे ॥ १२४ ॥ अहिको फल पुष्प नागकेसरकी बलि दे. मुख्यको घी और गेहूंकी, भल्लाटको मूंगओदनकी बलि दे ॥ १२५ ॥ सोमको पायस और घीकी, नागको पुष्टिके

दन्तकाष्ठं कृष्णपिष्टं दन्तधावनमेव च ॥ सुग्रीवाय अनूपं च यावकं तु तथैव च ॥ १२२ ॥ पुष्पदन्ताय पायसं वरुणाय तथैव च । कुशस्तम्भं च यमं च पैष्टं हैरण्मयं तथा॥१२३॥असुराय सुरा प्रोक्ता शोषाय च घृतौदनम्।गोधाया वै यक्ष्मणे च रोगाय घृतमोदनम् ॥ १२४ ॥ अहये फलपुष्पाणि नागकेशर इत्यपि । मुख्याय घृतगोधूमं भल्लाटे मुद्गमोदनम् ॥ १२५ ॥ सोमाय पायसघृतं नागे पौष्टिकशालकम् । अदित्यै पोलिका दित्यै पूरिकाया बलिः स्मृतः ॥१२६॥ अद्भ्योऽपि क्षीरं च तथा सवित्रे च कुशौदनम् । लड्डुकामरिचञ्चैव जयाय घृतचन्दनम् ॥१२७॥ रुद्राय पायसगुडमर्यम्णे शर्करान्वितम् । पायसं च सवित्रे तु गुडापूपबलिः स्मृतः ॥१२८॥ विवस्वते तथा देयं रक्तचन्दनपायसम् । इन्द्राय सघृतं देयं हरितालौदनं तथा ॥ १२९ ॥

पदार्थ और शालियोंकी, अदितिको पोलियोंकी अर्थात् रोटियोंकी, दितिको पूरियोंकी बलि कही हैं ॥ १२६ ॥ जलको दूध, सविताको कुशौदन देना, जयको लड्डू और मिर्च, घृत और चंदन ॥ १२७ ॥ रुद्रको दे पायस और गुड अर्यमाको, और खांड मिला हुआ पायस भी अर्यमाको दे और सविताको गुड और अपूपोंकी बलि कही है ॥ १२८ ॥ विवस्वान्को रक्तचन्दन और पायसकी बलि दे और इन्द्रको घी

सहित हरिताल और ओदनकी बलि दे ॥ १२९ ॥ मित्रको घृतौदन कच्चे मांस और सहतकी बलि दे. राजयक्ष्मा पृथ्वीधर और मितौजस इनको ॥ १३० ॥ मांस कूष्माण्डकी बलि दे. आपवत्सको दधिकी बलि दे. ब्रह्माको पंचगव्य जौ तिल अक्षत दधि इनकी बलि दे ॥ १३१ ॥अनेक प्रकारके भक्ष्य भोज्य और अनेक प्रकारके फल संपूर्ण देवताओंको दे. इस पूर्वोक्त रीतिसे भली प्रकार बलि देकर संपूर्ण देवताओंको सुवर्ण दे॥१३२॥ य संपूर्ण ॐकार जिनकी आदिमें और चतुर्थीविभक्ति जिनके अन्तमें ऐसे नाममंत्रोंसे मंत्रके ज्ञाताको देने और सब देवताओंको सुवर्ण देना

घृतौदनं च मित्राय आममांसमधुस्तथा । राजयक्ष्मणे च पृथ्वीधराय च मितौजसे ॥१३०॥ मांसानि कूष्माण्डमिति आपवत्साय वै दधि । ब्रह्मणे पञ्चगव्यं च यवं तिलाक्षतं दधि ॥ १३१ ॥ विविधान्भक्ष्यभोज्यांश्च फलानि विविधानि च । यवं दत्त्वा बलिं सम्यग्दद्यात्तेभ्यो हिरण्मयम् ॥ १३२ ॥ प्रणवाद्यैश्चतुर्थ्यन्तैर्नाममन्त्रेण मन्त्रवित् । सर्वेभ्योऽपि हिरण्यं च ब्रह्मणे गां पयस्विनीम् ॥ १३३ ॥ अथवा पायसं दद्यात्सर्वेभ्यश्च सदीपकम् । ततो बाह्यस्थितानां तु बलिं दद्याद्विधानतः ॥ १३४ ॥ चरक्यै मापभक्तं च सघृतं पद्मकेशरम् । हविश्चैव तथाग्नेये वितानकविदारिके ॥ १३५ ॥ मापभक्तं सरुधिरं हरिद्राभक्तमेव च । नैर्ऋत्यां च पूतनायै मापभक्तेन संयुतम् ॥१३६॥ रुधिरास्थिपीतरक्तं बलिं देव्यै निवेदयेत् । वायव्ये पापराक्षस्यै मत्स्यमांसं सुरासवम्॥१३७॥

और ब्रह्माको दूध देतीहुई गौको दे ॥ १३३ ॥ अथवा सब देवताओंको दीपक सहित पायस दे फिर विधिसे बाह्यमें स्थित देवताओंको बलि दे ॥ १३४ ॥ चरकीको उडदोंका भक्त और घीसहित पद्मकेशर और हवि दे और अग्निकोणमें विदारिकाको चन्दोवा ॥ १३५ ॥ माष भक्त रुधिर और हरिद्राभक्त दे और नैर्ऋतमें पूतनाको माषभक्तसे मिलेहुए ॥ १३६ ॥ रुधिर अस्थि और पीत रक्तकी बलि निवेदन करै और

ततः प्रागादितो दिक्षु स्कन्दाय रुधिरं सुरा । अर्यम्णे माषभक्तं च दक्षिणे विनिवेदयेत् ॥ १३८ ॥ जंभकाय तथा मांसं रुधिरं पश्चिमे न्यसेत् । पिलिपिच्छकायोत्तरे च असृग्यमबलिः स्मृतः ॥ १३९ ॥ इत्येतेषां देवतानां बलिं दद्याद्विधानतः । प्रासादादौ तथैतेषां बलिं दद्यात्प्रयत्नतः ॥ १४० ॥ भीमरूपाय ईशाने कपोतकसुरा बलिः । वसारुधिरमांसानां कृशरायास्तथैव च ॥१४१॥ आग्नेयादितिसन्धारी त्रिपुरान्तकरूपधृक् । अग्निजिह्वस्तु नैर्ऋत्ये दुग्धं सैन्धवसंयुतम् ॥ १४२ ॥ मांसं च रुधिरं देयं तस्मै दिक्पालिने नमः । करालिके पक्वमांसं रुधिरं सैन्धवं पयः ॥ १४३ ॥ हेतुके पूर्वदिग्भागे बलिः स्यात्पायसं ह्यसृक् । अग्निवैतालिके याम्ये रुधिरं मांसमेव च ॥१४४॥ कालाख्ये पश्चिमे दद्याद्बलिं मांसौदनस्य च । एकपादे उत्तरस्यां कृशराया बलिस्तथा॥१४५॥

वायव्यमें पापराक्षसीको मत्स्यका मांस और सुरासवका निवेदन करै ॥ १३७ ॥ फिर पूर्व आदि दिशाओंमें स्कन्दको रुधिर और सुरा दे, दक्षिणमें अर्यमाको माषभक्त निवेदन करै ॥ १३८ ॥ पश्चिममें जंभकको मांस और रुधिर दे. उत्तरमें पिलिपिच्छको रुधिरको बलि कही है ॥ १३९ ॥ इन पूर्वोक्त देवताओंको विधिसे बलि दे और तिसीप्रकार प्रासाद आदिमें इनको भलीप्रकार बलि दे ॥ १४० ॥ ईशानमें भीम रोगको कपोत और सुराकी बलि दे और वसा रुधिर मांस और कृशर अन्नकी बलिभी दे ॥ १४१ ॥ आग्नेयमें अदिति सन्धारि त्रिपुरान्तक रूपधृक् और नैर्ऋतमें अग्निजिह्वको सैन्धव मिले दूधकी बलि दे ॥ १४२ ॥ और मांस रुधिरको बलि उस दिक्पालको नमस्कार है यह कह कर दे. करालिकको पकायाहुआ मांस रुधिर सैन्धव और दूधकी बलि दे ॥ १४३ ॥ हेतुकको पूर्वदिशामें पायस और रुधिरकी बलि होती है, अग्नि वैतालिकको दक्षिणमें रुधिर मांसकी बलि है ॥ १४४ ॥ पश्चिममें कालाख्यको मांसौदनकी बलि दे, उत्तरमें

एकपादको कृशराकी बलि दे ॥ १४५ ॥ अग्नि और पूर्वके मध्यमें वितानकको गन्धमाल्य दे नैर्ऋत और पश्चिमके मध्यमें ज्वालास्य देवता कहा है ॥ १४६ ॥ उसको दही अक्षतोंसे युक्त मोदकोंको दे, दिक्पालोंको बलि देकर फिर क्षेत्रपालको आगमोक्तमंत्र वा वेदोक्त मंत्रसे बलि दे ॥ १४७ ॥ क्षेत्रपालकी बलिका मंत्र यह है कि, भगवान क्षेत्रपालको नमस्कार है और तेतीसकोटिदेवताओंके अधिपतिको और भारके जेताको प्रकाशमान् त्रिनेत्रको अपने अंगमें किंकिणी ज्वालामुख भैरवको तुरु मुरुमुरुललषषषषकेंकार दुरित दिङ्मुख

आग्नेयपूर्वयोर्मध्ये गन्धमाल्यैर्वितानकम्।नैर्ऋत्यपश्चिमान्तस्थौ ज्वालास्यः पार्वकीर्तितः॥१४६॥ तस्मै दध्यक्षतयुतमोदकानि च दापयेत् । दिक्पालानां बलिं दत्त्वा क्षेत्रपालबलिं ततः॥१४७॥आगमोक्तेन मन्त्रेण वेदमंत्रेण वै तथा॥नमो भगवते क्षेत्रपालाय त्रय स्त्रिंशत्कोटिदेवाधिदेवाय निर्जितभाराय भासुरित्रिनेत्राय स्वांगकिङ्किणिज्वालामुखभैरवरूपिणे तुरुमुरुमुरुललषषषषकेङ्कादुरित दिङ्मुखमहाबाहो अद्यकर्तव्ये वास्तुकर्मणि अमुकं यजमानं पाहिपाहि आयुष्कर्ताक्षेमकर्ताभव अमुं पशुदीपसहितंमुण्डमाषभक्त बलिं गृह्णगृह्ण स्वाहा॥१४८॥इति बलिं दत्त्वा॥नैर्ऋत्यां दिशिभूतेभ्यो सन्ध्याकालेविशेषतः।बलिं दद्याद्विधानेन मन्त्रविन्नक्तभुग्यमी। पुरोहितस्तथा याज्यं गुडोदनमथापि वा॥१४९॥कुल्माषेण तु सम्मिश्रैर्यावकापूपसंयुतैः। बहुपक्वान्नसंयुक्तैर्बालक्रीडनकैस्तथा॥१५०॥

रूप हे महाबाहो ! आज करने योग्य वास्तुकर्ममें अमुक नाम यजमानकी रक्षा करो, आयुका कर्ता कुशलका कर्ता और दीपक सहित इस पशुको और माषभक्त बलिको ग्रहण करो स्वाहा० इस मन्त्रसे क्षेत्रपालको बलि देकर ॥ १४८ ॥ सन्ध्याके समयमें नैर्ऋत्य दिशामें भूतोंको शास्त्रोक्त विधानसे बलिको मन्त्रका ज्ञाता दे और रात्रिमें भोजन करै संयमसे रहै. पुरोहित यजमान गुडौदन ॥ १४९ ॥ कुल्माष (रनास जिसमें मिलाहो) ऐसे जो अपूप और बहुतसे पक्वान्न जिनमें हों और बालकोंको खिलोने ॥ १५० ॥

फलैश्च दाडिमीबीजैः कालपुष्पैर्मनोरमैः । मात्राननाशनमिता बलिकर्मणि चोदिताः ॥१५१॥ मन्त्राः—देव्यो देवा मुनीन्द्रास्त्रिभुवनपतयो दानवाः सर्वसिद्धा यक्षा रक्षांसि नागा गरुडमुखखगा गुह्यका देवदेवाः । डाकिन्यो देववेश्या हरिदधिपतयो मातरो विघ्ननाथाः प्रेता भूताः पिशाचाः पितृवननगराद्याधिपाः क्षेत्रपालाः ॥ १५२ ॥ गन्धर्वाः किन्नरास्सर्वे जटिलाः पितरो ग्रहाः । कूष्माण्डाः पूतना रोगा ज्वरा वैतालिकाः शिवाः ॥ १५३ ॥ असृक्प्लुताश्च पिशुना भक्षमांसास्त्वनेकशः । लम्बक्रोडास्तथा ह्रस्वा दीर्घाः शुक्लास्तथैव च ॥१५४॥ खञ्जाः स्थूलास्तथैकाक्षा नानापक्षिमुखास्तथा । व्यालास्या उष्ट्रवक्त्राश्च अवक्राः क्रोडवर्जिताः ॥१५५॥ धमनाभास्तमालाभा द्विपाभा मेघसन्निभाः । बगलाभाः क्षितिनिभा अशनिस्वनसन्निभाः ॥ १५६ ॥

फल अनारके बीज और मनोहर समयके फूल इनकी मात्रा जो भोजनके योग्य न हों अर्थात् अल्प अल्प बलिकर्ममें कही हैं ॥ १५१ ॥ उनके मन्त्र ये हैं कि, देवी देवता मुनींद्र त्रिभुवनके पति दानव सर्व सिद्ध यक्ष राक्षस नाग गरुड हैं मुख्य जिनमें ऐसे पक्षी गुह्यक देवताओंके देव डाकिनी देवताओंकी वेश्या हरि समुद्रके पति मातर विघ्ननाथ प्रेत भूत पिशाच श्मशान और नगर आदिके अधिपति और क्षेत्रपाल ॥ १५२ ॥ गन्धर्व और संपूर्ण किन्नर जटाधारी पितर ग्रह कूष्माण्डपूतना रोग ज्वर वैतालिक शिव ॥ १५३ ॥ रुधिरसे युक्त और पिशुन (चुगल) और अनेक प्रकारके मांसके भक्षक लम्बक्रोड दीर्घ शुक्ल ॥ १५४ ॥ खञ्ज (लँगडे) स्थूल एकाक्ष अनेक प्रकारके वे जिनके पक्षियोंके समान मुख हों सर्पके समान जिनके मुख हों और उष्ट्रमुख और मुखसे हीन और क्रोड (छाती) से हीन ॥ १५५ ॥ धमनके समान जिनकी कान्ति और तमालके समान जिनकी कान्ति है हाथीके समान और मेघकी समान जिनकी कान्ति बगलेके समान और क्षितिके तुल्य वज्रके

शब्दके समान हैं शब्द जिनका ॥ १५६ ॥ शीघ्रगामी पवनके समान जिनका वेग और वायुके तुल्य जिनका वेग है जिनके अनेक मुख हैं अनेक शिर हैं और अनेक भुजाओंसे जो युक्त हैं ॥ १५७ ॥ जिनके बहुत पाद हैं और जिनके बहुत नेत्र हैं जो संपूर्ण भूषणोंसे भूषित हैं जिनका विकट रूप है और जो मुकुटके धारी हैं और जो रत्नके धारी हैं ॥ १५८ ॥ जिनका कोटियों सूर्यके समान तेज है और जिनका बिजलीके समान तेज है, जिनका कपिल रंग है और अग्निके समान वर्ण है ऐसे जो अनेक रूपके प्रमथ हैं ॥ १५९ ॥ वे संपूर्ण बलिको

द्रुतगाश्च मनोगाश्च वायुवेगसमाश्च ये। बहुवक्त्रा बहुशिरा बहुबाहुसमन्विताः ॥ १५७ ॥ बहुपादा बहुदृशः सर्पाभरणभूषिताः। विकटा मुकुटाः केचित्तथा वै रत्नधारिणः ॥१५८॥ सूर्यकोटिप्रतीकाशा विद्युत्सदृशवर्चसः। कपिला हुतभुग्वर्णाः प्रमथा बहुरूपिणः॥१५९॥गृह्णन्तु बलयस्सर्वे तृप्ता यान्तु बलिर्नमः। आचार्यस्तु ततो नीत्वा कलशं मंत्रमंत्रितम् ॥१६०॥ स्वयं प्रत्यङ्मुखो भूत्वा प्राङ्मुखं यजमानकम्। स्वशाखोक्तेन मंत्रेण आगमोक्तेन वा तथा ॥ १६१ ॥ स्नापयेत्कुम्भतोयेन मंत्रैः पौराणिकैस्तथा। वैदिकैर्वा तथा मन्त्रैः सवस्त्रस्थः कुटुम्बवान्॥१६२॥सदारपुत्रमेतस्य यजमानस्य ऋत्विजः। सुरास्त्वामभिषिञ्चन्तु ये च सिद्धाः पुरातनाः ॥ १६३ ॥ ब्रह्मा विष्णुश्च शंभुश्च साध्याश्च समरुद्गणाः। आदित्या वसवो रुद्रा अश्विनौ च भिषग्वरौ ॥ १६४ ॥

ग्रहण करो. तृप्त होकर जाओ उनके प्रति नमस्कार है फिर आचार्य मन्त्रोंसे अभिमंत्रित किये हुए कलशको लेकर ॥ १६० ॥ आप पश्चिमको मुख करके पूर्वाभिमुख बैठे हुए यजमानको अपनी शाखामें कहे वेदके मन्त्रोंसे ॥ १६१ ॥ अथवा पौराणिक मन्त्रोंसे वस्त्रपर स्थित कुटुम्बसहित पूर्वोक्त यजमानको घटके जलसे स्नान करवावे ॥ १६२ ॥ स्त्री और पुत्रसहित यजमानको ऋत्विजभी स्नान करवावे देवता और जो

पुरातन सिद्ध हैं वे भी हे यजमान ! आपका अभिषेक करो ॥ १६३ ॥ ब्रह्मा विष्णु शंभु साध्य मरुद्गण आदित्य वसु रुद्र और वैद्योंमें उत्तम अश्विनीकुमार ॥ १६४ ॥ देवताओंकी माता अदिति स्वाहा सिद्धि सरस्वती कीर्ति लक्ष्मी दिति श्री सिनीवाली और कुहू ॥ १६५ ॥ दिति सुरसा विनता कद्रू और जो देवताओंकी पत्नी शास्त्रोंमें कही हैं और देवताओंकी माता ॥ १६६ ॥ भो यजमान ! ये सब आपका अभिषेक करो और शुभ अप्सराओंके गण नक्षत्र मुहूर्त और अहोरात्रकी संधि ॥ १६७ ॥ संवत्सर जिनके स्वामी कला काष्ठा क्षण और

अदितिर्देवमाता च स्वाहा सिद्धिः सरस्वती । कीर्तिर्लक्ष्मीर्द्युतिः श्रीश्च सिनीवाली कुहूस्तथा ॥ १६५ ॥ दितिश्च सुरसा चैव विनता कद्रुरेव च । देवपत्न्यश्च याः प्रोक्ता देवमातर एव च ॥ १६६ ॥ सर्वास्त्वामभिषिञ्चन्तु शुभाश्चाप्सरसां गणाः । नक्षत्राणि मुहूर्त्ताश्च याश्चाहोरात्रसन्धयः ॥ १६७ ॥ संवत्सरा दिनेशाश्च कलाकाष्ठाक्षणा लवाः । सर्वे त्वामभिषिञ्चन्तु कालस्या वयवाः शुभाः ॥ १६८ ॥ एते चान्ये च मुनयो वेदव्रतपरायणाः । सशिष्यास्तेऽभिषिञ्चंतु सदानाश्च तपोधनाः ॥ १६९ ॥ वैमानिकाः सुरगणाः सरवैः सागरैः सह । मुनयश्च महाभागा नागाः किम्पुरुषाः खगाः ॥ १७० ॥ वैखानसा महाभागा द्विजा वैहायनाश्च ये । सप्तर्षयः सदाराश्च ध्रुवस्थानानि यानि च ॥ १७१ ॥ मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः । भृगुः सनत्कुमारश्च सनकोऽथ सनन्दनः ॥ १७२ ॥

लव शुभदायी कालके अवयव भो यजमान ! ये सब आपका अभिषेक करो ॥ १६८ ॥ ये देवता और अन्य जो वेदव्रतमें परायण मुनि हैं वे शिष्योंसहित दानी और तपोधन भो यजमान ! आपका अभिषेक करो ॥ १६९ ॥ विमानमें स्थित देवताओंके गण शब्दायमान समुद्र महाभागी मुनि नाग किंपुरुष खग ॥ १७० ॥ महाभागी वैखानस आकाशगामी पक्षी स्त्रियोंसहित सत ऋषि और जो ध्रुवस्थान हैं ॥ १७१ ॥ मरीचि

अत्रि पुलह पुलस्त्य क्रतु अंगिरा भृगु सनत्कुमार सनक सनन्दन ॥ १७२ ॥ सनातन दक्ष जैगीषव्य भलन्दन एकत द्वित त्रित जाबालि और कश्यप ॥ १७३ ॥ दुर्वासा दुर्विनीत कण्व कात्यायन और दीर्घतपा मार्कण्डेय शुनःशेफ और विदूरथ ॥ १७४ ॥ और्व संवर्तक च्यवन अत्रि पराशर द्वैपायन यवक्रीत और अनुजसहित देवराज ॥ १७५ ॥ पर्वत वृक्ष वल्ली और पुण्यस्थान प्रजापति दिति और विश्वकी माता गौ ॥ १७६ ॥ दिव्य वाहन और संपूर्ण चराचर लोक अग्नि पितर मेघ आकाश दिशा जल ॥ १७७ ॥ ये और वेदके व्रतमें

सनातनश्च दक्षश्च जैगीषव्यो भलन्दनः । एकतश्च द्वितश्चैव त्रितो जाबालिकश्यपौ ॥ १७३ ॥ दुर्वासा दुर्विनीतश्च कण्वः कात्यायनस्तथा । मार्कण्डेयो दीर्घतपाः शुनःशेफो विदूरथः ॥ १७४ ॥ और्वः संवर्तकश्चैव च्यवनोऽत्रिः पराशरः । द्वैपायनो यवक्रीतो देवराजः सहानुजः ॥ १७५ ॥ पर्वतास्तरवो वल्ल्यः पुण्यान्यायतनानि च । प्रजापतिर्दितिश्चैव गावो विश्वस्य मातरः ॥ १७६ ॥ वाहनानि च दिव्यानि सर्वे लोकाश्चराचराः । अग्नयः पितरस्तारा जीमूताः खं दिशो जलम् ॥ १७७ ॥ एते चान्ये च बहवो वेदव्रतपरायणाः । सेन्द्रा देवगणाः सर्वे पुण्यश्रवणकीर्तनाः ॥ १७८ ॥ तोयैस्त्वामभिषिञ्चन्तु सर्वोत्पातनिबर्हणे । यथाभिषिक्तो मघवानेतैर्मुदितमानसैः ॥ १७९ ॥ इत्येतैश्चार्थकल्पैस्तु सहितैः समरुद्गणैः । अभिषेकं प्रकुर्वीत मन्त्रैः पौराणिकैस्तथा ॥ १८० ॥ ततः शुद्धोदकैः स्नानं यजमानस्य कारयेत् । वास्तुमण्डलमध्ये तु ब्रह्मस्थाने प्रपूजयेत् ॥ १८१ ॥

परायण अन्य बहुतसे ऋषि इन्द्रसहित देवताओंके गण और जिनका पुण्य यश कीर्तन है वे सब ॥ १७८ ॥ सम्पूर्ण उत्पातोंकी शान्तिके लिये जलोंसे आपका उस प्रकार अभिषेक करो जैसे प्रसन्न मनसे इन्होंने इन्द्रका अभिषेक किया है ॥ १७९ ॥ अर्थके जाननेमें समर्थ इन देवताओंका नाम लेकर मरुद्गण सहित पुराणके मन्त्रोंसे अभिषेक करे ॥ १८० ॥ फिर शुद्धजलोंसे यजमानको अभिषेक करावै फिर

वास्तुमण्डलके विप्र ब्रह्माके स्थानमें उस पृथ्वीका पूजन करे ॥ १८१ ॥ जिसका सुन्दररूप जो दिव्यरूप और आभरणोंसे युक्त है जो स्त्रीरूप है और प्रमदावेषको धारण कररही है और जो भली प्रकार मनोहर है ॥ १८२ ॥ महाव्याहृति है पूर्व जिसके ऐसे उस मन्त्रसे पृथ्वीका पूजन करे और धारय०—इस मन्त्रसे भली प्रकार प्रार्थना करके ॥ १८३ ॥ वास्तु सब देवतारूप है वास्तु देवतारूप परमेश्वर है फिर अपने अपने नाममन्त्रोंसे ध्यान करके पूजन करे ॥ १८४ ॥ प्रजाके ईश्वर चतुर्मुख देवका आवाहन करे फिर गन्धआदिसे उसका बारम्बार

सुरूपां पृथिवीं दिव्यरूपाभरणसंयुताम् ॥ स्त्रीरूपां प्रमदावेषधारिणीं सुमनोहराम् ॥ १८२ ॥ महाव्याहृतिपूर्वेण पूजयेत्तां धरां पुनः । धारयेति च मन्त्रेण सम्प्रार्थ्य च पुनः पुनः ॥ १८३ ॥ सर्वदेवमयं वास्तु वास्तुदेवमयं परम् । ततः स्वनाममन्त्रेण ध्यात्वा तत्र च पूजयेत् ॥ १८४ ॥ ततश्चतुर्मुखं देवं प्रजेशं चाह्वयेत्ततः । गन्धादिभिश्च तं पूज्य प्रणम्य च पुनः पुनः ॥१८५॥ वास्तुपुरुष नमस्तेऽस्तु भूमिशय्यारत प्रभो । मद्गेहे धनधान्यादिसमृद्धिं कुरु सर्वदा ॥ १८६ ॥ वाचयित्वा ततः स्वस्ति कर्कस्थं परिगृह्य च । सूत्रमार्गेण तोयस्य धारां प्रादक्षिणेन च ॥ १८७ ॥ पातयेत्तेन मार्गेण सर्वबीजानि चैव हि । सर्वबीजे जलैरेव तन्मार्गेणापि संचरेत् ॥ १८८ ॥ इति वास्तुविधानन्तु कृत्वा तां स्नानमण्डपात् ॥ १८९ ॥

पूजन और प्रणाम करके कहै ॥ १८५ ॥ हे वास्तुपुरुष ! हे भूमिशय्यामें रत ! हे प्रभो ! आपको नमस्कार है मेरे घरमें धन धान्य आदिकी वृद्धिको सदैव करो ॥ १८६ ॥ फिर स्वस्तिवाचन कराकर और कर्क (करवा) को ग्रहण करके सूत्रके मार्गसे और प्रदक्षिण क्रमसे जलकी धारको ॥ १८७ ॥ यजमानसे गिरावे उसीमार्गसे सर्व बीजोंको गिरवावे और सर्व बीजके जलोंको भी उसी मार्गसे गिरवावे और यजमानभी उसी मार्गसे गमन करै ॥ १८८ ॥ इस प्रकार वास्तुविधानको गुणोंसे युक्त सूत्रधार उस शिलाको शिलामण्डपसे भली प्रकार लाकर

भलीप्रकार साधन किये हुए घरके मध्यमें दिशाका साधन करे अर्थात् शिलास्थापनके देशका निश्चय करे, ईशान आदि दिशाओंके क्रमसे सुवर्णके कुदाल (खुदाला)से ॥ १८९-१९१ ॥ कोणभागमें और विशेषकर मध्यभागमें खोदकर नाभिपर्यन्त गर्तमें शिलाका स्थापन शुभ है ॥ १९२ ॥ शिलास्थापन समयमें सूत्रका छेद हो जाय तो मृत्यु और कीलका अधोमुख होजाय तो रोग, स्कंधसे गिरे तो शिरका रोग, हाथसे गिरजाय तो गृहके स्वामीका नाश होता है ॥ १९३ ॥ यदि गृहके स्वामी और स्थपतिको स्मरणका लोप होजाय

समानीय शिलां तत्र सूत्रधारो गुणान्वितः ॥१९०॥ तत्र दिक्साधनं कुर्याद्गृहमध्ये सुसाधिते । ईशानादिक्रमेणैव स्वर्णकुदाल केन तु ॥ १९१ ॥ खनित्वा कोणभागे तु मध्ये चैव विशेषतः । नाभिमात्रे तथा गर्ते शिलानां स्थापनं शुभम् ॥ १९२ ॥ सूत्र च्छेदे भवेन्मृत्युः कीले चार्वाङ्मुखे गदः । स्कंधाच्च्युते शिरोरोगः कराद्गृहपतेः क्षयः ॥ १९३ ॥ गृहेशस्थपतीनां च स्मृति लोपोऽथ मृत्युदः । भग्ने कीर्तिवधः कुम्भे कुम्भस्योत्सर्गवर्जिते ॥ १९४ ॥ सूत्रे प्रसार्यमाणे तु गर्दभो यदि रौति चेत् । तत्रास्थि शल्यं जानीयाच्छ्वशृगालादिलंघितम् ॥ १९५ ॥ रविदीप्ता दिशा यातु तत्र चेत्परुषो रवः । संस्पृष्टाङ्गसमाने च तस्मिञ्छल्यं विनिर्दिशेत् ॥ १९६ ॥ शिलाविन्यासकाले तु वाशन्ते द्विरदादयः । तस्मिंस्तेदेहसंभूतमस्थिशल्यं विनिर्दिशेत् ॥ १९७ ॥

तो मृत्युको देता है. यदि विसर्जनसे पहिले घटका भंग होजाय तो कुलकी कीर्तिका नाश होता है ॥ १९४ ॥ यदि सूत्रके फैलाने समयमें गर्दभ शब्द करै तो उस स्थानमें शल्यको जाने. कुत्ता शृगाल सूत्रको लंघ जाय तोभी दुःखको जाने ॥ १९५ ॥ सूर्यसे प्रकाशित जो दिशा है उसमें कठोर शब्द होय तो जिस अंगसे सूत्रका स्पर्श होय उसके समान अंगमें शल्यको कहे ॥ १९६ ॥ शिलाके स्थापनके समयमें हस्ती

आदि शब्द करे तो वास्तुके देहमें उत्पन्न हुए अस्थिका शल्यको कहै ॥ १९७ ॥ कुब्ज वामन भिक्षु वैद्य रोगी सूत्र रखनेके समयमें इनके दर्शनको भी लक्ष्मीका अभिलाषी मनुष्य त्यागकरे ॥ १९८ ॥ हुलहुल शब्दोंके सुननेपर, मेघके गर्जनेपर, गर्जतेहुए सिंहोंका जो शब्द है ये सूत्र रखनेके समयमें होंय तो धनका दाता होता है ॥ १९९ ॥ सूत्रके फैलानेके समयमें यदि जलतीहुई अग्नि दीखे अथवा घोटक (घोडे) पर चढाहुआ पुरुष दीखे तो निष्कंटक राज्य होता है ॥ २०० ॥ शंख और तूर्य्य आदिकोंका शब्द होय तो गृह वस्तुओंसे विपुल रहता है.

कुब्जं वामनकं भिक्षुं वैद्यं रोगातुरानपि । दर्शनं सूत्रकाले तु वर्जयेच्छ्रियमिच्छता ॥ १९८ ॥ श्रुतौ हुलहुलानां च मेघानां गर्जितेन च । गर्जतामपि सिंहानां स्वनितं धनदं भवेत् ॥ १९९ ॥ सूत्रे प्रसार्यमाणे तु दीप्तोऽग्निर्यदि दृश्यते । पुरुषो घोटका रूढो भवेद्राज्यमकण्टकम् ॥ २०० ॥ शंखतूर्यादिनिर्घोषे वस्तुभिर्विपुलं गृहम् । योषितां कन्यकानां च क्रीडनं वित्तवर्द्धनम् ॥ २०१ ॥ प्रारम्भे च शुभा गेहगोपने मृत्युरोगदा । स्तम्भाद्यारोपणे मध्या प्रवेशे वृष्टिरुत्तमा ॥ २०२ ॥ दारूणां छेदने चैव दुःखशोकामयप्रदा । परीक्षासमये चैव न तु सौख्यप्रदा स्मृता ॥ २०३ ॥

स्त्री और कन्याओंकी जो क्रीडा है वह सूत्र रखनेके समयमें होय तो धनकी वृद्धि होती है ॥ २०१ ॥ ये गृहके प्रारंभमें शुभ हैं और गृहके छावनेमें मृत्यु और रोगको देती है. स्तंभ आदिके रखनेमें मध्यम और प्रवेशके समयमें होय तो उत्तम वृष्टि होती है ॥ २०२ ॥ काष्ठके छेदनमें दुःख शोक रोगको देती है और परीक्षाके समयमेंभी सुखदायी नहीं कही है ॥ २०३ ॥

यदि सूत्र रखनेके समयमें छत्र ध्वजा पताकाओंका दर्शन होय तो निधि (खजाना) का संभव जानना. यदि घट जलसे पूर्ण रहे तो श्रेष्ठ प्राप्ति और पूर्ण घट और कलकल शब्द होय तो स्थिरता होती है ॥ २०४ ॥ घरकी सब कोणोंमें विधिसे पूजाको करके ईशान दिशासे लेकर प्रदक्षिण क्रमसे सूत्रको रक्खे ॥ २०५ ॥ इसी विधिस स्तंभ और द्वारआदिका आरोपण करै और भली प्रकार सावधानीसे वास्तु विद्याकी विधिको करै ॥ २०६ ॥ नन्दा भद्रा जया रिक्ता पूर्णा नाम्नी जो क्रमसे शिला हैं उनमें नन्दामें पद्मको लिखे और भद्रामें सिंहा

छत्रध्वजपताकानां दर्शने निधिसम्भवः। पूर्णकुम्भे तु सम्प्राप्तिः स्थैर्यं कलकलध्वनौ ॥ २०४ ॥ गृहकोणेषु सर्वेषु पूजां कृत्वा विधानतः। ईशानमादितः कृत्वा प्रादक्षिण्येन विन्यसेत् ॥२०५॥ अनेनैव विधानेन स्तम्भद्वारादिरोपणम् । वास्तुविद्याविधानं तु कारयेत्सुसमाहितः ॥ २०६ ॥ नन्दा भद्रा जया रिक्ता पूर्णा नाम्नी यथाक्रमम् । नन्दायां पद्ममालिख्य भद्रा सिंहासनं तथा ॥२०७॥ जयायां तोरणं छत्रं रिक्तायां कर्म एव च। पूर्णायां च चतुर्बाहुं विष्णुं संलेखयेद्बुधः ॥२०८॥ ॐभूर्भुवः स्वरिति तथा सर्वानावाहनं स्मृतम् । ब्रह्मा विष्णुश्च रुद्रश्च ईशानश्च सदाशिवः॥२०९॥ एते पञ्चैव पञ्चेषु भूतानावाहयेत्पुनः । स्नपनं च ततः कुर्याद्विधिदृष्टेन कर्मणा ॥२१०॥ पञ्चभिः कलशैर्युक्तास्तासां नामान्यतः शृणु। पद्मं चैव महापद्मं शङ्खं च विजयं तथा ॥२११॥

सनको ॥ २०७ ॥ जयामें तोरण, रिक्तामें छत्र और कर्मको करै और पूर्णोंमें चार भुजावाले विष्णुको यत्नसे स्थापन करै ॥ २०८ ॥ ॐ भूर्भुवः स्वः इस मंत्रको पढकर सबका आवाहन कहा है ब्रह्मा विष्णु रुद्र ईशान और सदाशिव ॥ २०९ ॥ इन पांचोंका आवाहन करै और पांचोंके स्थानमें फिर भूतोंका आवाहन करै फिर शास्त्रकी विधिमें देखेहुए कर्मसे स्नान करावे ॥ २१० ॥ सावधानहुए ऋत्विज पांच

कलशोंसे स्नान करावें उनके नाम श्रवण करो, पद्म महापद्म शंख विजय ॥ २११ ॥ और पांचवां सर्वतोभद्र होता है मंत्रसे उनका आवाहन करै अग्निर्मूर्द्धा इस मंत्रको पढकर मिट्टीसे यज्ञायज्ञ इस मंत्रको पढकर जलोंसे ॥ २१२ ॥ अश्वत्थ इस मंत्रसे पंच कषायोंसे और पत्तोंके जलसे गायत्रीको पढकर गोमूत्रसे गन्धद्वारां इस मंत्रको पढकर गोमयसे ॥ २१३ ॥ आप्यायस्व इस मन्त्रको पढकर दुग्धसे और दधिक्राव्णः इस मन्त्रको पढकर दधिसे, घृतंमि० इस मन्त्रको पढकर घृतसे, मधुवाता इस मन्त्रको पढकर मधुसे ॥ २१४ ॥

पञ्चमं सर्वतोभद्रो मन्त्रेणावाहयेत्तु तम् ॥* अग्निर्मूर्द्धेति च मृदा यज्ञायज्ञेति वारुणैः ॥ २१२ ॥ अश्वत्थेति कषायेण पल्लवेन जलेन च। गायत्र्या च गवां मूत्रैर्गन्धद्वारेति गोमयैः ॥ २१३ ॥ आप्यायस्वेति क्षीरेण दधिक्राव्णेति वै दधि। घृतवतीति घृतेन च मधुवातेति वै मधु ॥ २१४॥ पयः पृथिव्यामिति च पञ्चगव्येन संन्नपेत्। देवस्यत्वेति च कुशैः काण्डात् काण्डाच्च दूर्वया ॥ २१५ ॥ गन्धद्वारेति गन्धेन पञ्चगव्येन वै तथा। या ओषधीरोषधीभिर्याः फलिनीति फलोदकैः ॥ २१६ ॥ नमस्तेति वृष शृङ्गमृदा धान्यमसीति च। धान्यादीञ्जिघ्रमिति च कलशेन तथैव च ॥ २१७ ॥

पयः पृथिव्यां इस मन्त्रको पढकर पंचगव्यसे, देवस्यत्वा इस मन्त्रको पढकर कुशाओंसे, काण्डात्काण्डात् इस मन्त्रको पढकर दूबसे ॥ २१५ ॥ गन्धद्वारां इस मन्त्रको पढकर गंधसे और पंचगव्यसे और या ओषधीः इस मन्त्रसे औषधियोंसे और याः फलिनी इस मन्त्रको पढकर फलके जलोंसे ॥ २१६ ॥ नमस्ते इस मन्त्रको पढकर बैलके सींगकी मिट्टीसे और धान्यमसि०-इस मन्त्रको पढकर

* ' अग्निर्मूर्धा इत्यादिमन्त्राः स्वस्तिपुण्याहप्रयोगेषु प्रसिद्धाः।

धान्यके जलोंसे और आजिघ्रकलशम्०–इस मन्त्रसे कलशके जलोंसे ॥ २१७ ॥ ओषधयः०–इस मन्त्रको पढकर अक्षतोंसे यवोऽसि०–इस मन्त्रको पढ़कर जवके जलोंसे तिलोऽसि०–इस मन्त्रको पढकर तिलोंसे, पंचनद्यः०–इस मन्त्रको पढकर नदीके जलोंसे ॥ २१८ ॥ इमं मे गंगे०–इस मन्त्रको पढकर तीर्थके जलोंसे, नमोऽस्तु रुद्रेभ्यः०–इस मन्त्रको पढकर नग (पर्वत) और हस्ति शालाकी मिट्टीसे स्नान करावे ॥ २१९ ॥ स्योनापृथिवी०–इस मन्त्रको पढकर हलकी मिट्टी सहतामिली मिट्टीसे और हिरण्यगर्भ०–इस मन्त्रको पढकर सुवर्णके जलोंसे स्नान करावे

ओषधय इत्यक्षतैश्च यवोऽसीति यवोदकैः । तिलोऽसीति तिलैः पंचनद्येति च नदीजलैः ॥ २१८ ॥ इमं मे गङ्गेति च तथा तीर्थानामुदकेन च । नमोऽस्तु रुद्रेभ्यो मृदा नगदन्तिसमुद्भवात् ॥ २१९ ॥ स्योना पृथिवी च मृदा सीतया मधुमिश्रया । हिरण्यगर्भ इति वा सुवर्णोदकसंभवैः ॥ २२० ॥ रूपेणेति रौप्येण पदस्यायेति वस्त्रजैः । संस्नाप्य तीर्थपयसा ततः शुद्धोदकेन च ॥ २२१ ॥ सम्मार्ज्य शुभ्रवस्त्रेण गन्धेनालिप्य सर्वतः । ब्रह्मादीन् पूजयेत्तत्र नाममन्त्रेण वा तथा ॥ २२२ ॥ उपचारैः षोडशभिर्मूलमध्यशिरःस्वपि । स्नपनं चाभिषेकन्तु वेदमन्त्रैश्च कारयेत् ॥२२३॥ आब्रह्मन्निति नन्दायां भद्रं कर्णेति वै तथा । जातवेदसेति तथा यमाय त्वेति मन्त्रकैः ॥ २२४ ॥

॥ २२० ॥ रूपेण–इस मन्त्रको पढकर चांदीके जलोंसे, पदस्याय०–इस मन्त्रको पढ़कर वस्त्रके जलोंसे और तीर्थके जलोंसे स्नान कराकर फिर शुद्ध जलोंसे स्नान करावे ॥ २२१ ॥ फिर सफेद वस्त्रसे संमार्जन करके और सब अंगोंमें गन्धका लेपन करके वास्तुमण्डलमें नाममंत्रोंसे ब्रह्माआदिका पूजन करे ॥ २२२ ॥ वह पूजन षोडश उपचारोंसे करै और मूल मध्य शिरके ऊपर स्नान और अभिषेक वेदके मन्त्रोंसे करावे ॥ २२३ ॥ आब्रह्मन्० भद्रंकर्णेभिः इन मन्त्रोंको और जातवेदसे० यमाय त्वा० इन मन्त्रोंको पढकर नंदा भद्रा

जया रिक्तासे स्नान करावे ॥ २२४ ॥ और पूर्णादार्वि०–इस मन्त्रको पढकर पूर्णा शिलाको क्रमसे स्नान करावे. मूल मध्यमें तिसी प्रकार नामके मन्त्रोंसे स्नान करावे ॥ २२५ ॥ और ब्रह्मजज्ञानं०–नमस्ते रुद्र०–विष्णोरराट०–इमं देवा०–इन मन्त्रोंको भलीप्रकार जपै ॥ २२६ ॥ और शिरके ऊपर तद्विष्णोः परमं पदम्० इदं विष्णुर्विचक्रमे त्रेधानिदधे पदम्० इन मन्त्रोंसे विष्णुका ॥ २२७ ॥ समख्ये देव्या-धिया०–और त्र्यम्बकं यजामहे० इन मन्त्रोंसे शिवका आवाहन करे. मूर्द्धानन्दिवो० इस ऋचासे भलीप्रकार विधिसे पूजा करके ॥ २२८ ॥

पूर्णादर्वीति पूर्णायां क्रमेणापि समाचरेत् । मूलमध्येऽपि च तथा नामभिर्मतमंत्रकैः ॥ २२५ ॥ ब्रह्मजज्ञानमिति च विष्णो रराटमेव च । नमस्ते रुद्र इति च इमं देवेति संजपेत् ॥ २२६ ॥ शीर्षे चावाहनं कार्यं तद्विष्णोः परमम्पदम् । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ २२७ ॥ समख्ये देव्या धिया इति च त्र्यम्बकं यजामहेति च । मूर्द्धानं दिवेत्यृचया सम्पूज्य च यथाविधि ॥ २२८ ॥ तेभ्यो हिरण्यं दत्त्वा च वस्त्रालङ्कारवाससी । ततस्तु पुण्यघोषेण शिलान्यासं प्रकल्पयेत् ॥ २२९ ॥ ततस्तु लग्ने सम्प्राप्ते पञ्चवाद्यानि वादयेत् । नन्दां प्रगृह्य च शिलां तत्राधारशिलां न्यसेत् ॥ २३० ॥ तत्रोपरि न्यसेत्सप्तकलशं मन्त्रमन्त्रितम् । सर्वौषधिजलोपेतं पारदाज्यमधुप्लुतम् ॥ २३१ ॥

उनको सुवर्ण वस्त्र और अलंकार वस्त्रोंको देकर और पुण्याहवाचन करके शिलाके स्थापनको कर ॥ २२९ ॥ श्रेष्ठ लग्नकी प्राप्तिके समयमें पांच प्रकारके वाद्योंको बजवावे नंदा नामकी शिलाको ग्रहण करके आधार शिलाका स्थापन करे ॥ २३० ॥ फिर उस शिलाके ऊपर मन्त्रोंको पढकर ऐसे सातकलशोंको रक्खे जो सर्वौषधि जल पारा घी और सहत इनसे युक्त हों ॥ २३१ ॥

जो ढकेहुएहों जिनमें रत्न पडाहुआहो और जो तेजके समूहसे युक्त हों और सदाशिवके स्वरूपका ध्यान करके पँचोपचारोंसे पूजन कर ॥२३२॥ बांये भागमें कियेहुए गर्तमें दीपकको रखकर उसके ऊपर नन्दानामकी शिलाको रखदे ॥ २३३ ॥ नाभिर्मे० इस मन्त्र और स्थिरो भव० इस वाक्यसे मन्त्रका ज्ञाता तिसके अनंतर शास्त्रोक्त विधिसे प्रार्थना करे ॥ २३४ ॥ हे नन्दे ! तू पुरुषको आनंद देनेहारी है मैं तेरा यहां स्थापन करताहूं इस प्रासादमें प्रसन्नहुई तबतक टिक, जबतक चन्द्रमा सूर्य तारागण हैं ॥ २३५ ॥ हे नन्दिनि ! हे देववासिनि ! आयु कामना और

पिहितं रत्नगर्भं च तेजोराशिभिरन्वितम् । सदाशिवस्वरूपी च ध्यात्वा पञ्चोपचारकैः ॥ २३२ ॥ सम्पूज्य दीपं विन्यस्य वाम भागेऽथ गर्तकैः । तत्रोपरि न्यसेन्नन्दां संपूज्य च यथाविधि ॥ २३३ ॥ नाभिर्मेति च मन्त्रेण स्थिरो भवेति वै तथा । प्रार्थनां च ततः कुर्यादागामोक्तेन मन्त्रवित् ॥२३४॥ नन्दे त्वं नन्दिनी पुंसां त्वामत्र स्थापयाम्यहम् । प्रासादे तिष्ठ संहृष्टा यावच्चन्द्रार्कतारकाः ॥२३५॥ आयुष्कामाञ्छ्रियं देहि देववासिनि नन्दिनि । अस्मिन्नक्षा त्वया कार्या प्रासादे यत्नतो मम ॥२३६॥ महापद्मं न्यसेत्तत्र पूजयेद्रत्नगर्भितम् । तत्र भद्रां च संस्थाप्य पूजयेन्नाममंत्रकैः ॥२३७॥ भद्रंकर्णेति ऋचया स्थापयेद्वारुणैस्तथा । भद्रे त्वं सर्वदा भद्रं लोकानां कुरु काश्यपि ॥२३८॥ आयुर्दा कामदा देवि सुखदा च सदा भव । त्वामत्र स्थापयाम्यद्य गृहेऽस्मिन्भद्रदायिनी ॥२३९॥

लक्ष्मीको दे इस मेरे प्रासादमें यत्नसे रक्षा कर ॥ २३६ ॥ उस शिलापर रत्न हैं गर्भमें जिसके ऐसे महापद्मको रक्खे. उस पद्मपर भद्रनामकी शिलाको रखकर नामके मन्त्रोंसे पूजन करे ॥ २३७ ॥ अथवा भद्रंकर्णेभिः० इस ऋचासे वा वरुणके मन्त्रोंसे स्थापन करे. हे भद्रे ! हे काश्यपि तू सदैव लोकोंमें कल्याण कर ॥ २३८ ॥ हे देवि ! तू आयु, कामना और सुखकी दाता सदैव हो, हे भद्रके देनेहारी ! तेरा इस घरमें आज

१ नाभिर्मे चित्तं विज्ञानं पायुर्मेपचितिर्भसत् । आनन्दावाण्डौ मे भगस्सौभाग्यंपसः । जङ्घाभ्यां पद्भ्यां धर्मोस्मि विशिराजाप्रतिष्ठितः ॥

स्थापन करताहूं ॥ २३९ ॥ आधारके ऊपर शंखनामके कलशको रखकर और कोणमें उसका विधिसे भलीप्रकार पूजनकरके फिर जया नामकी शिलाका भलीप्रकार पूजन करे ॥ २४० ॥ गर्ग गोत्रमें उत्पन्न त्रिनेत्रा और चतुर्भुजी सुंदरनेत्रवाली जयाका इस प्रासादमें आज मैं स्थापन करता हूं ॥ २४१ ॥ हे भार्गव ! तू सदैव गृहके स्वामीको जय और भूतिके लिये हो, जातवेदसे० इस और पूर्वोक्त मन्त्रसे अभिमान्त्रित ॥ २४२ ॥ विजय नामके कलशके आधारके ऊपर रखकर फिर मन्त्रका ज्ञाता इस मन्त्रसे रिक्तानामकी शिलाका स्थापन करै ॥ २४३ ॥ त्र्यम्बकं यजामहे० इससे

आधारोपरि विन्यस्य कलशं शंखसंज्ञकम् । कोणे संपूज्य विधिवज्जयां संस्थापयेत्ततः ॥ २४० ॥ गर्गगोत्रसमुद्भूतां त्रिनेत्रां च चतुर्भुजाम् । प्रासादे स्थापयाम्यद्य जयां चारुविलोचनाम् ॥२४१॥ नित्यं जयाय भूत्यै च स्वामिनो भव भार्गवि । जातवेदसेति मंत्रेण पूर्वोक्तेन च मन्त्रतः ॥ २४२ ॥ आधारोपरि विन्यस्य विजयं कलशं ततः ॥ रिक्तां संस्थापयेत्तत्र मन्त्रेणानेन मन्त्रवित् ॥२४३॥ त्र्यम्बकं यजामहेति तथा वारुणमंत्रकैः । स्थापयेत्प्रार्थयेत्तद्वद्रिक्तां रिक्तार्तिहारिणीम् ॥ २४४ ॥ रिक्ते त्वं रिक्तदोषघ्ने सिद्धिभुक्तिप्रदे शुभे । सर्वदा सर्वदोषघ्नि तिष्ठास्मिंस्तत्र नन्दिनि॥२४५॥आधारे विन्यसेन्मध्ये सर्वतोभद्रसंज्ञकम् । पूर्णरत्नान्वितं पुष्टं सर्वमंत्राभिमंत्रितम्॥२४६॥तां च सम्पूज्य विधिवद्दत्वा तत्र सदाशिवम्।तत्रोपरि न्यसेत्पूर्णां पूर्णानन्दप्रदायिनीम् ॥२४७॥

और वरुणके मन्त्रसे रिक्ता (खाली) की हरनेहारी रिक्ताका स्थापन और प्रार्थना करै ॥ २४४ ॥ हे रिक्ते ! रिक्त (खाली) के दोषकी नाशक है और हे शिवे ! सिद्धि और भुक्तिकी दाता है. हे सब दोषोंकी नाशक हे नन्दिनि ! इस स्थानमें तू सर्वदा टिक ॥२४५॥ आधारके विषे मध्यमें पूर्ण रत्नों युक्त पुष्ट और संपूर्ण मन्त्रोंसे अभिमंत्रित सर्वतोभद्र नामके कलशको रक्खे ॥ २४६ ॥ पूर्णा नामकी शिलाका पूजन करके और उसके

ऊपर सदाशिवका ध्यान करके उस कलशके ऊपर पूर्णा आनंदकी दाता पूर्ण नामकी शिलाको रक्खे ॥ २४७ ॥ हे पूर्णे ! हे काश्यपि ! तू लोकोंको सदैव पूर्ण कर. हे देवि ! तू आयु कामना और धन सुतकी दाता हो ॥ २४८ ॥ तू गृहकी आधार वास्तुरूप है और वास्तुदीपकसे युक्त है, हे जगत्प्रिये ! तेरे विना जगतका आधार नहीं ॥ २४९ ॥ पूर्णादर्वि० इस मन्त्रसे इमं मे देव० इस मन्त्रसे ॥ २५० ॥ मूर्द्धानं दिव० इस मन्त्रसे और शांतिके मन्त्र और सहस्रशीर्षा० इन १६ मन्त्रोंसे और अग्निमीळे० इस मन्त्रसे ॥ २५१ ॥ इषेत्वोर्जे० इस मन्त्रसे अग्न आयाहि०

पूर्णे त्वं सर्वदा पूर्णं लोकानां कुरु काश्यपि। आयुर्दा कामदा देवि धनदा सुतदा तथा॥२४८॥ गृहाधारा वास्तुमयी वास्तुदीपेन संयुता । त्वामृते नास्ति जगतामाधारश्च जगत्प्रिये ॥ २४९ ॥ पूर्णादर्वीति मन्त्रेण इमं मे देवेति वै तथा ॥ २५०॥ मूर्द्धानन्दिवेति च तथा शांतिमन्त्रैस्तथैव च । सहस्रशीर्षेति षोडशभिरग्निमीळेति वै तथा॥२५१॥इषे त्वोर्ज्जेत्यग्न आयाहीति तथा पुनः । शन्नोदेवीति मंत्रेण स्थापयेत्प्रयतः शुचिः ॥ २५२ ॥ मृदादिना दृढीकृत्य प्रादक्षिण्येन सर्वतः । ईशानादिक्रमेणैव स्थाप्या सर्वार्थसिद्धये ॥ २५३ ॥ आग्नेयी चैव वर्णानामाग्नेयादिक्रमेण च । सर्वेषामपि वर्णानां केचिदिच्छन्ति सूरयः ॥२५४॥ यान्तु देवगणास्सर्वे पूजामादाय पार्थिवीम् । इष्टकामसमृद्ध्यर्थं पुनरागमनाय च ॥ २५५ ॥

इस मन्त्रसे और वारम्वार शन्नो देवी० इस मन्त्रसे शुद्धहुआ यजमान आधारशिलाका स्थापन करे ॥ २५२ ॥ मिट्टी आदिसे दृढकरके प्रदक्षिण रीति संपूर्ण दिशाओंमें ईशानआदिके क्रमसे संपूर्ण अर्थकी सिद्धिके लिये अन्यशिलाओंकाभी स्थापन करै ॥ २५३ ॥ कोई पण्डित जन यह मानते हैं-सब वर्णोंके मध्यमें आग्नेयी शिलाओंका आग्नेयादि क्रमसे स्थापन करै ॥ २५४ ॥ राजाकी पूजाको लेकर सब

देवगण इष्टकी सिद्धि और आगमनके लिये जावो ॥ २५५ ॥ फिर पूर्वाभिमुख होकर यजमान पूजाकी सामग्री आचार्यको निवेदन करे और तिसी प्रकार अपने धनके अनुसार ब्रह्माको दक्षिणा दे ॥ २५६ ॥ उत्तराभिमुख बैठेहुए ब्रह्माको यह कहे-क्षमा करो सुवर्णसे युक्त और दो वस्त्रोंसे युक्त सवत्सा गौको ॥ २५७ ॥ और यज्ञके अन्तमें धुलेहुए वस्त्रोंको आचार्यके अर्थ निवेदन करे फिर ज्योतिषी और स्थपति और वैष्णव इनका सन्तोष करिके ॥ २५८ ॥ उनको भी दक्षिणा दे. घृतमें अपने मुखकी छायाको देखे फिर रक्षाबन्धन मन्त्रपाठ और आयुष

ततस्तु प्राङ्मुखो भूत्वा आचार्याय निवेदयेत् । दक्षिणां ब्रह्मणे तद्वद्यथावित्तानुसारतः॥२५६॥ उदङ्मुखाय च ततः क्षमस्वेति पुनः पुनः । गां सवत्सां स्वर्णयुतां तथा वासोयुगान्विताम् ॥ २५७ ॥ यज्ञान्ते आप्लुतान् वस्त्रानाचार्याय निवेदयेत् । दैवज्ञश्च ततस्तोष्यः स्थपतीन् वैष्णवानपि ॥ २५८ ॥ दक्षिणां च तयोर्दद्याद् घृतच्छायां विलोकयेत् । रक्षाबन्धो मन्त्रपाठरुयायुषं च समाचरेत् ॥ २५९ ॥ ऋत्विग्भ्यो दक्षिणां दद्याच्छिष्टेभ्यश्च स्वशक्तितः । दीनान्धकृपणेभ्यश्च दद्याद्वित्तानुसारतः ॥ २६० ॥ शिल्पिवर्गास्तु संतोष्य दानमानैस्तथैव च ॥ २६१ ॥ सम्प्राप्नोति नरो लक्ष्मीं पुत्रपौत्रधनान्विताम्॥ २६२ ॥ इति वास्तुशास्त्रे शिलान्यासो नाम पञ्चमोऽध्यायः ॥ ५ ॥

करे अर्थात् स्रुवेसे भस्मको लगावे ॥ २५९ ॥ अपनी शक्तिके अनुसार ऋत्विज और शिष्टोंको दक्षिणा दे और अपने धनके अनुसार दीन अन्ध और कृपणोंकोभी कुछ दे ॥ २६० ॥ दीन मानसे शिल्पियोंका जो वर्ग है उनके भी सन्तोषको करके ॥ २६१ ॥ मनुष्य पुत्र पौत्रोंसे युक्त लक्ष्मीको प्राप्त होता है ॥ २६२ ॥ इति पं० मिहिरचन्द्रकृतभाषाविवृतिसहिते वास्तुशास्त्रे शिलान्यासो नाम पंचमोऽध्यायः ॥ ५ ॥

इसके अनन्तर प्रासादोंकी विधिको कहताहूं—रुद्रदेवता और विष्णु देवता और देवताओंमें उत्तम ब्रह्मा आदि ॥ १ ॥ इनका शुभस्थानमें स्थापन करना योग्य है अन्यथा ये भयके दाता होते हैं, गर्तआदिका चिह्न जिसमें हो और जिसका गन्ध और स्वाद श्रेष्ठ हो वह पृथिवी ॥ २ ॥ और जिसका वर्ण श्रेष्ठ हो वह पृथिवी सब कामनाओंकी दाता होती है. अपने पितामहसे पूर्वके जो आठ कुल हैं ॥ ३ ॥ अपने सहित उन सबको विष्णुका मन्दिर बनवानेवाला तारता है और जो हमारे कुलमें कोई विष्णुका भक्त हो ॥ ४ ॥ ऐसा और हम विष्णुका मन्दिर बनवा

अथातः संप्रवक्ष्यामि प्रासादानां विधानकम् । देवो रुद्रस्तथा विष्णुर्ब्रह्माद्यास्सुरसत्तमाः ॥ १ ॥ प्रतिष्ठाप्याः शुभे स्थाने अन्यथा ते भयावहाः । गर्तादिलक्षणा धात्री गन्धस्वादेन या भवेत् ॥ २ ॥ वर्णेन च सुरश्रेष्ठा सा मही सर्वकामदा । पितामहस्य पुरतः कुलान्यष्टौ तु यानि वै ॥ ३ ॥ तारयेदात्मना सार्द्धं विष्णोर्मन्दिरकारकः। अपि नः सत्कुले कश्चिद्विष्णुभक्तो भविष्यति ॥ ४ ॥ ये ध्यायन्ति सदा भक्त्या करिष्यामो हरेर्गृहम् । तेषां विलीयते पापं पूर्वजन्मशतोद्भवम् ॥ ५ ॥ सुरवेश्मनि यावन्तो द्विजेन्द्राः परमाणवः । तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ६ ॥ प्रासादे मृन्मये पुण्यं मयैतत्कथितं पुरा । तस्मादशगुणं पुण्यं कृते शैलमये भवेत् ॥ ७ ॥ ततो दशगुणं लौहे ताम्रे शतगुणं ततः । सहस्रगुणितं रौप्ये तस्माद्धौक्मे सहस्रभम् ॥ ८ ॥

वेंगे ऐसा जो सदैव भक्तिसे ध्यान करते हैं उनके भी पूर्व लोकका १०० सौ जन्मोंका किया पाप नष्ट होता है ॥ ५ ॥ भो द्विजेन्द्रो ! देवताके मन्दिरमें जितने परमाणु होते हैं उतने सहस्रवर्षपर्यन्त कर्ता स्वर्गलोकमें वसता है ॥ ६ ॥ जो यह मैंने पुण्य कहा वह मिट्टीसे बनाये हुए मन्दिरमें होता है और उससे दश गुणा पुण्य पत्थरसे बनाये हुएमें होता है ॥ ७ ॥ उससे भी दशगुणा लोहेसे बनायेमें और उससे भी सौ १०० गुणा तांबेके बनाये हुएमें और उससे भी हजार गुणा चांदीके और उससे भी हजार गुणा सुवर्णके मन्दिरमें होता है ॥ ८ ॥

अनन्तं फलमाप्नोति रत्नचित्रे मनोहरे । कनिष्ठं मध्यमं श्रेष्ठं कारयित्वा हरेर्गृहम् ॥ ९ ॥ स्वर्गं च वैष्णवं लोकं मोक्षं च लभते क्रमात् । बाल्ये च क्रीडमाना ये पांसुभिर्भवनं हरेः ॥ १० ॥ वासुदेवस्य कुर्वन्ति तेऽपि तल्लोकगामिनः । या भूमिः शस्यते गेहे सा प्रासादविधौ तथा ॥ ११ ॥ यो विधिर्गृहनिर्माणे शिलान्यासस्य कर्मणि । प्रासादादिषु संज्ञेयाश्चतस्रस्तु शिलास्तथा ॥१२॥ नन्दा भद्रा जया पूर्णा आग्नेयादिषु विन्यसेत् । चतुष्षष्टिपदं वास्तुं प्रासादादिषु विन्यसेत् ॥१३॥ ब्रह्मा चतुष्पदो ह्यत्र शेषाः स्वस्वपदे स्थिताः । वास्तुपूजाविधिश्चात्र गृहस्थापनकर्मवत् ॥ १४ ॥ सम्पूज्य वास्तुं विधिवच्छिलान्यासं ततश्चरेत् । आदावेव समासेन शिलालक्षणमुत्तमम्॥१५॥शिलान्यासविधानन्तु प्रोच्यते तदनन्तरम् । शिला वाऽपीष्टका वापि चतस्रो लक्षणान्विताः॥१६॥

रत्नोंसे जडित मनोहर (रमणीय) मन्दिरके बनानेसे अनन्तफल होता है, कनिष्ठ मध्यम और श्रेष्ठ विष्णुके मन्दिर बनानेसे ॥ ९ ॥ स्वर्गलोक विष्णुलोक और मोक्षको प्राप्त होता है और बाल्य अवस्थामें पांसु (धूलि) से खेलते हुए बालक जो वासुदेव हरिके भवनको ॥ १० ॥ करते हैं वे भी विष्णुलोकमें जाते हैं, जो भूमि घरके बनानेमें श्रेष्ठ है वही प्रासादकी भूमिमें भी श्रेष्ठ है ॥ ११ ॥ जो विधि घरके बनानेमें और शिलाके स्थापन करनेमें है वही प्रासाद आदिमेंभी जाननी. चार ४ शिला ॥ १२ ॥ नन्दा भद्रा जया पूर्णा नामकी आग्नेय आदि दिशा ओंमें प्रासादमें भी स्थापन करै. प्रासाद आदिमें वास्तु चतुःषष्टि (६४) पदका होता है ॥ १३ ॥ चतुःषष्टिपद वास्तुमें ब्रह्मा चतुष्पद होता है और शेष देवता अपने अपने पदमें स्थित होते हैं. और इसमें वास्तुपूजाकी विधि गृहस्थापन कर्मके तुल्य होती है ॥ १४ ॥ विधिसे वास्तुका भलीप्रकार पूजन करके फिर शिलाका स्थापन करै. प्रथम संक्षेपसे शिलाका उत्तम लक्षण देखे ॥ १५ ॥ उसके अनन्तर शिला

स्थापनविधिको कहते हैं–शिला हो वा ईंट हो चारों लक्षणसे युक्त ॥ १६ ॥ भलीप्रकार मनोहर और समान और चारों तरफसे हाथभर बनवा कर प्रासादआदिमें विधिसे ॥ १७ ॥ विस्तारके विभाग और बाहुल्यके तुल्य शिला और ईंटोंका प्रमाण और लक्षण कहाहै ॥ १८ ॥ नंदा आदि शिलाओंके अधिष्ठान (नीचे) की शिला अथवा ईंट जाननी और शिलाओंके रूपको जानना और नंदा आदि इष्टका कहीहै ॥ १९ ॥ संपूर्ण शिलाओंका तल श्रेष्ठ हो और सब चिकनी समान लक्षणोंसे युक्त होयँ और सब कुशा और दूर्वासे चिह्नित ध्वजा छत्र चँवरसे युक्त

प्रासादादौ विधानेन न्यस्तव्याः सुमनोहराः । चतुरस्राः समाः कृत्वा समन्ताद्धस्तसम्मिताः ॥ १७ ॥ विस्तारस्य त्रिभागेन बाहुल्येन सुसंमिताः । शिलानामिष्टकानां च प्रमाणं लक्षणं स्मृतम् ॥ १८ ॥ नन्दाद्यधिष्ठिता ज्ञेया शिला वाप्यथवेष्टका । शिला रूपाण्यथो विंद्यान्नन्दाद्याश्चेष्टकाः स्मृताः ॥ १९ ॥ संपूर्णाः सुतलाः स्निग्धाः सुसमा लक्षणान्विताः । कुशदूर्वाङ्किता धन्याः सध्वजच्छत्रचामराः ॥ २० ॥ सकुशास्तरणोपेता कूर्ममत्स्यफलान्विताः । हस्तिदर्पणवज्राङ्काः प्रशस्तद्रव्यलाञ्छिताः ॥ २१ ॥ शस्तपक्षिमृगाङ्काश्च वृषाङ्कास्सर्वदा हिताः । स्वस्तिका वेदिकायुक्ता नन्दावर्ताङ्कलाञ्छिताः ॥२२॥ पद्मादिलक्षणोपेताः शिलाः सर्वार्थसिद्धिदाः । तथा गोवाजिपादाङ्काः शिला धन्याः सुखावहाः ॥ २३ ॥

होय तो धन्य होतीहै ॥ २० ॥ कुशाके आस्तरणसे युक्त कूर्म मत्स्य और फलसे युक्त और जिनमें हस्ती दर्पण और वज्र इनका चिह्न अथवा श्रेष्ठ द्रव्यका चिह्न हो ॥ २१ ॥ जिनमें श्रेष्ठपक्षी और मृगका चिह्न हो अथवा वृषका चिह्न हो वे सब कालमें स्थित हैं स्वस्तिक (सथिया) और वेदीसे युक्त और नंदावर्तके चिह्नसे युक्त ॥ २२ ॥ पद्मआदि लक्षणोंसे युक्त शिला संपूर्ण अर्थकी सिद्धिको देती है तिसी प्रकार गौ और

अश्वके चरणका जिसमें चिह्नहो ऐसी शिला सुखकी दाता होती है ॥ २३ ॥ मांसभक्षक पक्षी मृग इनके चरणोंसे चिह्नित और पक्षियोंसे चिह्नित दिङ्मुख और बहुत दीन और दीर्घ ह्रस्व फटी शिला श्रेष्ठ नहीं होती ॥ २४ ॥ विरुद्धवर्ण फटी और टूटी और लक्षणोंसे हीन शिला त्यागनेके योग्य है और जिनमें श्रेष्ठ प्राणियोंके रूपका वा उत्तम द्रव्यका चिह्न हो ॥ २५ ॥ और जो शास्त्रमें उक्त लक्षणोंसे युक्त हो ऐसी शिला सदैव सुखदायी होती है। अब संक्षेपसे ईंटोंके लक्षणोंको सुनो ॥ २६ ॥ जो एक वर्णकी हो और

क्रव्यादमृगपादाङ्का न शस्ताः पक्षिणस्तथा । दिङ्मुखा बहुदीनाश्च दीर्घा ह्रस्वाः क्षतान्विताः ॥२४॥ विवर्णाः स्फुटिता भग्नाः सन्त्याज्या लक्षणच्युताः । प्रशस्तप्राणिरूपाङ्काः प्रशस्तद्रव्यलाञ्छिताः ॥२५॥ यथोक्तलक्षणोपेताः शिला नित्यं सुखावहाः । इष्टकानां समासेन लक्षणं शृणु साम्प्रतम् ॥२६॥ एकवर्णाः सुपक्वाश्च बहुजीर्णाश्च वर्जिताः । अप्यङ्गारान्विता नेष्टाः कृष्णवर्णा सशर्कराः ॥२७॥ भग्नाश्च विभ्रमैर्हीना वर्ज्जनीयाः प्रयत्नतः । सुप्रमाणा रक्तवर्णाश्चतुरस्रा मनोरमाः ॥ २८ ॥ नन्दाद्या गृहमानेन अङ्गुलैः परिकल्पिताः । शिलान्यासः प्रकर्तव्यः प्रासादे तु शिलामये ॥२९॥ इष्टकानां तु विन्यासः प्रासादे चेष्टकामये । तस्याः पीठं प्रकुर्वीत तावदेव प्रमाणतः ॥ ३० ॥

भलीप्रकार पकी हो वे श्रेष्ठ होती हैं और जो अत्यंत जीर्ण अर्थात पुरानी वा भुरभुरी हों वे वर्जित हैं और अंगारोंसे युक्त (जली) और कृष्णवर्णकी और कंकरों सहित ईंट श्रेष्ठ नहीं होतीं ॥ २७ ॥ भग्न विभ्रमसे हीन (ऊंची नीची) वे भी यत्नसे वर्जने योग्य हैं और श्रेष्ठप्रमाण सहित रक्तवर्णको चतुरस्र (चौकोर) और मनोरम ईंट श्रेष्ठ होती हैं ॥ २८ ॥ नंदा आदि शिला गृहके मानके अनुसार अंगुलोंसे युक्त होनी चाहिये और शिलाओंसे बनेहुए प्रासादमें शिलाओंका न्यास करना ॥ २९ ॥ ईंटोंसे बनेहुए प्रासादमें ईंटोंका

विन्यास (लगाना) और उतनेही प्रमाणसे उसके जो पीठ वह भी करवाना ॥ ३० ॥ आधार नामकी जो शिला है वह भली प्रकार दृढ और अच्छी मनोहर हों शैलके मंदिरमें शैलका और ईंटोंकेमें ईंटका पीठ कहा है ॥ ३१ ॥ शिलाओंका न्यास आदि जो है उसको भद्र-नामके मंदिरमें मूलपाद कहते हैं चार वेदियोंसे युक्त गर्तोंको चारों कोणमें बनवाकर ॥ ३२ ॥ उनके ऊपर शुक्ल तण्डुलोंका पूरण करे और आग्नेयआदि क्रमसे उनके स्थानोंकी कल्पना करै ॥ ३३ ॥ वहां आधारशिलाको रखकर और स्थिरो भव० इस मन्त्रसे उसकी प्रतिष्ठा करके

आधारनामा तु शिला सुदृढा सुमनोहरा । शैलजे शैलजः पीठश्चैष्टके चैष्टकः स्मृतः ॥ ३१ ॥ शिलान्यासादिको भद्रे मूलपादो विधीयते । गर्तान् विधाय कोणेषु चतुर्वेदिसमन्वितान्॥३२॥ तत्रोपरि च शुक्लानां तण्डुलानां च पूरणम् । आग्नेयादिक्रमेणैव तासां स्थानानि कल्पयेत् ॥ ३३ ॥ तत्राधारशिलां न्यस्य स्थिरो भवेति मन्त्रतः । प्रतिष्ठाप्य चतुर्ष्वेव कोणेषु च निधाय च ॥३४॥ तेषां क्रमेण तन्मध्ये कलशं स्थापयेत् क्रमात् । पद्मश्चैव महापद्मः शंखो मकरकस्तथा ॥ ३५ ॥ चत्वारः कलशा ह्येते दिव्या मंत्रेण मंत्रिताः । पल्लवैस्सर्वगन्धैश्च सर्वौषधिभिरन्विताः ॥३६॥ रत्नैः समुद्रजैर्युक्ताश्चाष्टधातुभिरन्विताः । पुण्यतीर्थोदकैर्युक्ताः कृत्वोदुम्बरसम्भवाः ॥३७॥ तत्रोपरि न्यसेन्नन्दां सुलग्ने च शुभे दिने । संस्नाप्य पूर्णतोयेनास्त्रायफडिति मन्त्रतः ॥३८॥

और चारों कोणोंमें शिलाओंको रखकर ॥ ३४ ॥ उनके मध्यमें और रखनेके क्रमसे कलशका स्थापन करे उनके और पद्म महापद्म शंख और मकर ॥ ३५ ॥ ये सुंदर चार कलश मन्त्रोंसे अभिमंत्रित और पंचपल्लव पंचगंध और सर्वौषधियुक्त हों ॥ ३६ ॥ समुद्रसे पैदाहुए रत्न और श्रेष्ठ धातुओंसे और पवित्र तीर्थोंके जलोंसे युक्त हों और गूलरके पत्ते भी उनमें हों ॥ ३७ ॥ उन कलशोंके ऊपर शुभदिन और शुभ लग्नमें

पुनः स्नात्वाथ मन्त्रेण संमार्ज्य परिपूरयेत् । ॐ नन्दायै नमो गन्धाद्युपचारान् प्रदापयेत् ॥ ३९ ॥ गीतवादित्रघोषेण वेदध्वनि युतेन च । प्रागुत्तरशिरस्कां तां स्थापयेत् प्रयतः शुचिः ॥४०॥ ततोऽस्त्रतोयं संगृह्य फडिति पूजयेत्पुनः । दिव्यरूपां सुवर्णाभां सर्वाभरणभूषिताम् । सर्वलक्षणसंपूर्णां परितुष्टां स्मिताननाम् ॥ ४१ ॥ ध्यात्वा स्वमंत्रमुच्चार्य प्रणम्य च पुनः पुनः ॥ ४२ ॥ आवाहयेत्ततो नन्दां मन्त्रैर्वैदिकतान्त्रिकैः । संपूजयेत्पुनस्तां च वस्त्रगन्धादिनामतः ॥४३ ॥ धूपयित्वाथ सामान्यमुद्रां बद्ध्वाथ मंत्रवित् । कल्पयेच्चैव नैवेद्यं दधिमांसादिसंयुतम् ॥ ४४ ॥ नन्दायै नम एह्येहि पूजयेच्छुद्धमानसः। ॐ नन्दे त्वं नन्दिनी पुंसां त्वामत्र स्थापयाम्यहम् ॥ ४५ ॥

नन्दानामकी शिलाका स्थापन करै और पूर्णजलसे अस्त्राय फट् इस मन्त्रको पढकर और स्नान कराकर ॥ ३८ ॥ फिर स्नान करके और मन्त्रसे संमार्जन करके चारोंतरफसे पूर्ण करदे । ॐ नन्दायै नमः इस मन्त्रको पढ करके गन्ध आदि पूजाकी सामग्रियोंको चढावे ॥ ३९ ॥ गीत वादित्रके शब्द और वेदकी ध्वनिसे युक्त पूर्व और उत्तरको है शिर जिसका ऐसी उस शिलाका शुद्ध होकर स्थापन करे ॥ ४० ॥ फिर अस्त्रके जलको लेकर अस्त्रायफट् इसको पढकर फिर पूजन करै. सुन्दर रूपवाली सुवर्णकीसी जिसकी कान्ति संपूर्ण आभूषणोंसे सुशोभित समस्त उत्तम लक्षणोंसे युक्त प्रसन्नहुई और कुछ हँसतासा है मुख जिसका ॥ ४१ ॥ ऐसी उस शिलाका ध्यान करे और उसी शिलाके मंत्रको उच्चारण करके बारम्बार नमस्कार करै ॥ ४२ ॥ फिर वेद और शास्त्रोंके मन्त्रसे नंदानामकी शिलाका आवाहन करे और उसका वस्त्र गन्ध आदिसे पूजन करे ॥ ४३ ॥ अष्टगन्ध आदिकी धूपको देकर मन्त्रका जाननेवाला सामान्य मुद्रा (बद्धांजलि) से दधि मांस आदि सहित नैवेद्यका ॥ ४४ ॥ अर्पण करे नन्दानामकी शिलाको नमस्कार है तू यहां आकर प्राप्त हो २. ऐसा कहकर शुद्धमनसे पूजन

करे हे नन्दे ! तू मनुष्योंको सदैव आनन्दकी देनेवाली है तेरा इस जगह स्थापन करताहूं ॥ ४५ ॥ तू इस प्रासादमें जबतक चन्द्रमा और तारागण हैं तबतक स्थिर रहिये और जिससे तू मनुष्योंको सदैव आयु वांछित फल और लक्ष्मीको देती है ॥ ४६ ॥ इससे तू इस प्रासादकी रक्षा यत्नसे सदैव रख इनही मन्त्रोंसे फिर आग्नेयीदिशामें उसका स्थापन करे ॥ ४७ ॥ फिर उसी प्रकार नाममंत्र (भद्रायै नमः) से भद्रा शिलाका पूजन करै और हे भद्रे ! हे कश्यपकी पुत्रि ! तू लोकोंको सदा भद्र (कल्याण) कर ॥ ४८ ॥ हे देवि ! तू लोकोंको अवस्था

प्रासादे तिष्ठ संहृष्टा यावद्वै चन्द्रतारकम् । आयुष्कामं श्रियं नन्दे ददासि त्वं सदा नृणाम् ॥ ४६ ॥ अस्मिन्रक्षा त्वया कार्या प्रासादे यत्नतः सदा । इति मंत्रं समुच्चार्य आग्नेये तु ततः परम् ॥ ४७ ॥ भद्रां संपूजयेत्तद्वन्नाममन्त्रेण पूर्ववत् । भद्रे त्वं सर्वदा भद्र लोकानां कुरु काश्यपि ॥ ४८ ॥ आयुष्कामप्रदा देवि लोकानां चैव सिद्धिदा । नैर्ऋत्ये स्थापयेत्तां च जयां तद्वत्प्रपूजयेत् ॥ ४९ ॥ नाममन्त्रेण पूर्वोक्तमन्त्रेण च तथा पुनः । ॐ जये त्वं सर्वदा भद्रे सन्तिष्ठ स्थापयाम्यहम् ॥ ५० ॥ नित्यं जयावहा दिव्या स्वामिनः शीघ्रदा भव । वायव्ये स्थापयेत्तां च जयां सर्वार्थसिद्धये ॥ ५१ ॥ ईशाने स्थापयेत्पूर्णां पूर्ववत्संप्रपूज्य च । ॐ पूर्णे त्वं तु महाविद्ये सर्वसंदोहलक्षणे ॥ ५२ ॥

कामना और सिद्धिकी देनेवाली है इस प्रकार मन्त्रको पढकर नैर्ऋतदिशामें स्थापन करै और उसके अनन्तर तिसी प्रकार जया शिलाका ॥ ४९ ॥ नाममंत्र और पूर्व कहेहुए मन्त्रोंसे नैवेद्य आदिका अर्पण और पूजन करके हे जये ! तू सदा कल्याणरूप है तुझे स्थापन करताहूं सदा स्थिर रहिये ॥ ५० ॥ अपने स्वामीको सदैव शीघ्र जयके देनेवाली हो इस मन्त्रको पढकर उस जया नामकी शिलाको सब अर्थोंकी सिद्धिके लिये वायव्यदिशामें स्थापन करै ॥ ५१ ॥ पूर्वकी समान पूजन करके हे पूर्णे ! तू महाविद्यारूप है, संपूर्ण कामनाओंको देनेवाला

तेरा स्वरूप है ॥ ५२ ॥ इस प्रासादमें सब कार्यको संपूर्णकर इस मन्त्रसे ईशानमें स्थापन करै फिर उसके पीछे घरके स्वामीके शुभकी इच्छा करनेवाला पुरुष शिला और इष्टिकाओंके स्तुतिवाक्योंको पढ़ै और बछडा सुवर्ण सहित गौको आचार्यके लिये दे ॥ ५३ ॥ ५४ ॥ अपनी शक्तिके अनुसार ऋत्विज और शिष्टजनोंको दक्षिणा दे और ज्योतिषी और स्थपतिका विशेषकर पूजन करै ॥ ५५ ॥ ब्राह्मणोंको यथाशक्ति भोजन करावै, दीन और अन्धोंको अन्न आदि देकर प्रसन्न करै इस प्रकार वास्तुबलिको करके षोडशभागको लेकर ॥ ५६ ॥ उसके

संपूर्णं सर्वमेवात्र प्रासादे कुरु सर्वदा । शिलानामिष्टकानां तु वाचनं तदनन्तरम् ॥ ५३ ॥ न कर्तव्यं तु मनसा पितुस्तु शुभ मिच्छता । आचार्याय च गां दद्यात्सवत्सां हेमसंयुताम् ॥ ५४ ॥ ऋत्विग्भ्यो दक्षिणां दद्याच्छिष्टेभ्यश्च स्वशक्तितः । दैवज्ञं पूजयेच्छक्त्या स्थपतिं च विशेषतः ॥ ५५ ॥ ब्राह्मणान् भोजयेच्छक्त्या दीनान्धांश्चैव तोषयेत् । एवं वास्तुबलिं कृत्वा भजेत् षोडशभागिकाम् ॥ ५६ ॥ तस्य मध्ये चतुर्भागं तस्मिन् गर्भं च कारयेत् । भागद्वादशकं सार्द्धं ततस्तु परिकल्पयेत् ॥ ५७ ॥ चतुर्भागेन भित्तीनामुच्छ्रायः स्यात्प्रमाणतः । द्विगुणः शिखरोच्छ्रायो भित्त्युच्छ्रायाच्च मानतः ॥ ५८ ॥ शिरोर्द्धार्धस्य चार्द्धेन विधेया तु प्रदक्षिणा । चतुर्दिक्षु तथा ज्ञेयो निर्गमेषु तथा बुधैः ॥ ५९ ॥

मध्यमें चार भागके उसमें गर्भको करै और ॥ १२ ॥ साढेबारह भाग उसके चारोंतरफ कल्पना करै ॥ ५७ ॥ और स्थानके चौथाई भागके प्रमाणसे भित्तियोंको ऊंचाईका प्रमाण रक्खै और भित्तियोंकी ऊंचाईसे दुगुना प्रमाण कितनी शिखरोंकी ऊंचाई रक्खै ॥ ५८ ॥ और शिरके आठवें भागसे प्रदक्षिणा बनवानी और चारों दिशाओंमें जो निर्गमके स्थान हैं उनमें वह प्रदक्षिणा जाननी ॥ ५९ ॥

भागके दो गर्भ सूत्र मण्डपके विस्तारमें होते हैं उनका आय विभागके अंशोंसे भद्रसे युक्त और अत्यन्त शोभन होता है, गर्भके मानको पांचपें भागसे बुद्धिमान् मनुष्य विभाग करके ॥ ६० ॥ उनमेंसे एकभाग ग्रहण करके बुद्धिमान् मनुष्य प्राग्जीव (द्वार) की कल्पना करै भागोंमें गर्भरूपके समान उसके आगे मुखमण्डप होता है इस ग्रन्थमें यह प्रासादका सामान्य लक्षण कहा ॥ ६१ ॥ इसके अनन्तर और भी लिंग और प्रासादके लक्षणको कहताहूं–लिंग पूजाके प्रमाणसे पीठिका बनवावे ॥ ६२ ॥ पीठिकाके आधेभागके प्रमाणसे भित्ति बनवानी और

गर्भसूत्रद्वयं भागे विस्तारे मंडपस्य तु । आयस्तस्य विभागांशैर्भद्रयुक्तः सुशोभनः । पञ्चभागेन संभज्य गर्भमानं विचक्षणः ॥ ६० ॥ भागमेकं गृहीत्वा तु प्राग्जीवं कल्पयेद्बुधः । गर्भसूत्रसमो भागादग्रतो मुखमण्डपः । एतत्सामान्यमुद्दिष्टं प्रासादस्येह लक्षणम् ॥ ६१ ॥ अथान्यच्च प्रवक्ष्यामि प्रासादं लिङ्गमानतः । लिङ्गपूजाप्रमाणेन कर्तव्या पीठिका बुधैः ॥६२॥ पीठिकार्द्धेन भागे स्यात्तन्मानेन तु भित्तयः । बाह्यभित्तिप्रमाणेन उत्सेधस्तु भवेत्ततः ॥६३॥ भित्त्युच्छ्रायात्तु द्विगुणः शिखरस्य समुच्छ्रयः । शिखरस्य चतुर्भागाः कर्तव्यास्स्युः प्रदक्षिणाः ॥६४॥ प्रदक्षिणायास्तु समस्त्वग्रतो मण्डपो भवेत् । तस्य चार्द्धेन कर्तव्यस्त्वग्रतो मुखमण्डपः ॥६५॥ प्रासादान्निर्गतौ कार्यौ कपोतौ गर्भमानतः । ऊर्ध्वं भित्त्युच्छ्रयौ तस्य मञ्जरीं तु प्रकल्पयेत् ॥ ६६ ॥

बाहरकी भित्तिके प्रमाणसे ऊंचाई होती है ॥ ६३ ॥ भित्तिके ऊंचाईसे दूनी शिखरकी ऊंचाई होती है और शिखरसे चौथे भागोंकी प्रदक्षिणा बनवानी ॥ ६४ ॥ प्रदक्षिणाके समान आगेका मण्डप होता है और उससे आधा अग्रभागमें मुखमण्डप बनवाना ॥ ६५ ॥ प्रासादसे निकसते हुए गर्भके प्रमाणसे दो कपोत बनवाने और वे ऊपरको भित्तिके समान ऊंचे हों और उनकी मंजरीभी बनवानी ॥ ६६ ॥

मंजरीभी प्रमाणसे डेढगुणी शुकनासिकाको बनवावे और उसके ऊपर उससे आधा वेदीबन्ध होता है ॥ ६७ ॥ वेदीके ऊपर जो शेष कण्ठ है वह आमलकसार कहाता है इस प्रकार विभाग करके बुद्धिमान् मनुष्य शोभन प्रासादको बनवावे ॥ ६८ ॥ इसके अनन्तर औरभी प्रासादका लक्षण हम कहते हैं-हे द्विजो ! गर्भोंके प्रमाणसे उस प्रासादके प्रमाण तुम सुनो ॥ ६९ ॥ नौभागमें प्रासादके गर्भको अर्थात् मध्यकी संपूर्ण भूमिको विभाग करके मंदिरके सुंदर ८ आठ पादोंकी चारों तरफ पीठिकाकी कल्पना करे ॥ ७० ॥ इसी मानसे भित्तियोंका विस्तार

मञ्जर्या सार्द्धमानेन शुकनासं प्रकल्पयेत् । ऊर्द्धं तथार्द्धभागेन वेदीबन्धो भवेदिह ॥ ६७ ॥ वेद्याश्चोपरि यच्छेषं कण्ठमामल सारकम् । एवं विभज्य प्रासादं शोभनं कारयेद्बुधः ॥६८॥ अथान्यच्च प्रवक्ष्यामि प्रासादस्येह लक्षणम् । गर्भमानेन प्रासाद प्रमाणं शृणुत द्विजाः ॥६९॥ विभज्य नवधा गर्भं मध्ये लिङ्गस्य पीठिका । पादाष्टकं तु रुचिरं पार्श्वतः परिकल्पयेत् ॥७० ॥ मानेनानेन विस्तारो भित्तीनां तु विधीयते । पादे पञ्चगुणं कृत्वा भित्तीनामुच्छ्रयो भवेत् ॥ ७१ ॥ स एव शिखरस्यापि द्विगुणः स्यात्समुच्छ्रयः । चतुर्धा तु शिरो भज्य अर्द्धं भागद्वयस्य वा ॥७२॥ शुकनासं प्रकुर्वीत तृतीये वेदिका मता । कण्ठमामलसारं च चतुर्थे परिकल्पयेत् ॥ ७३ ॥ कपोलयोस्तु संहारो द्विगुणोऽस्य विधीयते । शोभनैर्वप्रवल्लीभिरण्डकैश्च विभूषितः ॥ ७४ ॥

कहा है. एक पादकी पांच गुणा करके भित्तियोंकी ऊंचाई होती है ॥ ७१ ॥ वही दूनी शिरकी ऊँचाई होती है. शिखरकी चौथाई अथवा दो भागका जो अर्ध भाग उसके प्रमाणकी ॥ ७२ ॥ शुकनासिकाको बनवावे. अमलसार नामका जो कण्ठ है वह चौथा भागका बनवावे ॥ ७३ ॥ उसके कपोलोंका संहार (प्रमाण) दूना कहा है. वह शोभन वप्रवल्ली और अण्डकोंसे विभूषित होता है ॥ ७४ ॥

प्रासादके विषे जो तीसरा प्रमाण है वह तुम्हारे प्रति कहा. तिसी प्रकार प्रासादके विषै अन्य प्रमाणको भी सामान्यरीतिसे तुम सुनो ॥ ७५ ॥ जिसमें देवता टिकते हैं उस प्रासादके भेदके तीन विभाग करले. प्रमाणसे रथको बनवाकर उसके वामभागमें चलावे ॥ ७६ ॥ प्रासादके चारों तरफ एकपादकी नेमि बनवावे गर्भको दूना करके जो प्रमाण हो वही नेमिका मान होता है ॥ ७७ ॥ यही भित्तियोंकी ऊँचाई होती है. उससे दूना शिखर होता है, उसके पांचवें भागका पूर्वको है ग्रीवा जिसकी ऐसा निःश्वास कहाता है ॥ ७८ ॥ प्राकारके शिखरको

प्रासादे यस्तृतीयस्तु मया तुभ्यं निवेदितः । सामान्यमपरं तद्वत्प्रासादं शृणुत द्विजाः ॥ ७५ ॥ त्रिभेदं कारयेत्क्षेत्रं यत्र तिष्ठन्ति देवताः । रथं कृत्वा तु मानेन बाह्यभागविनिर्गतम् ॥ ७६ ॥ नेमी पादेन विस्तीर्णा प्रासादस्य समन्ततः । गर्भं तु द्विगुणं कुर्यान्नेमिमानं भवेदिह ॥ ७७ ॥ स एव भित्तीनामुत्सेधो द्विगुणः शिखरो मतः । प्राग्ग्रीवं पञ्चभागेन निःश्वासस्तस्य चोच्यते ॥७८॥ कारयेच्छिखरं तद्वत्प्राकारस्य विधानतः । प्राग्ग्रीवं तस्य मानेन निष्कांशेन विशेषतः ॥ ७९ ॥ कुर्याद्वा पञ्चभागेन प्राग्ग्रीवं कर्णमूलतः । कारयेत्कनकं तत्र गर्भान्ते हारमूलतः ॥ ८० ॥ एवं तु त्रिविधं कुर्याज्ज्येष्ठमध्यकनीयसम् । लिंगमानानुभेदेन रूपभेदेन वा पुनः ॥ ८१ ॥ एते सामान्यतः प्रोक्ता नामतः शृणुताधुना ॥ मेरुमन्दरकैलासकुम्भसिंहमृगास्तथा ॥ ८२ ॥

भी विधिसे बनवावे. उनके विशेषकर निष्क अंशके प्रमाणसे शिखरकी ग्रीवाको पूर्वदिशाको रक्खै ॥ ७९ ॥ अथवा कर्णमूलके पांचवें भागसे पर्वको जिसकी ग्रीवा हो ऐसा शिखर बनवावै. उसमें गर्भके अन्तमें हारके मूलसे लेकर कनक बनवावै ॥ ८० ॥ इस प्रकार ज्येष्ठ मध्यम और कनिष्ठके भेदसे लिंगमान वा रूपभेदसे तीन प्रकारके शिखरको बनवावै ॥ ८१ ॥ ये शिखर सामान्यसे कहे, अब शिखरोंके नामोंको तुम सुनो:-

मेरु मन्दर कैलास कुम्भ सिंह और मृग ॥ ८२ ॥ विमानछन्दक और चतुरस्र (चौकोर) अष्टास्र (अठकोना) और षोडशास्र (सोलह कोना) वर्तुल (गोल) सर्वभद्रक ॥ ८३ ॥ सिंहनन्दन और नन्दिवर्द्धन सिंह वृष सुवर्ण पद्मक और समुद्रक ॥ ८४ ॥ ये नामसे कहे हैं. हे द्विजो ! इनके विभागको तुम सुनो–शतशृंग हों और चार जिसके द्वारहों भूमिकाके सोलह भागसे ऊंचा हो ॥ ८५ ॥ नानाप्रकारकी जिसकी विचित्र शिखर हों उसको मेरुप्रासाद कहते हैं. जो बारह चौकका हो वा जिसकी बारह शिखर हों उसको मन्दर कहते हैं. जिसमें नौ

विमानच्छन्दकस्तद्वच्चतुरस्रस्तथैव च । अष्टास्रः षोडशास्रश्च वर्तुलः सर्वभद्रकः ॥ ८३ ॥ सिंहश्च नन्दनश्चैव नन्दिवर्द्धन एव च । सिंहो वृषः सुवर्णश्च पद्मकोऽथ समुद्रकः ॥८४॥ प्रासादा नामतः प्रोक्ता विभागं शृणुत द्विजाः । शतशृङ्गश्चतुर्द्वारो भूमिकापोडशोच्छ्रितः ॥ ८५ ॥ नानाविचित्रशिखरो मेरुप्रासाद उच्यते । मन्दरो द्वादशः प्रोक्तः कैलासो नवभूमिकः ॥८६॥ विमानच्छन्दकं तद्वदनेकशिखरानतः । स चाष्टभूमिकस्तद्वत्सप्तभिर्नन्दिवर्द्धनः ॥ ८७ ॥ विंशाण्डकसमायुक्तो नन्दनः समुदाहृतः । षोडशास्रकसंयुक्तो नानारूपसमन्वितः ॥ ८८ ॥ अनेकशिखरस्तद्वत्सर्वतोभद्र उच्यते । चन्द्रशालासमोपेतो विज्ञेयः पञ्चभूमिकः॥८९॥ वलभीच्छन्दकस्तद्वच्छुकनासस्रयान्वितः । वृषस्योच्छ्रायतस्तुल्यो मण्डितश्चित्रवर्जितः ॥ ९० ॥

९ भूमि हो उसे कैलास कहते हैं ॥ ८६ ॥ अनेक शिखरोंसे जिसका विस्तार हो उसे विमानच्छन्दक कहते हैं और उसकी भूमि (चौक) आठ होती है. जिसकी सात भूमि हों वह नन्दिवर्द्धन होता है ॥ ८७ ॥ बीस जिसकी कोन समान हों वह नन्दन कहा है. जिसकी सोलह १६ कोनहों और जो नानारूपसे युक्त हो ॥ ८८ ॥ अनेक जिसकी शिखरहों उसको सर्वतोभद्र कहते हैं. और वह चंद्रशालासे युक्त होता है उसकी भूमि पांच होती हैं ॥ ८९ ॥ तिसी प्रकार शुककी (तोताकी) नासिकाके समान जो कोनोंसे युक्तहो और वृषकी ऊँचाईके तुल्य

हो मण्डितहो चित्रोंसे वर्जितहो वह वलभीच्छन्दक कहाता है ॥ ९० ॥ सिंहके समान जो दीखै वह सिंह और गजके समान जो दीखै वह गज कहाता है. कुम्भके समान जिसका आकारहो वह कुंभ कहाता है उसकी ऊँचाई भूमिके नवम भागकी होती है ॥ ९१ ॥ अंगुलीके पुटके समान जिसकी स्थितिहो पांच अण्डकोशसे जो भूषित हो और चारों तरफसे जिसकी सोलह कोन हों उसको सामुद्रिक कहते हैं ॥ ९२ ॥ जिसके दोनों पार्श्वभागोंमें चन्द्रशालाके समान मुख हों और ऊंचाहो दो जिसकी भूमिहों जो उतनाही ऊंचा हो और दोही जिसकी भूमि हों वह पद्मक कहा है ॥ ९३ ॥ जिसकी सोलह अस्र और विचित्र शिखर होती हैं वह मन्दिर शुभदायी होता है. जो चन्द्र

सिंहः सिंहगतिर्ज्ञेयो गजो गजसमस्तथा । कुम्भः कुम्भाकृतिस्तद्वद्भूमिकानवकोच्छ्रयः ॥ ९१ ॥ अङ्गुलीपुटसंस्थानपञ्चाण्डकविभूषितः। षोडशास्रः समन्तात्तु विज्ञेयः ससमुद्रकः॥९२॥पार्श्वयोश्चन्द्रशालस्य उच्छ्रायो भूमिकाद्वयम् । तथैव पद्मकः प्रोक्त उच्छ्रायो भूमिकाद्वयम् ॥९३॥ षोडशास्रः स विज्ञेयो विचित्रशिखरः शुभः । मृगराजस्तु विख्यातश्चंद्रशालाविभूषितः ॥ ९४ ॥ प्राग्ग्रीवेण विशालेन भूमिकासषडुन्नता । अनेकचन्द्रशालस्तु गजप्रासाद उच्यते ॥९५॥पर्यङ्कगृहराजो वै गरुडो नामनामतः । सप्तभूम्युच्छ्रय स्तद्वच्चन्द्रशालात्रयान्वितः॥९६॥ भूमिकास्तु षडशीतिर्बाह्यतः सर्वतो भवेत् । तथान्यो गरुडस्तद्वदुच्छ्रायो दशभूमिकः ॥ ९७ ॥

शालासे विशेषकर भूषित हो वह मृगराजनामसे प्रसिद्ध है ॥ ९४ ॥ जिसकी विशाल पूर्वको ग्रीवाहो भूमिके छठेभागकी ऊंचाई हो वह मृगराज कहाता है. अनेक जिसमें चन्द्रशाला हों वह गजप्रासाद कहाता है ॥ ९५ ॥ पर्य्यंक गृहराज वा नामसे जिसे गरुड कहते हैं जिसकी सातभूमिके भागकी ऊंचाई हो और जिसमें तीन चन्द्रशाला हों ॥ ९६ ॥ जिसके चारों तरफ बाह्यदेशमें छियासी गज वा हाथ भूमिहो वहभी एक प्रकारका गरुडमंदिर कहा है. जिसकी ऊंचाई भूमिके दशभागको होती है ॥ ९७ ॥

जिसकी सोलह अरत्नियों और दो भूमि जिसमें अधिक हों वह पद्मक कहाता है. पद्मकके तुल्य जिसका प्रमाण हो वह श्रीतुष्टक कहाता है, पांच जिसके अण्डहों, तीन जिसकी भूमि हों, गर्भमें जिसके चार हाथ हों ॥ ९८ ॥ वह वृष नामसे होता है. वह प्रासाद सब कामनाओंको देता है, सप्तक और पंचकनामसे जो प्रासाद हमने कहे हैं, वे सिंह नामके प्रासादके समान जानने. जो अन्य प्रासाद अन्य प्रमाणसे ॥ ९९ ॥ चंद्रशालाओंके युक्त कहे हैं, वे सब प्राग्ग्रीवके युक्त होते हैं. ईंटोंके वा काष्ठके वा पत्थरके होते हैं. तोरणोंसहित होते हैं मेरु नामका मन्दिर

पद्मकः षोडशास्रस्तु भूमिद्वयमथाधिकः । पद्मतुल्यप्रमाणेन श्रीतुष्टक इति स्मृतः । पञ्चांडकस्त्रिभूमिस्तु गर्भे हस्तचतुष्टयम् ॥ ९८ ॥ वृषो भवति नाम्ना यः प्रासादः सर्वकामिकः । सप्तकाः पञ्चकाश्चैव प्रासादा येमयोदिताः। सिंहस्य ते समा ज्ञेया ये चान्येऽन्यप्रमाणतः ॥ ९९ ॥ चंद्रशालैस्समोपेताः सर्वे प्राग्ग्रीवसंयुताः । ऐष्टिका दारवाश्चैव शैलजाश्च सतोरणाः । मेरुः पञ्चाशद्धस्तः स्यान्मन्दारः पञ्चहीनकः ॥ १०० ॥ चत्वारिंशत्तु कैलासश्चतुस्त्रिंशद्वितानकः । नंदिवर्द्धनकस्तद्वद्वात्रिंशत्समुदाहृतः । त्रिंशद्भिर्नन्दनः प्रोक्तः सर्वतोभद्रकस्तथा ॥ १०१ ॥ एते षोडशहस्ताः स्युश्चत्वारो देववल्लभाः । कैलासो मृगराजस्तु वितान च्छंदको गजः ॥१०२॥ एते द्वादशहस्ताः स्युरेतेषां सिंहनादकः । गरुडोऽष्टकरो ज्ञेयः सिंहो दश उदाहृतः ॥ १०२ ॥

५० पचास हाथका और मन्दर ४५ पैंतालीस ॥ १०० ॥ कैलास ४० चालीस हाथका, वितानक ३४ चौंतीस हाथका, बत्तीस ३२ हाथका नन्दिवर्द्धन कहा है. तीस ३० हाथका नन्दन और सर्वतोभद्रक कहा है ॥ १०१ ॥ ये चारों १६ सोलह हाथके देवताओंको प्यारे होते हैं. कैलास मृगराज वितानच्छन्दक और गज ॥ १०२ ॥ ये बारह हाथके होते हैं. इनमें सिंहनादक गरुडके आठ कोन होते हैं. सिंहके दश

१० कोन कहे हैं ॥ १०३ ॥ इसी प्रमाणसे शुभ है लक्षण जिनका ऐसे शुभ प्रासाद बनाने, यक्ष राक्षस नाग इनका आठ ८ हाथका मन्दिर श्रेष्ठ होता है ॥ १०४ ॥ तैसेही मेरु आदि सात ज्येष्ठ (उत्तम) लिंगके शुभदायी कहे हैं. जो मध्यमें श्रीवृक्षक आदि आठ ८ कहे हैं॥१०५॥ हंस आदि जो पांच कहे हैं वे सब शुभदायी होते हैं, इसके अनन्तर शक्ति सहित लिंगके लक्षणको कहते हैं ॥ १०६ ॥ लिंगकी लम्बाईके अंगुलोंसे बुद्धिमान् मनुष्य लिंगके विस्तारको गिनै और लिंगके विस्तारका जितना मानहो उससे तिगुना विस्तार पीठका होता है ॥ १०७ ॥

एवमेव प्रमाणेन कर्तव्याः शुभलक्षणाः । यक्षराक्षसनागानामष्टहस्तः प्रशस्यते ॥१०४॥ तथा मेर्वादयः सप्त ज्येष्ठलिङ्गाः शुभावहाः । श्रीवृक्षकादयश्चाष्टौ मध्ये यस्य उदाहृताः ॥ १०५॥ तथा हंसादयः पञ्च उक्तास्ते शुभदा मताः । अथातः संप्रवक्ष्यामि शक्त्या लिंगस्य लक्षणम्॥१०६॥लिङ्गदैर्घ्यांङ्गुलैर्लिङ्गं विस्तारं गणयेद् बुधः । लिङ्गविस्तारमानेन त्रिगुणं पीठविस्तरम् ॥१०७॥ गर्भगेहप्रविस्तारं त्रिभागं परिकल्पयेत् । तेषु भागेषु चैकेन पीठविस्तारमाचरेत् ॥ १०८ ॥ दीर्घं कुर्वन्ति पीठानां विष्णुभागावसानकम् । मूले मध्ये तथोर्ध्वे च ब्रह्मविष्णुहरांशकम् ॥ १०९ ॥ पीठिकालक्षणं वक्ष्ये यथावदनुपूर्वशः । पीठोच्छ्राये यथावच्च भागान् षोडश कारयेत्॥११०॥भूमावेकः प्रविष्टः स्याच्चतुर्भिर्जगती मता । वृत्तो भागस्तथैकः स्याद्वृत्तादूर्द्धस्तु भागतः ॥१११॥

गर्भगेहका जो विस्तार है उसके तीन भागकी कल्पना करे उन भागोंमें एक भागसे पीठका विस्तार करे ॥ १०८ ॥ विष्णुके भागपर्यन्त पीठोंकी दीर्घताको करे, मूल मध्य ऊर्ध्व भागमें ब्रह्मा विष्णु और शिव इनके अंशोंको रक्खे ॥ १०९ ॥ अब क्रम क्रमसे पीठिकाके यथार्थ लक्षणको कहता हूं-पीठकी ऊंचाईमें यथायोग्य सोलह भागोंको करे ॥ ११० ॥ उनमेंसे १ एक भाग भूमिमें प्रविष्ट होता है. चार भागोंकी

जगती कहाती है एक भागका वृत्त होता है, वृत्तके भागसे ऊर्ध्वभाग होता है ॥ १११ ॥ तीन भागोंसे कण्ठ होता है, कण्ठके तीसरे भागका पद होता है ऊर्ध्वमें जो एक भाग है उसके शेषभागकी पट्टिका होती है ॥ ११२ ॥ जहांतक जगती है वहांतक एक भाग भूमिमें प्रविष्ट होता है. उस जगतीका अर्थात् जलके प्रवाहका निर्गम शेषपट्टिका पर्य्यंत होता है अर्थात् मकानके पुस्तेतक जगती बनावे. जलके निकसनेके लिये वह प्रमाणसे बनवानी ॥ ११३ ॥ लिंग बाण आदिकोंको सात अंश वा तीन भागसे बनवावे अथवा ५ पांच भाग वा दो भाग जिस प्रकार

भागैस्त्रिभिस्तथा कण्ठं पदं कण्ठत्रिभागतः । भागैकमूर्ध्वके यश्च शेषभागेन पट्टिका ॥ ११२ ॥ प्रविष्टं भागमेकं तु जगती याव देव तु । निर्गमस्तु पुनस्तस्या यावद्वै पोषपट्टिका । वारिनिर्गमनार्थस्तु तत्र कार्यं प्रमाणतः ॥ ११३ ॥ बाणलिङ्गादिकं कुर्यात् सप्तांशं वा त्रिभागितम् ॥ पञ्चाभागं द्विभागं वा यथायोग्यं यथास्थिरम् । सप्तभागकृते लिङ्गे चतुरंशान्निवेदयेत् ॥ ११४॥ पीठ मध्यगते गर्ते त्रिभागं चैकभागकम् । पञ्चभागे तु भागांस्त्रीन्द्विभागेऽर्द्धं यथाक्रमम् ॥ ११५ ॥ एवं बाणादिलिङ्गानां प्रवेशः शंक रोदितः । स्थूलं शिरः कृशं मूलमुन्नते तन्मुखं शिरः ॥ ११६ ॥ निम्नपृष्ठमिति ख्यातं बालगेहादिलिङ्गके । अज्ञातमुखपृष्ठानां कन्यास्पृष्टं मुखं शिरः ॥ ११७ ॥

शिर रहै उस प्रकार यथायोग्य बनवावे सातभागसे बनाये लिंगमें चार अंशोंको बनवावे ॥ ११४ ॥ पीठके मध्यमें जो गर्त है उससे तीसरा वा एक भागका और पांच भागके गर्तमें तीन भाग और दो भागके गर्तमें आधाभाग क्रमसे रक्खे ॥ ११५ ॥ इसी प्रकार बाणआदि लिंगोंका प्रवेश शिवजीने कहा है. शिर स्थूल हो, मूल कृश हो और उन्नत (ऊंचे) में उसके मुखमें शिर हो ॥ ११६ ॥ जिसका पृष्ठभाग

१ 'लिङ्गबाणादिकम्' इति पाठान्तरम् ।

नीचा हो ऐसा चिह्न बाण गेह आदि लिंगमें होता है. जिनके मुख और पृष्ठभाग आदिका ज्ञान न हो उनका शिर ऐसा होना चाहिये जिसके मुखका स्पर्श कन्या करसके ॥ ११७ ॥ ज्येष्ठ मध्यम कनिष्ठ भेदसे तीन प्रकारकी ब्रह्माकी शिला होती है उससे तीन गुने विस्तारसे वा अन्य प्रकारसे प्राकार (परकोटा) बनवावे ॥ ११८ ॥ पूर्वोक्त पीठोंके विस्तारसे अधिक अंगुलोंसे तीन भाग पीठके विस्तारको करके उसके एक भागके प्रमाणसे ॥ ११९ ॥ दीर्घ (लंबाई) करे और प्रणाल (पन्नाला) को उसके त्रिभागके एक विस्तारसे बनवावे और ब्रह्मसूत्रके चतु

ज्येष्ठा मध्या कनिष्ठा च त्रिविधा ब्रह्मणश्शिलाः । त्रिगुणं विस्तृतं कुर्यादन्यथा वा प्रकारकः ॥ ११८ ॥ उक्तानामपि पीठानां विस्तारादधिकाङ्गुलैः । त्रिभागपीठविस्तारं कृत्वा तत्रैकभागतः ॥ ११९ ॥ दीर्घं कुर्यात्प्रणालं च तं त्रिभागैकविस्तरम् । ब्रह्म सूत्रचतुष्के तु स्थाप्य कूर्मशिलां ततः । तद्गर्भे विन्यसेत्कूर्मं सौवर्णं द्वादशं मुखम् ॥१२०॥ तत्र रत्नादिभिस्सार्द्धं भूमिं च हृदये न्यसेत् । तत्तद्गर्भं हि तस्यैव नीरन्ध्रं वज्रलेपकैः । लिप्तोऽथ शान्तितोयेन प्रोक्ष्योल्लिख्योक्तवत्ततः ॥ १२१ ॥ ततस्तेजोभि (वि) धां शक्तिं कलितासनरूपिणीम् । स्थापयेच्च सुलग्ने तु दैवज्ञोक्ते मुहूर्तके ॥ १२२ ॥ अथातः संप्रवक्ष्यामि मण्डपानां च लक्षणम् । मण्डपान् प्रवरान् वक्ष्ये प्रासादस्यानुरूपतः ॥ १२३ ॥

ष्कमें कूर्मशिलाके स्थापन करनेके अनन्तर कूर्मशिलाके गर्भमें द्वादश मुख सोनेके कूर्मका स्थापन करे और उस कूर्मके ऊपर ॥ १२० ॥ रत्नआदि सहित भूमिको हृदयके ऊपर स्थापन करे तिसकेही उस उस गर्भको वज्रलेपसे नीरंध्र करे अर्थात छिद्र रहित करदे फिर लीपकर शांतिपाठके जलसे छिड़के और फिर उल्लेखन करै अर्थात् ऊँचे नीचेको एकरस करदे ॥ १२१ ॥ फिर तेज नामकी शक्ति जो कालिताके आसनरूप हो उसका ज्योतिषियोंके बताये हुए श्रेष्ठ मुहूर्तके श्रेष्ठलग्नमें स्थापन करै ॥ १२२ ॥ इसके अनंतर मंडपोंका लक्षण कहता हूँ,

प्रासादके अनुसार उत्तम मंडपोंको कहता हूं ॥ १२३ ॥ श्रेष्ठ मध्यम कनिष्ठ भेदसे अनेकप्रकारके मंडप बनवावे उनको मैं नाम लेलेकर कहताहूं–हे द्विजोंमें श्रेष्ठो ! तुम सुनो ॥ १२४ ॥ पुष्पक, पुष्पभद्र, सुवृत्त, अमृतनंदन, कौशल्य, बुद्धिसंकीर्ण, गजभद्र, और जयावह ॥ १२५ ॥ श्रीवृक्ष, विजय, वास्तुक, अर्णश्रुतंधर, जयभद्र, विलास, सश्लिष्ट, शत्रुमर्दन ॥ १२६ ॥ भाग्यपंच, नंदन, भानव, मानभद्र, सुग्रीव, हर्षण, कर्णिकार, पदाधिक ॥ १२७ ॥ सिंह, याममद्र और शत्रुघ्न ये सत्ताईस मंडप शास्त्रकारोंने कहे हैं अब हे ब्राह्मणो ! इनके लक्षणोंको श्रवण करो

विविधा मण्डपाः कार्याः श्रेष्ठमध्यकनीयसः । नामतस्तान् प्रवक्ष्यामि शृणुध्वं द्विजसत्तमाः ॥ १२४ ॥ पुष्पकः पुष्पभद्रश्च सुवृत्तोऽमृतनन्दनः । कौशल्यो बुद्धिसङ्कीर्णो गजभद्रो जयावहः ॥ १२५ ॥ श्रीवृक्षो विजयश्चैव वास्तुकोऽर्णश्रुतन्धरः । जयभद्रो विलासश्च सश्लिष्टः शत्रुमर्दनः॥१२६॥ भाग्यपञ्चो नन्दनश्च भानवो मानभद्रकः । सुग्रीवो हर्षणश्चैव कर्णिकारः पदाधिकः॥१२७॥ सिंहश्च यामभद्रश्च शत्रुघ्नश्च तथैव च । सप्तविंशतिराख्याता लक्षणं शृणुत द्विजाः ॥ १२८ ॥ स्तम्भा यत्र चतुष्षष्टिः पुष्पकः स उदाहृतः । द्वाषष्टिः पुष्पभद्रस्तु षष्टिस्तु वृत्त उच्यते ॥ १२९ ॥ स्तंभोऽष्टपञ्चाशद्वापि कथ्यतेऽमृतनन्दनः । कौशल्योऽथ द्विपञ्चाशच्चतुःपंचशतात्पुनः॥१३०॥नाम्ना तु बुद्धिसंकीर्णो द्विहीनो राजभद्रकः । जयावहस्त्रिपंचाशच्छीवत्सस्तु द्विहीनकः॥१३१॥

॥ १२८ ॥ जिसमें चौसठ ६४ स्तंभ हों उसको पुष्पक कहते हैं, जिसमें बासठ ६२ स्तम्भ हों उसे पुष्पभद्र और जिसमें साठ ६० स्तम्भ हों उसे वृत्त कहते हैं ॥ १२९ ॥ जिसमें अठावन ५८ स्तम्भ हों उसको अमृतनंदन कहते हैं. जिसमें बावन स्तम्भ हों उसे कौशल्य कहते हैं, चौवन ५४ स्तंभवालेको ॥ १३० ॥ बुद्धिसंकीर्ण कहते हैं. उसमें दो स्तम्भ न्यूनसे हों तो राजभद्रक कहतै हैं. तिरपन ५३ स्तम्भवालेको

जयावह, इक्यावन ५१ स्तंभवालेको श्रीवत्स कहते हैं ॥ १३१ ॥ बत्तीस ३२ स्तंभका मण्डप हर्षण जानना. बीस २० स्तंभका कर्णिकार होता है. अट्ठाईस २८ स्तम्भ जिसमें हों वह पदाधिक होता है. सोलह १६ स्तम्भ जिसमें हों वह सिंह होता है ॥ १३२ ॥ उससे दो न्यूनके स्तम्भको याम और शत्रुघ्न कहते हैं. किसी ग्रंथमें बारह १२ स्तम्भोंसे युक्त यामभद्र कहा है ॥ १३३ ॥ ये पूर्वोक्त मण्डप लक्षणोंसे युक्त यथायोग्य कहे❀ त्रिकोण वृत्तके मध्यमें अष्टकोण षोडशकोण ॥ १३४ ॥ वा चतुष्कोण मण्डपका स्थान बनावे. राज्य विजय अवस्थाकी वृद्धि ॥ १३५ ॥ पुत्र

द्वात्रिंशद्धर्षणो ज्ञेयः कर्णिकारश्च विंशतिः । पदद्विकोऽष्टाविंशतिभिर्द्विरष्टो सिंह उच्यते ॥१३२॥ द्विहीनो यामभद्रस्तु शत्रुघ्नश्च निगद्यते । यामभद्रः क्वचित्प्रोक्तो द्वादशस्तम्भसंयुतः ॥ १३३ ॥ मण्डपाः कथिता ह्येते यथावल्लक्षणान्विताः । त्रिकोणवृत्त मध्ये तु अष्टकोणं द्विरष्टकम् ॥ १३४ ॥ चतुष्कोणं च कर्तव्यं संस्थानं मण्डपस्य तु । राज्यं च विजयं चैव आयुर्वर्द्धनमेव च ॥ १३५ ॥ पुत्रलाभः श्रियः पुष्टिः स्त्रीपुत्रादि क्रमाद्भवेत् । एवन्तु शुभदः प्रोक्तः अन्यथा तु भयावहः ॥ १३६ ॥ इति वास्तु शास्त्रे प्रासादविधानं नाम षष्ठोऽध्यायः ॥६॥ अथातः शृणु विप्रेन्द्र द्वारलक्षणमुत्तमम् । द्वाराणां चैव विन्यासाः पक्षाः पञ्चदश स्मृताः ॥ १ ॥ त्रिषु त्रिषु च मासेषु नभस्यादिषु वै क्रमात् । यद्दिङ्मुखो वास्तुनरस्तन्मुखं सदनं शुभम् ॥ २ ॥

लाभ लक्ष्मी स्त्री पुत्र आदिकोंका पोषण क्रमसे पूर्वोक्त मण्डपोंमें होता है. इस प्रकारका मण्डप शुभदायी होता है और अन्यथा भयका दाता होता है ॥ १३६ ॥ इति पं० मिहि० विर० वास्तुशास्त्रे षष्ठोऽध्यायः ॥ ६ ॥ इसके अनन्तर हे ब्राह्मणोंमें इन्द्र ! उत्तम द्वारके लक्षणोंको सुनो– द्वारके विन्यासमें पन्द्रह १५ पक्ष कहे हैं. अर्थात् पन्द्रह प्रकारके द्वार होते हैं ॥ १ ॥ वे नभस्य (भाद्रपद) आदि तीन तीन मासोंमें क्रमसे होते हैं

* यहांपर विजय मण्डपसे लेकर सुग्रीव मण्डपतकके लक्षण इस ग्रन्थमें न जाने क्यों नहीं लिखे ।

वास्तु पुरुषका मुख जिस दिशामें हो उसी दिशामें स्थानका द्वार शुभदायी होता है ॥ २ ॥ अन्यदिशाके मुखका घर दुःख शोक भयका दाता होता है तिससे वास्तुपुरुषके मुखकी दिशाका द्वारही श्रेष्ठ है अन्य दिशाका नहीं ॥ ३ ॥ अब दूसरे प्रकारको कहते हैं– कन्या आदि राशियोंपर तीन तीन राशियोंपर सूर्यके स्थित होनेके समय पूर्व आदि दिशाओंमें द्वारको न बनवावे ॥ ४ ॥ अब तीसरे प्रकारको कहते हैं–कर्क और सिंहके सूर्यमें पूर्व और पश्चिममें मुख होता है, मेष और वृश्चिकके सूर्यमें उत्तर दक्षिणमें मुख होता है ॥ ५ ॥

अन्यदिङ्मुखगेहं तु दुःखशोकभयप्रदम् । तस्मात्तदिङ्मुखद्वारं प्रशस्तं नान्यदिङ्मुखम् ॥३॥ अथ द्वितीयः ॥ त्रिषु त्रिषु च राशीनां कन्यादीनां स्थिते रवौ । पूर्वादिषु न कर्तव्यं द्वारं चैव यथाक्रमम् ॥४॥ अथ तृतीयः ॥ कर्ककुम्भगते सूर्ये मुखं स्यात् पूर्वपश्चिमे । मेषकीटगते वापि मुखं चोत्तरदक्षिणे ॥ ५ ॥ मुखानि चान्यथा कर्तुर्व्याधिशोकभयानि च । अन्यराशिगते सूर्ये न विदध्यात्कदाचन ॥ ६ ॥ अथ चतुर्थः ॥ सिंहे तु पश्चिमं द्वारं तुलायां चोत्तरं तथा । कर्कटे पूर्वदिग्द्वारं द्वारं पश्चिमवर्जितम् ॥७॥ कर्कटेऽर्के च सिंहस्थे पूर्वद्वारं न शोभनम् । तुलायां वृश्चिके चैव द्वारं पश्चिमवर्जितम् ॥ ८ ॥ कर्कटेऽर्के च सिंहस्थे याम्य द्वारं न शोभनम् । सूर्ये मकरकुंभस्थे सौम्यद्वारं च निंदितम् । नृयुक्कन्याधनुर्मीनसंस्थितेऽर्के न कारयेत् ॥ ९ ॥

अन्यथा जो गृहका द्वार बनाता है उसको व्याधि शोक और भय होता है. अन्य राशिके सूर्यमें द्वारको कदाचित् न बनवावे ॥ ६ ॥ अब चौथे प्रकारको कहते हैं–सिंहके सूर्यमें पश्चिम द्वारको, तुलाके सूर्यमें उत्तर मुखके द्वारको, कर्कके सूर्यमें पूर्व दिशाके द्वारको बनवावे. पश्चिम दिशाको छोड़कर द्वार होता है ॥ ७ ॥ कर्क और सिंहके सूर्यमें पूर्वका द्वार श्रेष्ठ नहीं, तुला और वृश्चिकके सूर्यमें पश्चिमदिशाको छोडकर अन्यदिशामें द्वार बनवावे ॥ ८ ॥ कर्कके सिंहके सूर्यमें दक्षिणका द्वार शोभन नहीं, मकरके कुंभके सूर्यमें उत्तरका द्वार निन्दित है. मिथुन

कन्या धन मीन इनके सूर्यमें द्वारको न बनवाने ॥ ९ ॥ द्वारका स्तंभ और काष्ठका संचय इनकोभी विशेषकर वर्ज दे । माघमें और सिंहमें काष्ठके छेदनको न करवावे, जो मूढ मोहसे करते हैं उनके घरमें अग्निका भय होता है ॥ १० ॥ अब पञ्चम प्रकारको कहते हैं–पूर्णिमासे अष्टमीतक पूर्व मुखके द्वारको वर्जदे, नवमीसे चतुर्दशीपर्यन्त उत्तरमुखके द्वारको वर्जदे ॥ ११ ॥ अब छठे प्रकारको कहते हैं–ब्राह्मणोंके घरका द्वार पश्चिममुखका, क्षत्रियोंके उत्तरमुखका, वैश्योंके पूर्वमुखका, शूद्रोंका दक्षिणमुखका शुभ होता है ॥ १२ ॥ अब सातवें प्रकारको कहते

द्वारस्तंभौ तथा दारुसञ्चयं च विवर्जयेत् । माघे सिंहे च दारूणां छेदनं नैव कारयेत् । मोहात्कुर्वन्ति ये मूढास्तद्गेहेऽग्निभयं भवेत् ॥ १० ॥ अथ पञ्चमः ॥ पूर्णादि त्वष्टमी यावत्पूर्वास्यं परिवर्जयेत् । उत्तरास्यं न कुर्वीत नवम्यादिचतुर्दशी ॥ ११ ॥ अथ षष्ठः ॥ प्रत्यङ्मुखं ब्राह्मणानां क्षत्रियाणां तथोत्तरे । वैश्यानां पूर्वदिग्द्वारं शूद्राणां दक्षिणे शुभम् ॥ १२ ॥ अथ सप्तमः ॥ कर्कटो वृश्चिको मीनो ब्राह्मणः परिकीर्तितः । मेषः सिंहो धनुर्धारी राशयः क्षत्रिया स्मृताः । वैश्या वृषमृगौ कन्या शूद्राः शेषाः प्रकीर्तिताः ॥ १३ ॥ वर्णक्रमेण पूर्वा दिग् दक्षिणे पश्चिमे तथा ॥ १४ ॥ यो यस्य राशिर्मर्त्यस्य तस्य द्वारं ततश्चरेत् । दिशि तद्विपरीतं तु कर्त्तुर्नेष्टफलं भवेत् ॥ १५ ॥

हैं–कर्क वृश्चिक मीन ये राशि ब्राह्मण कहाती हैं, मेष सिंह धनु ये राशि क्षत्रिय कहाती हैं ॥ १३ ॥ वृष मृग कन्या ये राशि वैश्य कहाती हैं और शेष राशि शूद्र कहाती हैं. वर्णके क्रमसे पूर्व दक्षिण पश्चिम और उत्तरदिशाओंके द्वार होते हैं ॥ १४ ॥ जिस मनुष्यकी जो राशि हो उसीसे उसका द्वार बनवावे, उसके विपरीत दिशामें द्वार बनवानेसे कर्ताको इष्टफल नहीं होता ॥ १५ ॥

अब आठवें प्रकारको कहते हैं–वन मेष सिंह इन राशियोंपर जब चन्द्रमा हो तो पूर्व दिशामें द्वार बनवावे, मकर कन्या और वृषका चन्द्रमा होयतो दक्षिणदिशामें द्वार बनवावे. तुला मिथुन कुम्भका चन्द्रमा होय तो पश्चिममुखके द्वारको बनवावे ॥ १६ ॥ कर्क वृश्चिक मीनका होयतो उत्तरमें द्वारको बनवावे, अब नवमप्रकारको कहते हैं–कृत्तिकासे सात नक्षत्र पूर्वमें और मघा आदि सात नक्षत्र दक्षिणमें ॥ १७ ॥ अनुराधा आदि सात नक्षत्र पश्चिममें और धनिष्ठा आदि सात नक्षत्र उत्तरमें जानने, जिस दिशाके नक्षत्रपर चन्द्रमा स्थित हो उस दिशामें

अथाष्टमः ॥ धनुर्मेषसिंहे यदा रात्रिनाथस्तदा पूर्वभागे न्यसेद्वारमाद्यम् । मृगेकन्यकागोस्तु द्वारं च याम्ये तुलायुग्मकुंभे तथा पश्चिमायाम् ॥ १६ ॥ कर्कटे वृश्चिके मीने राशिस्थे चोत्तरे न्यसेत् ॥ अथ नवमः ॥ कृत्तिकाद्यं सप्त पूर्वे मघाद्यं सप्त दक्षिणे ॥ १७ ॥ मैत्राद्यं पश्चिमे ज्ञेयं धनिष्ठाद्यं सप्त उत्तरे । यद्दिग्भसंस्थिते चन्द्रे तद्दिग्द्वारं प्रशस्यते ॥ १८ ॥ पृष्ठदक्षिणवामस्थे न विदध्यात्कदाचन ॥ अथ दशमः ॥ प्रागादि विन्यसेद्वर्गान्सव्यमार्गेण वै द्विजाः ॥ १९ ॥ सिंहे चोत्तरदिग्द्वारं पश्चिमास्यं विवर्जयेत् ॥ अथैकादशः ॥ प्राग्दक्षिणे गजद्वारं वृषे प्राच्यान्न चान्यदिक् ॥ २० ॥ पृष्ठद्वारं न कर्तव्यं कोणेष्वेव विशेषतः ॥ अथ द्वादशः ॥ त्रिषु त्रिषु च मासेषु मार्गशीर्षादिषु क्रमात् ॥ २१ ॥

द्वार बनाना शुभ है ॥ १८ ॥ पीठ दक्षिण और वामभागके नक्षत्रपर द्वारको कदाचित् न बनवावे. अब दशवें प्रकारको कहते हैं–हे द्विजो ! पूर्व आदि दिशाओंमें सव्य (वाम) मार्गसे वर्गोंको स्थापन करै ॥ १९ ॥ सिंहमें उत्तर दिशा और पश्चिम दिशाके द्वारको वर्जदे. अब ग्यारहवें प्रकारको कहते हैं–पूर्व और दक्षिणमें मेषके सूर्यमें वृषमें पूर्व दिशामें द्वारको बनवावे, अन्यदिशामें नहीं ॥ २० ॥ स्थानका पीठपर द्वार न करै और

कोणोंमें तो विशेषकर न करै. अब बारहवें प्रकारको कहते हैं-मार्गशिर आदि तीन तीन महीनोंमें क्रमसे ॥ २१ ॥ पूर्व दक्षिण पश्चिम और उत्तर दिशामें राहु वसता है. द्वारमें वह्निका भय और स्तम्भको राहुके मुखकी दिशामें गाड़नेसे वंशका नाश होता है ॥ २२ ॥ अब तेरहवें प्रकारको कहते हैं-राक्षस (नैर्ऋति) कुबेर (उत्तर) अग्नि जल (पश्चिम) ईशान याम्य वायव्य इन दिशाओंमें आदित्यवारसे लेकर राहु वसता है, आठों दिशाओंके चक्रमें वह राहु गृहके द्वार और गमनके प्रारंभमें वर्जित है ॥ २३ ॥ अब चौदहवें प्रकारको कहते हैं-पहिला

पूर्वदक्षिणतोयेशपौ लस्त्याशां क्रमादगुः । द्वारे वह्निभयं प्रोक्तं स्तम्भे वंशविनाशनम् ॥ २२ ॥ अथ त्रयोदशः ॥ रक्षःकुबेराग्नि जले च याम्ये वायव्यकाष्ठासु च भानुवरात् । वसेत्तमश्चाष्टसु दिक्षु चक्रे मुखे विवर्ज्यो गमने गृहे च ॥ २३ ॥ अथ चतुर्दशः ॥ ध्रुवन्त्वाद्यं गृहं प्रोक्तं सर्वद्वारविवार्जितम् । धान्ये पूर्वदिशि द्वारं दक्षिणे जयसंज्ञकम् ॥ २४ ॥ प्राग्दक्षिणे नन्दगृहे पश्चिमे खरमेव च । प्राक्पश्चिमे तथा कान्ते प्रत्यग्याम्ये मनोरमे ॥ २५ ॥ सुवक्त्रे चोत्तरे वर्ज्यं दुर्मुखे चोत्तरे तथा । प्रागुत्तरे क्रूरसंज्ञे विपदो दक्षिणे तथा ॥ २६ ॥ धनदे पश्चिमे वर्ज्यं क्षयं चोत्तरपश्चिमे । आक्रन्दे दक्षिणं त्याज्यं विपुले पूर्वमेव च ॥ २७ ॥

गृह ध्रुव कहा है वह सब द्वारोंसे विवर्जित होता है, पूर्वदिशामें जिसका द्वार हो वह धान्य कहाता है और दक्षिणमें जिसका द्वार हो वह जयसंज्ञक गृह कहाता है ॥ २४ ॥ पूर्व दक्षिणमें द्वार होय तो नन्द गृह होता है, पश्चिममें होय तो खर होता है, पूर्व पश्चिममें होय तो कान्त, पश्चिम दक्षिणमें होय तो मनोरम होता है ॥ २५ ॥ उत्तरमें होय तो सुमुख होता है और उत्तरमें दुर्मुखनामका गृह वर्जित है और उत्तर दक्षिणके क्रूरसंज्ञक गृहमें विपत्ति होती है ॥ २६ ॥ पश्चिम द्वार धनद गृहमें वर्जित है और उत्तर पश्चिममें गृह होय तो क्षय होता है आक्रन्द

नामके घरमें दक्षिणका और विपुल नामके घरमें पूर्वका द्वार वर्जित है ॥ २७ ॥ चार जिसमें द्वार हों ऐसा विजय नामका घर जो चारों तरफ अलिन्दोंसे युक्त है वह सर्वतोभद्रनामका गृह राजाओंको सिद्धि करनेवाला कहा है ॥ २८ ॥ अब पन्द्रहवें प्रकारको कहते हैं-अब उस द्वारचक्रको कहताहूं जो पहिले ब्रह्माने कहा है कि, सूर्यके नक्षत्रसे चार नक्षत्र द्वारके ऊपर रक्खे ॥ २९ ॥ दो दो नक्षत्र कोणमें रक्खे और दो दो नक्षत्र दोनों शाखाओंमें रक्खे और तीन नक्षत्र निचले भागमें रक्खे और चार नक्षत्र मध्यमें रक्खे ॥ ३० ॥ ऊर्ध्वके नक्षत्रोंमें द्वार

विजयाख्यं चतुर्द्वारमलिन्दैः सर्वतोयुतम् । राज्ञां सिद्धिकरं प्रोक्तं सर्वतोभद्रसंज्ञकम् ॥२८॥ अथ पञ्चदशः ॥ द्वारचक्रं प्रवक्ष्यामि यदुक्तं ब्रह्मणा पुरा । सूर्यभाद्भचतुष्कं तु द्वारस्योपरि विन्यसेत् ॥२९॥ द्वे द्वे कोणे प्रदातव्यं शाखायुग्मे द्वयं द्वयम् । अधश्च त्रीणि देयानि वेदा मध्ये प्रतिष्ठिताः ॥३०॥ राज्यं स्यादूर्ध्वनक्षत्रे कोणपूद्भासनं भवेत् ॥ शाखायां लभते लक्ष्मीं ध्वजे चैव मृतिर्भवेत् ॥ ३१ ॥ मध्यस्थेषु भवेत्सौख्यं चिन्तनीयं सदा बुधैः । अश्विनी चोत्तराहस्ततिष्यश्रुतिमृगाः शुभाः । स्वातौ पूष्णे च रोहिण्यां द्वारशाखावरोपणे ॥ ३२ ॥ पञ्चमी धनदा चैव मुनिनन्दावसौ शुभम् । प्रतिपत्सु न कर्तव्यं कृते दुःखमवाप्नुयात् । द्वितीयायां द्रव्यहानिः पशुपुत्रविनाशनम् ॥ ३३ ॥

बनवावे तो राज्य होताहै, कोणके नक्षत्रोंमें उद्भासन (निकास), शाखाके नक्षत्रमें लक्ष्मीकी प्राप्ति और ध्वजाके नक्षत्रोंमें मरण होता है ॥ ३१ ॥ मध्यके नक्षत्रोंमें सुख होता है यह चक्र बुद्धिमान् मनुष्योंको सदा विचारने योग्य है-अश्विनी उत्तरा तिष्य (विशाखा) श्रवण मृगशिर ये नक्षत्र शुभ हैं, स्वाती रेवती रोहिणी द्वार शाखाके स्थापनमें शुभ होते हैं ॥ ३२ ॥ पंचमी धनकी दाता होती है और सप्तमी

अष्टमी नवमी भी शुभ होती हैं प्रतिपदामें द्वार कभी न करै, करै तो दुःख होताहै, द्वितीयामें द्रव्यकी हानि और पशु पुत्रका नाश होता है ॥ ३३ ॥ तृतीया रोगकी दात्री चतुर्थी भंगको करती है, षष्ठी कुलका नाश और दशमी धनका नाश करती है ॥ ३४ ॥ अमावास्या विरोधको करतीहै इससे इसमें शाखाका आरोप न करे, केन्द्र और त्रिकोण (नौवां पांचवां) इनमें शुभग्रह होंय और ३ । ११ । ६ स्थानोंमें पापग्रह होंय ॥ ३५ ॥ द्यून (सातवें) दशवें ये ग्रह शुद्ध होंय तो द्वारकी शाखाका स्थापन शुभ वारमें शुभ होताहै और पंचक त्रिपुष्कर योगमें

तृतीया रोगदा ज्ञेया चतुर्थी भङ्गकारिणी । कुलक्षयं तथा षष्ठी दशमी धननाशिनी ॥३४॥ विरोधकृत्त्वमावास्या नास्यां शाखा वरोपणम् । केन्द्रत्रिकोणेषु शुभैः पापैरुपायारिगैस्तथा ॥ ३५ ॥ द्यूनांबरे शुद्धियुते द्वारशाखावरोपणम् । शुभं स्याच्छुभवारे च पञ्चके न त्रिपुष्करे । आग्नेयधिष्ण्ये सोमे हि न कुर्यात्काष्ठरोपणम् ॥ ३६ ॥ प्रणम्य वास्तुपुरुषं दिक्पालं क्षेत्रनायकम् । द्वारशाखारोपणं च कर्तव्यं तदनन्तरम् । शुभं निरीक्ष्य शकुनमन्यथा परिवर्जयेत् ॥ ३७ ॥ कुड्यां भित्त्वा न कुर्वीत द्वारं तत्र सुखेप्सुभिः । कृत्तिका भगमैत्रं तु विशाखा च पुनर्वसुः॥३८॥ तिष्यं हस्तं तथार्द्रां च क्रमात्पूर्वेषु विन्यसेत् । मैत्रं विशाखा पौष्णं च नैर्ऋत्यं यमदैवतम् ॥ ३९ ॥

शुभ नहीं, अग्नि जिसका स्वामी हो ऐसे नक्षत्र (कृत्तिका) में और सोमवारको द्वारशाखाका स्थापन न करे ॥ ३६ ॥ वास्तुपुरुषका दिक्पाल और क्षेत्रके स्वामियोंको प्रणाम करके उसके अनन्तर द्वार शाखाका स्थापन शुभशकुनको देखकर करे अन्यथा वर्जदे ॥ ३७ ॥ और सुखके अभिलाषी मनुष्य कुड्य (भित्ति) को छेदकर द्वारको कदाचित् न बनवावे, कृत्तिका भग (पूर्वाफा०) अनुराधा विशाखा पुनर्वसु ॥ ३८ ॥ पुष्य हस्त आर्द्रा इन नक्षत्रोंको क्रमसे पूर्वदिशामें रक्खे, अनुराधा विशाखा रेवती भरणी उत्तराषाढा अश्विनी चित्रा ये नक्षत्र

क्रमसे दक्षिणमें स्थित हैं मघा प्रौष्ठपद अर्य्यमा मांसान्नदैवत (मूल) ॥ ३९ ॥ ४० ॥ शतभिषा अश्विनी हस्त ये क्रमसे पश्चिम दिशामें स्थित हैं स्वाती आश्लेषा अभिजित् मृगशिर श्रवण धनिष्ठा ॥ ४१ ॥ भरणी रोहिणी ये क्रमसे उत्तरके द्वारमें स्थापन करे बुद्धिमान् मनुष्य उस दिशाके द्वारके नक्षत्रोंमें ही उस दिशाके द्वारको बनवावे ॥ ४२ ॥ और स्तम्भ आदिका स्थापनभी बुद्धिमान् मनुष्य विधिसे करे और अधोमुख नक्षत्रोंमें देहली खातको करे ॥ ४३ ॥ और तिर्यङ्मुखनक्षत्रोंमें और द्वारके नक्षत्रोंमें स्तम्भ और द्वारका स्थापन प्रासाद हर्म्य और गृहोंके बीचमें सदैव

वैश्वेदवाश्विनीचित्राः क्रमाद्दक्षिणमास्थिताः । पित्र्यं प्रौष्ठपदार्यम्णं तथा मांसान्नदैवतम् ॥ ४० ॥ वारुणाश्विनसावित्र्यं क्रमात् पश्चिमसंस्थितम् । स्वात्याश्लेषाभिजित्सौम्यं वैष्णवं वासवं तथा ॥ ४१ ॥ याम्यं ब्राह्मं क्रमात्सौम्यं द्वारेषु च विनिर्दिशेत् । द्वारर्क्षैस्तद्दिशाद्वारं स्थापयेद्वा विचक्षणः ॥ ४२ ॥ स्तंभाद्यारोपणं शस्तं तथैव विधिना बुधैः । अधोमुखैश्च नक्षत्रैर्देहलीखातमेव च ॥ ४३ ॥ तिर्यङ्मुखर्क्षैर्द्वारर्क्षैस्तम्भद्वारावरोपणम् । प्रासादेषु च हर्म्येषु गृहेष्वन्येषु सर्वदा ॥ ४४ ॥ आग्नेय्यां प्रथमं स्तम्भं स्थापयेत्तद्विधानतः । स्तम्भोपरि यदा पश्येत्काकगृध्रादिपक्षिणः ॥ ४५ ॥ दुर्निमित्तानि संवीक्ष्य तदा कर्तुर्न शोभनम् । तस्मात्स्तम्भोपरिच्छत्रं शाखां फलवतीं तु वा ॥ ४६ ॥ धारयेदथवा वस्त्रं बुधो रत्नादि निःक्षिपेत् । दिक्साधनं च कर्तव्यं शिलाद्वारावरोपणम् ॥ ४७ ॥ स्तंभे च वास्तुविन्यासे तथा च गृहकर्मणि । प्रासादे वा तथा यज्ञे मण्डपे बलिकर्मसु ॥ ४८ ॥

करे ॥४४॥ पहिलास्तम्भ आग्नेयदिशामें विधिसे स्थापन करे और स्तम्भके ऊपर जब काक गीध आदि पक्षियोंको देखे ॥४५॥ और खोटे निमित्तोंको देखै तो कर्ताको शुभ नहीं होता तिससे स्तंभके ऊपर छत्र वा फलवाली शाखाको ॥ ४६ ॥ अथवा वस्त्रको धारण करवादे, बुद्धिमान् मनुष्य रत्न आदि स्थापन करे और शिलाद्वारके स्थापनमें दिशाका साधनभी करे ॥ ४७ ॥ स्तंभ वास्तुपुरुषके स्थापन गृहकर्म प्रासाद यज्ञमण्डप और

बलिकर्म इनमें दिक्साधन करे ॥ ४८ ॥ कृत्तिकाके उदयमें और श्रवणके उदयमें प्राची दिशा होती है, चित्रा और स्वातीके अन्तरमें प्राची होती है और सूर्यकी स्थितिमें दिन प्राची होती है ॥ ४९ ॥ यदि श्रवण पुष्य और चित्रा स्वातीका जो अन्तर यह प्राची दिशाका रूप है जब दण्डमात्र सूर्यका उदय होचुका हो ॥ ५० ॥ द्वादशांगुलके मानसे वा शंकुसे कल्पना करे, शिलाका तल भलीप्रकार शुद्ध हो और लिपा हो और समान हो ॥ ५१ ॥ इष्ट शंकुके प्रमाणसे समान मण्डलको लिखे, उसके मध्यमें शंकुको स्थापन करे और दो रेखावाले वृत्तको

कृत्तिकोदयतः प्राची प्राची स्याच्छ्रवणोदये । चित्रास्वात्यन्तरे प्राची दिनप्राची रवेः स्थिता ॥ ४९ ॥ यदि वा श्रवणं पुष्यं चित्रास्वात्योर्यदन्तरम् । एतत्प्राचीदिशारूपं दण्डमात्रोदिते रवौ ॥५०॥ द्वादशाङ्गुलमानेन शङ्कुना वा प्रकल्पयेत् । शिलातले सुसंशुद्धे सुलिप्ते समताङ्गते ॥५१॥ इष्टशङ्कुप्रमाणेन सममण्डलमालिखेत् । तन्मध्ये स्थापयेच्छङ्कुं वृत्तं कृत्वा द्विरेखिकम् । द्युतिप्रवेशाय गमस्थाने चिह्नं प्रकल्पयेत् । अपरेऽह्नि च तन्मध्ये शंकुमारोपयेत्ततः ॥ ५२ ॥ तत्र चिह्नं च तन्मानं मानयोर्यदनन्तरम् । तेनानुमानेन विषुवद्दिवसान्तं च साधयेत् ॥५३॥ यावन्तो व्यवह्रियन्ते तावद्वृत्ते विनिक्षिपेत् । शोधयेद्योजयेद्वापि दक्षिणोत्तरयोर्द्वयोः ॥ ५४ ॥ क्रान्त्योर्यदवशिष्येत तत्प्राची समुदाहृता ॥ ५५ ॥

अर्थात गोल आकारको बनाकर कांतिके प्रवेशके लिये गमनके स्थापनमें चिह्नकी कल्पना करे. फिर दूसरे दिन उसके मध्यमें शंकुका आरोपण करै (रक्खे) ॥ ५२ ॥ उसमें चिह्न और उसका जो मान उन दोनों मानोंके जो अनंतर (समीप) उसी अनुमानसे विषुवत् (तुला मेष) संक्रांतिके अंतके दिनतक साधन करै ॥ ५३ ॥ जितने चिह्नोंका व्यवधान हो उतने वृत्तमें डारदे उनका शोधन करै वा योजन दक्षिण और उत्तर दोनोंमें करे अर्थात् घटादे वा मिलादे ॥ ५४ ॥ क्रांतियोंके मध्यमें जो शेष रहै वही प्राची दिशा कही है ॥ ५५ ॥

अथ द्वारफलानि ॥ ईशानमादितः पूर्वे आग्नेयाद्दक्षिणे स्थिताः । नैर्ऋत्यात्पश्चिमे ज्ञेया वायव्यात्सौम्यदिक् स्थिताः ॥ ५६ ॥ पूर्वादिक्रमयोगेन हुताशेऽग्निभयं भवेत् । पर्जन्ये प्रचुरा नार्य्यो जायन्ते बहुवित्तदाः ॥ ५७ ॥ माहेन्द्रे नृपवात्सल्यं सूर्य्येऽति क्रोधता भवेत् । सत्येऽनृतत्वं विज्ञेयं क्रूरत्वं च भृशं भवेत् ॥ ५८ ॥ अन्तरिक्षे च विज्ञेयो नित्यं चोरसमागमः । दक्षिणे स्यात् पुत्रनाशो वायव्ये प्रेष्यमेव च ॥ ५९ ॥ नीचत्वं वितथें ज्ञेयं गृहे तिष्ठति सन्ततिः । शूद्रकर्मा भवेत्पौष्णे नैर्ऋत्ये कर्तृनाशनम् ॥ ६० ॥ अधनं भगराजाख्ये मृगे पुत्रविनाशनम् । पश्चिमे पित्र्ये स्वल्पायुरधनं च महद्भयम् ॥ ६१ ॥ सुग्रीवे पुत्रनाशः स्यात् पुष्पदन्ते तु वर्द्धनम् । वरुणे क्रोधभोगित्वं नृपभङ्गस्तथाऽसुरे ॥ ६२ ॥

अब द्वारके फलोंका वर्णन करते हैं–ईशानसे पूर्वमें और अग्निकोणसे दक्षिणमें और नैर्ऋत्यसे पश्चिममें और वायव्यसे उत्तर दिशामें क्रमसे चार दिशा स्थित रहती हैं ॥ ५६ ॥ पूर्व आदि दिशाके क्रम योगसे अग्निका वास होय तो अग्निका भय होता है, पर्जन्य (मेघ) होय तो अनन्त धनकी दाता बहुत नारी होती हैं ॥५७॥ माहेन्द्र (इन्द्रधनुष) होय तो राजाकी दया होती है, सूर्य होय तो अत्यन्त क्रोध होता है सत्य होय तो अनृत होता है और अत्यंत क्रूर स्वभाव होता है ॥ ५८ ॥ अंतरिक्ष होय तो नित्य चोरोंका समागम होता है, दक्षिणमें ज्ञेय तो पुत्रका नाश, वायव्यमें होनेसे दासभाव होता है ॥ ५९ ॥ वितथ (झठ) में नीचता जाननी और घरमें सन्तति टिकती है, रेवती नक्षत्रमें द्वारको बनावे तो शूद्रकर्मकी करनेवाली संतान होती है, नैर्ऋत्यमें कर्ताका नाश होता है ॥ ६० ॥ भगराज (पूर्वाफा०) में धनहीन होता है, मृगशिरामें पुत्रका नाश, मघामें पश्चिममुखका द्वार बनावे तो अल्प आयु धनका अभाव महान् भय होता है ॥ ६१ ॥ सुग्रीवमें पुत्रका नाश, पुष्पदंतमें वृद्धि

वरुणमें क्रोध और भोग असुरमें राजाका भंग होता है ॥ ६२ ॥ शोकमें नित्यअत्यन्त सूखापन, पापनामकेमें पापका संचय, उत्तरमें नित्य रोग और मरण, नागमें महान् शत्रुका भय होता है ॥ ६३ ॥ मुख्यमें धन और पुत्रोंकी उत्पत्ति, भल्लाटमें विपुल (बहुत) लक्ष्मी, सोममें धर्मशीलता भुजंगमें बहुत वैर होता है ॥ ६४ ॥ आदित्यवारको सदैव कन्याओंका जन्म अदिति नक्षत्रमें धनका संचय होता है पदपदमें किया श्रेष्ठद्वार श्रेष्ठ फलको देता है अर्थात काष्ठका प्रमाण पदप्रमाणका हो ॥ ६५ ॥ जो दो पदोंसे बनाया हो वह मिश्र फलको देता है, नौ ९ से भाग

नित्यातिशोषिता शोके पापाख्ये पापसञ्चयः । उत्तरे रोगवधौ नित्यं नागे रिपुभयं महत् ॥ ६३ ॥ मुख्ये धनसुतोत्पत्तिर्भल्लाटे विपुलाः श्रियः । सोमे तु धर्मशीलत्वं भुजङ्गे बहुवैरता ॥६४॥ कन्यादोषाः सदादित्ये अदितौ धनसञ्चयः । पदे पदे कृतं श्रेष्ठं द्वारं सत्फलदायकम् ॥ ६५ ॥ पदद्वयं कृतं यच्च यद्वा मिश्रफलप्रदम् । सूत्रे नवहृते भागे वसुभागं तथैव च ॥ ६६ ॥ प्रासादे कारयेद्विद्वानावासे न विचारणा । बहुद्वारेष्वलिंदेषु न द्वारनियमः स्मृतः ॥ ६७ ॥ सदैव सदने जीर्णोद्धारे साधारणेष्वपि । मूलद्वारं प्रकर्तव्यं वटे स्वस्तिकसन्निभम् ॥ ६८ ॥ यस्यातपत्रं प्रमथागणाकीर्णं प्रशस्यते । वीथिप्रमाणात्परतो द्वारं दक्षिण पश्चिमे ॥ ६९ ॥ न कार्यं प्रथमाकीर्णं सुखिनं वा प्रकल्पयेत् । प्राकारे च प्रपायां च द्वारं प्रागुत्तरं न्यसेत् ॥ ७० ॥

दिये सूत्रमें वा वसुभागके प्रमाणसे ॥ ६६ ॥ प्रासादमें बुद्धिमान मनुष्य द्वारको बनवावे. आवास (बसनेका घर) में कोई विचार नहीं है, अनेक द्वारोंके अलिन्दों (देहली) में द्वारका नियम नहीं कहा है ॥ ६७ ॥ जीर्णोद्धार सदनमें (घरमें) और साधारण घरोंमें मूलमें द्वार (छिद्र) घटमें स्वस्तिकके समान करना ॥ ६८ ॥ जिसका आतपत्र (छत्र) प्रमथगणोंसे आकीर्ण (युक्त) हो वह श्रेष्ठ होता है, वीथि (गली) प्रमाणसे परे जो दक्षिण पश्चिमका द्वार है वह ॥ ६९ ॥ प्रथम आकीर्ण न करना चाहिये अथवा उस द्वारको सुखदायी बनवावे

अर्थात सुखसे जाने आने योग्य होना चाहिये, प्राकार और प्रपामें द्वार पूर्व और उत्तरमें बनवावे ॥ ७० ॥ द्विशालाओंमें भी दुर्गमें द्वारका दोष नहीं होता है ॥ ७१ ॥ जो प्रधान महाद्वार बाहिरकी भीतोंमें स्थित है इसको भूति (ऐश्वर्य) का अभिलाषी राजा रथ्यासे विद्ध न बनवावे ॥ ७२ ॥ जिस घरमें सरल मार्गसे प्रवेश होता है उसमें मार्गके वेधको नानाशोकरूप फलोंका दाता समझे ॥ ७३ ॥ यदि द्वारके मुखपर वृक्ष स्थित होय तो उसको तरुवेध जाने, उस वेधमें कुमारका मरण और नानाप्रकारके रोग होते हैं ॥ ७४ ॥ घरके

द्विशालासु च तद्वच्च द्वारं प्राग्वत्प्रकल्पयेत् । चतुर्द्वारमये दुर्गे द्वारदोषो न विद्यते ॥ ७१ ॥ प्रधानं यन्महाद्वारं बाह्यभित्तिषु संस्थितम् । रथ्याविद्धं न कर्तव्यं नृपेण भूतिमिच्छता ॥ ७२ ॥ सरलेन च मार्गेण प्रवेशो यत्र वेश्मनि । मार्गवेधं विजानीयान्नानाशोकफलप्रदम् ॥ ७३ ॥ तरुवेधं विजानीयाद्यदि द्वारमुखे स्थितम् । कुमारमरणं ज्ञेयं नानारोगश्च जायते ॥ ७४ ॥ अपस्मारभयं विद्याद्गृहाभ्यन्तरवासिनाम् । द्वाराग्रे पञ्चवेधं तु दुःखशोकामयप्रदम् ॥ ७५ ॥ जलस्रावस्तथा द्वारे मूलेऽनर्थं च यो भवेत् । द्वाराग्रे देवसदनं बालानामार्तिदायकम् ॥७६॥ देवद्वारं विनाशाय शाङ्करं द्वारमेव च । ब्रह्मणो यच्च संविद्धं तद्भवेत् कुलनाशनम् ॥ ७७ ॥ गृहमध्ये कृतं द्वारं द्रव्यधान्यविनाशनम् । अवातकलहं शोकं नार्यावासं प्रदूषयेत् ॥ ७८ ॥

भीतर जो बसते हैं उनको अपस्मार (मृगी) रोगका भय जानना. द्वारके आगे पांच प्रकारका वेध दुःख शोक और रोगको देता है ॥ ७५ ॥ द्वारमें जलका स्राव (बहना) हो वा मूलमें होय तो अनर्थोंका समूह होता है द्वारके आगे देवताका स्थान होय तो बालकोंको दुःखदायी होता है ॥ ७६ ॥ देवताके मंदिरका द्वार होय तो वह विनाश करता है, महादेवके मंदिरका द्वार ब्रह्माके स्थानके द्वारसे विंधा होय तो वह कुलको नष्ट करनेवाला होता है ॥ ७७ ॥ घरके मध्यभागमें बनाया हुआ द्वार द्रव्य और धान्यका विना

शक होता है, विना वात कलह शोकको और स्त्रियोंके वासमें दूषणोंको करता है ॥ ७८ ॥ उत्तरमें जो पांचवां द्वार है उसको ब्रह्मासे विद्ध कहते हैं तिससे संपूर्ण शिराओं (कोण) में और विशेषकर मध्यभागमें ॥ ७९ ॥ बुद्धिमान् मनुष्य द्वारको न बनवावे और प्रासादमें तो पूर्वोक्तसे विपर्यय (उलटा) होता है देवताके संनिधान (समीप) में और श्मशानके संमुख गृहमें भी विपरीत फल समझे ॥ ८० ॥ स्तंभके वेधमें और पाषाणके वेधमें स्त्रीका नाश होता है, देवताके संनिधानमें घर होय तो घरके स्वामीका क्षय होता है ॥ ८१ ॥ श्मशानके संमुख

उत्तरे पञ्चमं द्वारं ब्रह्मणो विद्धमुच्यते । तस्मात्सर्वशिरा ह्येव मध्ये चैव विशेषतः ॥ ७९ ॥ द्वारं न कारयेद्धीमान् प्रासादे तु विपर्ययः । देवतासन्निधाने तु श्मशानाभिमुखं तथा ॥८०॥ स्त्रीनाशं स्तम्भवेधे स्यात्पाषाणे च तथैव च । देवतासन्निधानस्थे गृहे गृहपतेः क्षयः ॥ ८१ ॥ श्मशानाभिमुखे गेहे राक्षसाद्भयमादिशेत् । चतुःषष्टिपदं कृत्वा मध्ये द्वारं प्रकल्पयेत् ॥ ८२ ॥ विस्तारादद्विगुणोच्छ्रायस्तत्त्रिभागः कटिर्भवेत् । विस्तारार्द्धं भवेद्गर्भो वित्तयोन्यः समन्ततः ॥ ८३ ॥ गर्भपादेन विस्तीर्णं द्वारं द्विगुणमुच्छ्रितम् । उच्छ्रायात्पादविस्तीर्णा शाखा तद्वदुदुम्बरा ॥८४॥ विस्तारपादप्रमितं बाहुल्यं शाखयोः स्मृतम् । त्रिपंचसप्त नवभिः शाखाभिर्द्वारमिष्यते॥८५॥कनिष्ठं मध्यमं ज्येष्ठं यथायोगं प्रकल्पयेत्।विस्तारादद्विगुणोच्छ्रायश्चत्वारिंशद्भिरुत्तमम्॥८६॥

घरमें राक्षसोंसे भय होता है इससे चतुःषष्टिपद वास्तुविधिको करके मध्यमें द्वारको बनवावे ॥ ८२ ॥ विस्तारसे दूनी ऊंचाई और ऊंचाईका तीसरा भाग पृष्ठ होता है और विस्तारसे आधा गर्भ (चौक) होता है और वित्तकी योनि चारोंतरफ होती है ॥ ८३ ॥ गर्भके पादसे विस्तीर्ण और द्विगुण ऊंचा द्वार होता है. ऊंचाईसे पादमात्र विस्तारकी (गूलर) देहलीकी द्वारशाखा होती है ॥ ८४ ॥ विस्तारके पादकी बराबर शाखाओंका बाहुल्य कहा है, तीन, पांच, सात, नौ, शाखाओंका द्वार इष्ट होता है ॥ ८५ ॥ उसको कनिष्ठ मध्यम ज्येष्ठ यथायोग्य बनवावे.

धन्यमुत्तममायुष्यं धनधान्यकमेव च। शतं चाशीतिसहितं वातनिर्गमनं भवेत् ॥ ८७ ॥ अधिकं दशभिस्तद्वत्तथा षोडशभिः शतम्। शतमानं तृतीयं तु भवत्यशीतिभिस्तथा ॥ ८८ ॥ दशद्वाराणि चैतानि क्रमेणोक्तानि सर्वदा। अन्यानि वर्जनीयानि मनसोद्वेगदानि तु ॥८९॥ द्वारवेधं तु यत्नेन सर्वथा परिवर्जयेत्। गृहोच्छ्रायाद्द्विगुणितं त्यक्त्वा भूमिं बहिः स्थितः ॥ ९० ॥ न दोषाय भवेद्वेधो गृहस्य गृहिणस्तथा। गृहार्द्धं गृहिणी ज्ञेया गृहात्पूर्वोत्तरा शुभा ॥ ९१ ॥ पक्षिणी वा तथैव स्यादन्यगेहा न सिद्धिदाः। पृष्ठद्वारं न कर्तव्यं मुखद्वारावरोधनम् ॥ ९२ ॥ पिहिते तु मुखद्वारे कुलनाशो भवेद्ध्रुवम्। पृष्ठद्वारे सर्वनाशः स्वयमुद्घाटिते तथा ॥ ९३ ॥

विस्तारसे दूनी ऊंचाई होती है वह चालीस हस्तोंसे उत्तम कही है ॥ ८६ ॥ उत्तम घर धन्य आयुका दाता धनधान्यका वर्द्धक होता है घरमें १८० एकसौ अस्सी ऐसी खिडकी हों जिनमें पवनका गमन आगमन होता हो ॥ ८७ ॥ किसी प्रकार दशअधिक शत ११० वा सोल हसे अधिक शत ११६ अथवा शत हो, वा तृतीय ७९ हो अथवा अशीति ८० ऐसे द्वार बनवावे ॥ ८८ ॥ ये दश प्रकारके द्वार क्रमसे सदैव कहे हैं. अन्य जो मनके उद्वेग करनेवाले द्वार हैं वे सदैव वर्जित हैं ॥ ८९ ॥ द्वारके वेधको तो यत्नसे सर्वथा वर्ज दे घरकी ऊंचा ईसे दूनी भूमिमें छोडकर बाह्य भागमें द्वार स्थित रहता है ॥ ९० ॥ एक घरका वेध गृहके स्वामीको नहीं होता है घरका आधा भाग गृहिणी जानना वह गृहसे पूर्व और उत्तरमें शुभ है ॥ ९१ ॥ वा पक्षिणी होती है इस प्रकारसे अन्यके बनवाये घर सिद्धिके दाता नहीं होते हैं मुखके द्वारका जिससे अवरोध (रोक) हो ऐसे पृष्ठ द्वारको कदाचित न बनवाने ॥ ९२ ॥ यदि द्वारके मुखका अवरोध होजाय तो निश्चयसे कुलका नाश होता है. पृष्ठके द्वारमें सबका नाश होता है. स्वयं उद्घटित (खोले) में भी यही अनिष्ट फल होते हैं अर्थात्

शास्त्रोक्त रीतिसे द्वारको बनवावे अपने इच्छासे नहीं ॥ ९३ ॥ प्रमाणसे न्यूनमें दुःख होता है. प्रमाणसे अधिकमें राजाका भय होता है, यदि द्वार आधा खण्डित होय तो अस्तके वेधको कहते हैं ॥ ९४ ॥ जो कपाटका छिद्र होय तो कपाटछिद्रवेधको कहते हैं, यदि यन्त्रसे विद्ध द्वार होय तो प्रासादमें धनका नाश होता है ॥ ९५ ॥ जिस द्वारके स्तंभमें शब्द होता हो उसके वंशका नाश होता है तिकोना शकटकी तुल्य सूप व्यजन इनके समान जो द्वार है ॥ ९६ ॥ मुरजाकार वर्तुल द्वारोंको और प्रमाणसे हीन द्वारोंको वर्जदे, त्रिकोणके द्वारमें

मानोने व्यसनं कुर्यादधिके नृपतेर्भयम् । अर्द्धखण्डं यदि द्वारं दलवेधं विनिर्दिशेत् ॥ ९४ ॥ कपाटच्छिद्रवेधं च कपाटे वै क्षयो भवेत् । यत्र विद्धं यदा द्वारं प्रासादे च धनक्षयः ॥ ९५ ॥ स्तम्भं वा रवते यस्य तस्य वंशक्षयो भवेत् । त्रिकोणं शकटाकारं शूर्पव्यजनसन्निभम् ॥ ९६ ॥ मुरजं वर्तुलं द्वारं मानहीनं च वर्जयेत् । त्रिकोणे पीडयते नारी शकटे स्वामिनो भयम् ॥ ९७ ॥ शूर्पे धनविनाशः स्याद्धनुषि कलहो स्मृतः । धननाशस्तु मुरजे वर्तुले कन्यकोद्भवः ॥ ९८ ॥ मध्यहीनं तु यद् द्वारं नोनाशोक फलप्रदम् । स्तंभाग्रे विन्यसेत्काष्ठं पाषाणं नैव धारयेत् ॥ ९९ ॥ नृपालये देवगेहे पाषाणानां च कारयेत । द्वारशाखा नृपाणां तु गृहे पाषाणनिर्मिता ॥ १०० ॥

नारीको पीडा होती है, शकटके द्वारमें स्वामीको भय होता है ॥ ९७ ॥ सूपके समान द्वारमें धनका नाश होता है, धनुषाकारमें कलह कहा है मुरजमें धनका नाश होता है वर्तुल (गोल) द्वारमें कन्याओंका जन्म होता है ॥ ९८ ॥ जो द्वार मध्यभागसे हीन होता है वह नाना शोकरूप फलोंको देता है, स्तंभके अग्रभागपर काष्ठ रक्खे पाषाणका धारण कदाचित् न करे ॥ ९९ ॥ राजाके मन्दिर और देवताके घरमें पाषाणोंकेही द्वार और शाखाओंको बनवावे. राजाओंके घरमें द्वारशाखाभी पाषाणोंसेही बनीहुई होती है ॥ १०० ॥

कर्तव्या नेतरेषां च कारयेन्मतिमान्नरः । गृहमध्ये कृतं स्तम्भं ब्रह्मणो वेधमुच्यते ॥ १०१ ॥ भित्तिश्चैव न कर्तव्या न ब्रह्मस्थान मुच्यते । तत्स्थानं यत्नतो रक्षेद्गृही कीलादिकैस्तथा ॥ १०२ ॥ भाण्डेनाशुचिना तद्वच्छल्येन भस्मना तथा । रोगा नाना विधाः शोका जायन्ते तत्र नित्यशः । द्वारस्योपरि यद्द्वारं तद्द्वारं शकटं स्मृतम् ॥१०३॥ चतुष्षऽष्टचङ्गुलोत्सेधं चतुस्त्रिंशच्च विस्तरम् । द्वारस्योपरि यत्नेन शिवाय शकटं च यत् । अध्मातं क्षुद्रजं प्रोक्तं कुले कुलविनाशनम् ॥ १०४ ॥ पीडाकरं पीडितं तु अभावं मध्यपीडितम् । बाह्योन्नते प्रवासः स्याद्दिग्भ्रान्ते दस्युतो भयम् । दौर्भाग्यं निधनं रोगा दारिद्र्यं कलहं तथा ॥१०५ ॥ विरोधश्चार्थनाशश्च सर्ववेधे क्रमाद्भवेत् । पूर्वेण फलिता वृक्षाः क्षीरवृक्षाश्च दक्षिणे । पश्चिमेन जलं श्रेष्ठं पद्मोत्पलविभूषितम्॥१०६॥

वही बनवानी । अन्यमनुष्योंके घरोंमें बुद्धिमान् मनुष्य कदाचित् न बनवावे. घरके मध्यभागमें स्तंभ होय तो ब्रह्माका वेध कहाता है ॥ १०१ ॥ गृहके मध्य भागमें भीतकोभी न बनवावे, क्योंकि उससे ब्रह्माका स्थान न छुटेगा इससे गृहस्थी ब्रह्माके स्थानकी यत्नसे रक्षा करे. कील आदिकोंकी रक्षा करे ॥ १०२ ॥ अशुद्धपात्रसे, शल्यसे और भस्मसे नाना प्रकारके रोग उस घरमें होते हैं. जहां ब्रह्माका वेध होता है द्वारके ऊपर जो द्वार होता है उस द्वारको शकट कहते हैं ॥ १०३ ॥ चौंसठ ६४ अंगुल ऊंचा और चौतीस ३४ अंगुल चौडा द्वारके ऊपर जो शकट है वह यत्नसे कल्याणके लिये रक्खे, यदि वह शब्द न करे तो क्षुद्रज कहा है. वह कुलका नाशक होता है ॥ १०४ ॥ पीडित द्वार पीडाको करता है, मध्यपीडितद्वार अभावको करता है, बाहरको उन्नतद्वार होय तो प्रवास होता है, दिशाओंमें भ्रान्त होय तो चोरोंसे भय, दौर्भाग्य मरण रोग दरिद्र कलह ॥१०५॥ विरोध अर्थका नाश ये फल क्रमसे सब दिशाओंके वेधमें होते हैं, पूर्वमें फलवाले वृक्ष और पश्चिममें

पद्म और उत्पलोंसे भूषित जल श्रेष्ठ होते हैं ॥ १०६ ॥ चारों तरफ परिखा और वलय आदि बनवाने, दक्षिणमें तपोवनका स्थान और उत्तरमें मातृकाओंका घर बनवाना ॥ १०७ ॥ पश्चिममें लक्ष्मीका निवास, वायव्यमें ग्रहोंकी पंक्ति, उत्तरमें यज्ञकी शाला और निर्माल्यका स्थान बनाना कहा है ॥ १०८ सोम है देवता जिसकी ऐसी उत्तरदिशामें बलिदानका स्थान कहा है, पूर्वमें वृषोंका स्थान शेष और काम देवका स्थान कहा है ॥ १०९ ॥ जल और वापी और जलशायी विष्णुका स्थान कहा है इस प्रकार शुभमण्डपोंसे युक्त स्थानको बनवावे

सर्वतश्चापि कर्तव्यं परिखावलयादिकम् । याम्यं तपोवनस्थानमुत्तरे मातृकागृहम् ॥ १०७ ॥ वारुणे श्रीनिवासस्तु वायव्ये गृहमालिका । उत्तरे यज्ञशाला तु निर्माल्यस्थानमुच्यते ॥१०८॥ वारुणे सोमदैवत्ये बलिनिर्वपणं स्मृतम् । पुरतो वृषभस्थानं शेषं स्यात्कुसुमायुधम् ॥१०९॥ जलवापी तथैशान्ये विष्णुं च जलशायिनम् । एवमायतनं कुर्याच्छुभमण्डपसंयुतम् ॥ ११० ॥ घण्टावितानकसतोरणचित्रयुक्तं नित्योत्सवप्रमुदितेन जनेन सार्द्धम् । यः कारयेत्सुरगृहं भवनं ध्वजांकं श्रीस्तं न मुञ्चति सदा दिवि पूज्यते च ॥१११॥ एवं द्वारार्चनविधिं कृत्वा द्वारबलिं ततः । महाध्वजं द्वारमुखे प्रवेशसमये कृतम् ॥ ११२ ॥

॥ ११० ॥ घण्टा वितान तोरण चित्र इनसे युक्त और ध्वजासे चिह्नित और नित्य उत्साहके कर्ता प्रसन्नमनोंसे युक्त देवताके भवनको जो मनुष्य बनवाता है उसको लक्ष्मी कदाचित् नहीं छोडती और वह सदैव स्वर्गमें पूजित रहता है ॥ १११ ॥ इस प्रकार द्वारपूजाकी विधिको करके जो द्वारबलिको करे. द्वारके मुखमें प्रवेशके समय महाध्वजाका स्थापन करे ॥ ११२ ॥

उसके सब कर्मोंमें पुत्र दारा धन आदिकी वृद्धि होती रहती है. यह द्वारकी विधि ब्रह्माके मुखसे कही हुई जो मनुष्य विधिसे करता है वह सुखी और पुत्रवान् होता है ॥ ११३ ॥ इति पण्डितमिहिरचन्द्रकृतभाषाविवृतिसहिते वास्तुशास्त्रे द्वारनिर्माणं नाम सप्तमोऽध्यायः ॥ ७ ॥ अब वापी कूप तडाग पुष्कर उद्यान मण्डप इनके बनवानेकी विधिको क्रमसे कहताहूं ॥ १ ॥ आय और व्यय आदिकी भली प्रकार शुद्धिको और मास शुद्धिको यहां भली प्रकार विचारे, जैसे घर और देवमन्दिरमें कहआये हैं ॥ २ ॥ त्रिकोण चतुरस्र वर्तुल तडाग आदि उत्तम

पुत्रदारधनादीनां वृद्धिदं सर्वकर्मणि । इति द्वारविधिः प्रोक्तो मया ब्रह्ममुखोदितः । यः करोति विधानेन स सुखी पुत्रवान् भवेत् ॥११३॥इति वास्तुशास्त्रे द्वारनिर्माणं नाम सप्तमोऽध्यायः ॥७॥ अधुना कथयिष्यामि वापीकूपक्रियाविधिम् । तडागपुष्करोद्यान मण्डपानां यथाक्रमम् ॥ १ ॥ आयव्ययादिसंशुद्धिं मासशुद्धिं तथैव च । यथा गेहे देवगेहे तथैवात्र विचारयेत् ॥ २ ॥ त्रिकोणं चतुरस्रं च वर्तुलं चोत्तमं स्मृतम् । धनुषं कलशं पद्मं मध्यमं तज्जलाश्रयम् ॥३॥ सर्पोरगं ध्वजाकारं न्यूनं प्रोक्तं च निन्दितम् ॥ कोशो धान्यं भयं शोकनाशनं सौख्यमेव च ॥४॥ भयं रोगं तथा दुःखं कीर्तिं द्रव्याग्निजं भयम् । यशश्च क्रमतश्चैत्रमासादेस्तत्फलं स्मृतम् ॥५॥ रोहिणी चोत्तरात्रीणि पुष्यं मैत्रं च वारुणम् । पित्र्यं च वसुदैवत्यं भगणो वारिबन्धने । जलशोषो भवेत्सूर्ये भौमे रिक्तं विनिर्दिशेत् ॥ ६ ॥

कहा है. धनुष कलश पद्मके आकारका जलस्थान मध्यम कहा है ॥ ३ ॥ सर्प उरग ध्वजाके आकारका न्यून और निन्दित कहा है. कोश धान्य भय शोकनाश सुख ॥ ४ ॥ भय रोग और दुःख कीर्ति द्रव्य अग्निका भय और यश ये फल क्रमसे चैत्र आदि मासमें जलस्थानके बनवानेमें कहे हैं ॥ ५ ॥ रोहिणी तीनों उत्तरा पुष्य अनुराधा शतभिषा मघा और धनिष्ठा ये नक्षत्रोंका गण जल स्थानके बनवानेमें विहित है,

आदित्यवारको जलस्थान बनवावे तो जलका शोष, भौमवारमें ॥ ६ ॥ रिक्त, शनैश्चरको मलिनता होती है शेषवार शुभदायी होते हैं, नन्दा भद्रा जया रिक्ता पूर्णा जो क्रमसे तिथि होती हैं वे अपने नामके अनुसार फलको करती हैं ये कर्मके कर्ताने कहा है ॥ ७ ॥ लग्नमें चन्द्रमा होय वा जलोदय राशिका होय अथवा पूर्णचन्द्रमा केन्द्र वा बारहवें स्थानमें हो, लग्नमें बृहस्पति शुक्र वा बुध हो तो चिरकाल तक स्थायी रसवाले सुगंधित जलको कहै ॥ ८ ॥ भौम लग्नसे तीसरे हो, शुक्र सातवें हो, छठे सूर्य हो, ग्यारहवें शनैश्चर हो, चन्द्रमा द्वाद

मन्दे च मलिनं कुर्याच्छेषा वाराः शुभावहाः। नन्दा भद्रा जया रिक्ता पूर्णा चैव यथाक्रमम्। यथानाम फलं तद्वत्कुर्यादित्याह कर्मकृत् ॥ ७ ॥ लग्ने शशाङ्कोऽथ जलोदये वा पूर्णः शशी केन्द्रगतो व्यये वा। लग्नेऽथ जीवो भृगुजेऽथ सौम्ये जलं चिरस्थं सुरसं सुगन्धम् ॥८॥ कुजे तृतीये भृगुजेऽस्तगे च षष्ठे रवौ लाभगतेऽर्कपुत्रे। चन्द्रेऽष्टषष्ठो व्ययवर्जिते च प्रियं जलं तद्वतीह चित्रम् ॥ ९ ॥ सौरे तृतीये मदने च चन्द्रे षष्ठे रवौ लाभगते च भौमे। केन्द्रे शुभैश्चाष्टमवर्जितैश्च जलं स्थिरं स्याद्धनपुत्रदं च ॥ १० ॥ केन्द्रत्रिकोणेषु शुभस्थितेषु पापेषु केन्द्राष्टमवर्जितेषु। सर्वेषु कार्येषु शुभं वदन्ति प्रासादकूपादितडागवाप्याम् ॥ ११॥ चन्द्रोदये तद्दिवसे सुरेज्ये केन्द्रस्थिते चोपचयैः खलैश्च। उद्यानकूपादितडागवापीजलाशयानां करणं प्रशस्तम् ॥ १२ ॥

शमवंनको छोडकर छठे आठवें हो तो बडा प्रिय विचित्र जल होता है॥ ९ ॥ शनैश्चर तीसरे हो, चन्द्रमा सातवें हो, सूर्य छठे आर भौम ग्यारहवें स्थानमें हो, अष्टमराशिको छोडकर शुभग्रह केन्द्रमें होय तो धन और पुत्रका दाता स्थिर जल होता है ॥ १० ॥ केन्द्र और त्रिकोणमें शुभ ग्रह स्थित हों, पापग्रह केन्द्र और अष्टमसे भिन्नस्थानमें होंय तो सब कार्योंमें प्रासाद कूप तडाग वापी आदि शुभ होते हैं ॥ ११ ॥ उस दिन चन्द्रमाका उदय हो, बृहस्पति केन्द्रमें स्थित हो, पापग्रह उच्च भवनके होंय तो उद्यान कूप वापी तडाग

जलाशयोंका करना अत्यन्त श्रेष्ठ होता है ॥ १२ ॥ सिंह वृश्चिक धनुको छोडकर सब लग्नोंमें जलके स्थानको शुभ कहते हैं, श्रेष्ठग्रहोंकी दृष्टि, सौम्य योगोंसे जल राशियोंके नवांश और वर्गमें जलस्थानको बनवावे ॥ १३ ॥ संपूर्ण दिशाओंमें जलके स्थानको बनवावे, नैर्ऋत्य दक्षिण अग्नि और वायव्यदिशाको त्यागदे, पूर्व उत्तर ईशान और पश्चिम दिशाओंमें किया हुआ जलस्थान सुख और सुतका दाता होता है ॥ १४ ॥ पूर्व और वरुणकी दिशामें भी पूर्वोक्त फल होता है गृहके मध्यमें स्थित जलस्थानको वर्ज दे, क्रमसे गर्ग वसिष्ठ हैं मुख्य जिनमें

सर्वेषु लग्नेषु शुभं वदन्ति विहाय सिंहालिधनुर्धरांश्च । ग्रहः सदालोकनयोगसौम्ययोगात्प्रकुर्याज्जलभांशवर्गे ॥१३॥ सर्वासु दिक्षु सलिलं प्रकुर्याद्विहाय नैर्ऋत्ययमाग्निवायून् । पूर्वोत्तरेशानजलेशदिक्षु कृतं जलं सौख्यसुतप्रदं च ॥ १४ ॥ न पूर्वकं वारुण दिक्स्थितं च विवर्जयेन्मध्यगृहस्थितं च । क्रमेण गर्गादिवसिष्ठमुख्या दिशास्थितानां च जलाशयानाम् ॥ १५ ॥ पुत्रार्तिरग्नेश्च भयं विनाशः स्त्रीणां कलिर्वा ह्यथ दौष्ट्यमेव । नैःस्वं धनं पुत्रविवृद्धिरुक्ता पूर्वादिदिक्षु फलमेतदेव ॥ १६ ॥ व्यासप्रमाणं द्विगुणं च गुण्यं हारस्य हारोत्तरतोत्तरस्य । मध्येऽष्टहारेष्वपि पिण्डसंज्ञमेकादिहारा विषमाः प्रशस्ताः ॥ १७ ॥ एकान्तरं सन्धिसमेक्षितानां व्याधिर्विनाशो भयशोकमुग्रम् । आद्यन्तयोर्मध्यवियुक्तमेतत्तदा विनाशं कुरुते सपत्न्याः ॥ १८ ॥

ऐसे ऋषि दिशाओंमें स्थित जलाशयोंका यह फल कहते हैं ॥ १५ ॥ पुत्रकी पीडा, अग्निका भय, विनाश, स्त्रियोंका कलह और दुष्टता, धनका नाश, धन और पुत्रोंकी विशेषकर वृद्धि यह पूर्व आदि दिशाओंमें जलस्थानका फल होता है ॥ १६ ॥ जलस्थानके व्यासका जो प्रमाण उसको द्विगुणित करे और हारके उत्तरोत्तरके जो हार हैं उनके मध्यमें आठ हारोंमें पिण्ड संज्ञा होती है उनमें एक आदि विषम हार (१, ३, ५, ७) श्रेष्ठ कहे हैं ॥ १७ ॥ एक हारके अनन्तरपर सन्धिके स्थानमें जलस्थान दीखे तो व्याधिविनाश भय महान शोक होता है. और हारके मध्य

भागको छोडकर आदि अन्तमें जलस्थान होय तो सपत्नीके विनाशको करता है ॥ १८ ॥ पूर्व पश्चिम उत्तर दक्षिणके जो छिद्र और हार हैं उनके मध्यस्थान जलभागमें होय तो शोक मरण और बन्धुओंके नाशको करते हैं. यह बात मध्यके हारोंमें विचारने योग्य है ॥ १९ ॥ जो हारके सूत्र आदि अन्तरमें गतहों और हारके मध्यभागमें जलाशय होय तो शुभ होता है. इसी प्रकार हारके उत्तरोत्तर क्रमसे जलाशय भ्राता और कलत्रआदिको श्रेष्ठ कहे हैं ॥ २० ॥ यदि दिशाके मध्यमें स्थित जलाशय होय तो मनुष्योंको शुभदायी होते हैं । व्यंगभागमें होय तो

पूर्वापरौ चोत्तरयाम्यगेषु च्छिद्रेषु हारेष्वपि मध्यभागे। कुर्वंति शोकं वधबन्धुनाशं हारेषु मध्येष्वपि चिन्त्यमेतत् ॥ १९ ॥ आद्यन्तयोर्हारगतेषु सूत्रसर्वेषु हाराग्रगते शुभा स्यात् । भ्रातृन्कलत्रादियथोत्तराणि हारस्य हारोत्तरतोत्तरस्य ॥ २० ॥ दिङ्मध्य संस्थाः शुभदा नराणां व्यंगेषु बन्धं पशुपत्तिनाशम् । याम्योत्तरं हीनधनं करोति हीनोदकं हीनधनं करोति ॥ २१ ॥ चतुर्थाष्टमगैः पापैर्लग्नगे वा खलग्रहे । चन्द्रेऽष्टमे तदा कर्ता म्रियते मासमध्यतः ॥२२॥ केन्द्रपापग्रहैर्युक्ते अष्टमे च व्ययेऽपि वा । धर्म स्थानगतैर्वापि तज्जलं क्षीयते चिरात्॥२३॥केन्द्रगैः सौरिभौमार्कैरष्टमस्थे निशाकरे । तज्जलं वर्षमध्ये तु न तिष्ठति जलाशये॥२४॥

बन्धन पशु और पत्तियोंका नाश होता है. दक्षिण उत्तरमें जलाशय होय तो धनको हीन करता है, न्यून जल होय तो भी धनको हीन करता है ॥ २१ ॥ चौथे आठवें स्थानमें पापग्रह होय लग्नमें खलग्रह होय चन्द्रमा अष्टम होय तो गृहका कर्ता एक मासमें मरता है ॥ २२ ॥ केन्द्र पापग्रहोंसे युक्त होय अथवा अष्टम ८ व्यय १२ स्थानमें होय तो थोडेही दिनमें जल क्षीण (नष्ट) होता है ॥ २३ ॥ शनैश्चर मंगल सूर्य ये केंद्रस्थानमें हों चन्द्रमा अष्टम स्थानमें हो ऐसे लग्नमें बनवाये जलस्थानमें वर्षदिन भी जल नहीं टिकता ॥ २४ ॥

एकः पापोऽष्टमस्थोऽपि चतुर्थे सिंहिकासुतः । नवमे भूमिपुत्रस्तु तज्जलं विषवत्स्मृतम् ॥ २५ ॥ नन्दाद्याः पूजनीयाश्च पूर्वोक्तेनैव मार्गतः । ईशानादिक्रमेणैव न्यसेदिक्छोधिते स्थले । मध्ये पूर्णां विनिःक्षिप्य कुम्भोपरि शुभे दिने । वरुणस्य विधायादौ पूजां मंत्रैश्च वारुणैः ॥ २६ ॥ वटवेतसकीलानां शिरास्थाने निवेशनम् । ततो ग्रहार्चनं वास्तुपूजाविधिमतः परम् ॥ २७ ॥ सौम्यायने कीटगते पतंगे मधुं विना शीतकरे सुपूर्णे । तथा विरिक्ते विकृते च वारे कार्या प्रतिष्ठा च जलाशयानाम् ॥ २८ ॥ लग्नेषु सौम्यग्रहवीक्षितेषु कार्या प्रतिष्ठा खलु तत्र तेषाम् । जलोदये पूर्णशशी च केन्द्रे जीवे विलग्ने भृगुजेऽस्तगे वा ॥ २९ ॥ एकोऽपि चान्ये भवने स्वकीये केंद्रस्थितो वा शुभदो नराणाम् । एकोऽपि जीवज्ञसितासितानां स्वोच्चस्थितानां भवने स्वकीये ॥ ३० ॥

एक भी पापग्रह अष्टममें स्थित हो, चतुर्थ भवनमें राहु हो और नवमस्थानमें मंगल होय तो विषके समान उस जलस्थानका जल कहा है ॥ २५ ॥ पूर्वोक्त मार्गसे नन्दा आदिकोंका पूजन करै, ईशान आदि क्रमसे दिशाओंकरके शोधित स्थलमें उनका स्थापन करे मध्यमें कुम्भके ऊपर शुभ दिनके समय पूर्णाका स्थापन करे, वरुणके मन्त्रोंसे प्रथम वरुणकी पूजाको करके ॥ २६ ॥ शिरके स्थानमें वट और बेंतकी कीलोंका निवेश करे फिर ग्रहोंकी पूजा और वास्तुपूजाको करे ॥ २७ ॥ उत्तरायण सूर्य हो और वृश्चिकराशिका सूर्य हो, चैत्रके विना चन्द्रमा पूर्ण हो और रिक्तासे भिन्न तिथि हों, विकृतवार होय तो जलाशयोंकी प्रतिष्ठा करनी ॥ २८ ॥ लग्नको सौम्यग्रह देखते होंय तो जलाशयोंकी प्रतिष्ठा करनी, पूर्णचन्द्रमा जलोदयराशिका होय केन्द्रमें बृहस्पति होय लग्न वा सप्तम भवनमें शुक्र होय तो प्रतिष्ठा शुभ होती है ॥ २९ ॥ जो कोई अन्यग्रह अपने भवनके हों वा केन्द्रमें स्थित हों तो मनुष्योंको शुभदायी होते हैं

एकभी ग्रह बृहस्पति बुध शुक्र शनैश्चर अपने उच्चभवनके वा अपने भवनके हों ॥ ३० ॥ केन्द्र वा त्रिकोणमें होंय तो मनुष्योंके लिये वह जल स्थिर और शुभदायी होता है ॥ ३१ ॥ जो पुण्यात्मा मनुष्य नगरमें जलकी शालाको बनाते हैं वे तबतक विष्णुके संग आनन्द भोगते हैं जबतक पृथिवीमण्डलपर जल रहता है ॥ ३२ ॥ इति पं० मिहिरचन्द्रकृतभाषाविवृतियुते वास्तुशास्त्रे जलाशयादिकरणे अष्टमोऽध्यायः ॥ ८ ॥ इसके अनन्तर हे विप्रेन्द्र ! (काष्ठ) वृक्षके छेदनकी विधिको श्रवण करो. देवदारु चन्दन शमी (छोंकर) महुआ ये वृक्ष ॥१॥

केन्द्रत्रिकोणोपगता नराणां शुभावहं तत्सलिलं स्थिरं स्यात् ॥ ३१ ॥ ये कुर्वंति नराः पुण्याः पुरे पानीयशालिकाम् । विष्णुना सह मोदंते यावद्भूमण्डले जलम् ॥३२॥ इति वास्तुशास्त्रे जलाशयादिकरणेऽष्टमोऽध्यायः ॥८॥ अथातः शृणु विप्रेन्द्र दारूणां छेदने विधिम् । सुरदारुचन्दनशमीमधूकतरवस्तथा ॥ १ ॥ ब्राह्मणानां शुभा वृक्षाः सर्वकर्मसु शोभनाः । क्षत्रियाणां तु खदिरबिल्वार्जुनकर्शिशिपाः ॥ २ ॥ शालतूनीकसरला नृपवेश्मनि सिद्धिदाः । वैश्यानां खादिरं सिन्धुस्यन्दनाश्च शुभवहाः ॥ ३ ॥ तिन्दुकार्जुनशाशाश्च वैसराम्राश्च कण्टकाः । ये चान्ये क्षीरिवृक्षाश्च ते शूद्राणां शुभावहाः॥४॥ द्व्यङ्गराशिगते सूर्ये माघे भाद्रपदे तथा । वृक्षाणां छेदनं काष्ठसञ्चयार्थं न कारयेत् ॥ ५ ॥

ब्राह्मणोंके लिये शोभन और सब कर्मोंमें श्रेष्ठ होतेहैं और क्षत्रियोंके खदिर बेल अर्जुन शिंशप (शिरस) ॥ २ ॥ शाल तुनिका सरल ये वृक्ष राजाओंके मंदिरोंमें सिद्धिके दाता होते हैं और वैश्योंको खदिर सिंधु स्यंदन ये शुभदाता होते हैं ॥ ३ ॥ तिंदुक अर्जुन शाश वैसर आम, कंटक और जो अन्य क्षीरवृक्ष हैं वे शूद्रोंको शुभदायी कहेहैं ॥ ४ ॥ द्विस्वभावराशिके सूर्यमें माघमें और भाद्रपदमें काष्ठसंचयके लिये

वृक्षोंका छेदन न करवावे ॥ ५ ॥ सूर्यके नक्षत्रसे वेद ४ गो २ तर्क ६ दिक् १० विश्व १३ नख २० इनकी तुल्य चन्द्रमाका नक्षत्र होय तो दारु काष्ठोंका छेदन शुभदायी होता है ॥ ६ ॥ सब वर्णोंके लिये शुभदायी पूर्वोक्त काष्ठ कहे और देवदारु चन्दन शमी शिंशिपा खदिर ॥ ७ ॥ शाल और शालविस्तृत अर्थात् शालके समान जिनका विस्तार हो ये वृक्ष सब जातियोंमें श्रेष्ठ हैं. एकजातिके वा दोजातिके जो वृक्ष हैं ॥ ८ ॥ उनको ही सब घरोंमें लगावे. तीन जातियोंसे ऊपर न लगावे अर्थात् तीन प्रकारके काष्ठतक ही घरोंमें लगावे चार पांच जातिके

सूर्यर्क्षाद्वेदगोतर्कदिग्विश्वनखसम्मिते। चन्द्रर्क्षे दारुकाष्ठानां छेदनं शुभदायकम् ॥ ६ ॥ सर्वेषामपि वर्णानां दारवः कथिताः शुभाः। सुरदारुचन्दनशमीशिंशिपाः खदिरस्तथा ॥ ७ ॥ शालाः शालविस्तृताश्च प्रशस्ताः सर्वजातिषु। एकजात्या द्विजात्या वा त्रिजात्या वा महीरुहाः ॥८॥ कारयेत्सर्वगेहेषु तदूर्द्धं नैव कारयेत्। एकदारुमया गेहाः सर्वशल्यनिवारकाः ॥९॥ द्विजात्या मध्यमाः प्रोक्तास्त्रिजात्या अधमाः स्मृताः। क्षीरिणं फलिनं चैव कण्टकाढ्यं च वर्जयेत् ॥ १० ॥ श्मशानेनाग्निना चैव दूषिते ऽप्यथवा भुवा। वज्रेण मर्दितं चैव वातभग्नं तथैव च। मार्गवृक्षं पुराच्छन्नं चैत्यं कुलं च दैवकम् ॥ ११ ॥ अर्द्धभग्नार्द्धदग्धाश्च अर्द्धशुष्कास्तथैव च ॥ १२ ॥ व्यङ्गा कुब्जाश्च काणाश्च अतिजीर्णास्तथैव च। त्रिशीर्षा बहुशीर्षाश्च अन्यवृक्षेण भेदिताः ॥१३॥

नहीं और एक काष्ठके जो घर हैं वे सब दुःखोंके निवारक कहे हैं ॥ ९ ॥ दो जातिके काष्ठ मध्यम और तीन जातिके अधम कहे हैं. दूधवाले और फलके दाता और और कंटक आदि वृक्षोंको वर्ज दे ॥ १० ॥ श्मशान अग्नि और भूमि इनसे दूषित और वज्रसे मर्दित और पवनसे भग्न (टूटा) मार्गका वृक्ष लताओंसे आच्छन्न (ढका) चैत्य (चबूतरा) का वृक्ष कुलका वृक्ष अर्थात् बडोंका लगायाहुआ वृक्ष देवताका वृक्ष ॥ ११ ॥ अर्द्धभग्न अर्द्धदग्ध अर्द्धशुष्क अर्थात जो आधे टूटे जले सूखे हों ॥ १२ ॥ व्यंग (तिरछे) कुब्ज (कुबडे) काण अत्यंत जीर्ण और

तीन शिरके, बहुत शिरके और दूसरे वृक्षसे तोडे हुए ॥ १३ ॥ जो वृक्ष स्त्रीके नामसे प्रसिद्ध हैं ये पूर्वोक्त संपूर्ण वृक्ष घरके कामोंमें वर्जने योग्य हैं. दूधवाले वृक्ष दूधको और फलके दाता वृक्ष पुत्रोंको नष्ट करते हैं ॥ १४ ॥ कंटकी वृक्ष कलहको करता है. जिसपर काक बैठते हों वह धनका क्षय करता है. गीधोंका वृक्ष महारोगको और श्मशानके वृक्ष मरणको देते हैं ॥ १५ ॥ जिसपर बिजली गिरीहों वह वज्रभयको देता है. जो पवनसे दूषित हो वह वातके भयको देता है, मार्गके वृक्षसे कुलका ध्वंस होता है, पुरच्छत्रवृक्ष भयको देता है ॥ १६ ॥ कुलके

स्त्रीनाम्ना ये च तरवस्ते वर्ज्या गृहकर्मणि । क्षीरिणः क्षीरनाशाय फलिनः पुत्रनाशनाः ॥ १४ ॥ कण्टकी कलहं कुर्यात्काकाच्छन्नं धनक्षयम् । गृध्रवृक्षं महारोगं श्मशानस्थं मृतिप्रदम् ॥ १५ ॥ वज्राङ्कं वज्रभयदं वातदं वातदूषितम् । मार्गवृक्षे कुलध्वस्तं पुरच्छन्नं भयप्रदम् ॥ १६ ॥ कुल्यवृक्षे भवेन्मृत्युर्देववृक्षे धनक्षयम् । चैत्ये गृहपतेर्मृत्युर्देववृक्षे भयं भवेत् ॥ १७ ॥ अर्द्धभग्नं विनाशाय अर्धशुष्कं धनक्षयम् । व्यंगे मृतप्रजा ज्ञेयाः कुब्जे कुब्जास्तथैव च ॥ १८ ॥ काणे राजभयं विद्यादतिजीर्णे गृहक्षयः । त्रिशीर्षे गर्भपातः स्याद्बहुशीर्षे मृतप्रजा ॥ १९ ॥ अन्यभेदे शत्रुभयमुद्याने खे भयं तथा । वल्लीवृते दरिद्रत्वं पुष्पवृक्षे कुलक्षयः ॥ २० ॥

वृक्षसे मृत्यु, देववृक्षसे धनका नाश, चैत्यके वृक्षसे गृहके स्वामीकी मृत्यु, कुलदेवके वृक्षसे भय होता है ॥ १७ ॥ अर्द्धभग्न वृक्ष विनाशको अर्द्धशुष्क धनके नाशको करते हैं व्यंगमें प्रजा (सन्तान) का मरण जानना. कुब्जमें कुब्ज संतान होती है ॥ १८ ॥ काणे वृक्षसे राजाके भयको जाने, अत्यन्त जीर्णवृक्षसे घरका क्षय होता है, तीन शिरके वृक्षसे गर्भका पात होता है और अनेक शिरके वृक्षसे संतानका मरण होता है ॥ १९ ॥ अन्यवृक्षसे जो भेदन किया हो उससे शत्रुका भय होता है, उद्यानके वृक्षसे आकाशमें भय होता है और लताओंसे जो

ढकाहो उससे दरिद्रता और पुष्पके वृक्षसे कुलका नाश होता है ॥ २० ॥ सर्पसे युक्त वृक्षसे सर्पका भय और देवालयके वृक्षसे नाश होता है और कन्याका जिसमें चिह्न हो उससे कन्याओंका जन्म होता है छिद्रोंसे जो युक्त हो उससे स्वामीको भय होता है. लिंग वा प्रतिमा वा शक्र इन्द्रध्वजा इनको ॥ २१ ॥ कृत्तिका आदि पांच नक्षत्रोंमें चन्द्रमा होय तो कदाचित् न बनवावे, घर देवालय इनमें यत्नसे इसकी परीक्षा करे और मासदग्ध वारदग्ध और तिथिदग्ध ॥ २२ ॥ रिक्ता तिथि अमावस्या और षष्ठी ६ तिथि इनको भी वर्जदे. एकार्गल दोष और

सर्पयुक्ते सर्पभयं देवालयगते क्षयः। कन्याजन्म तु कन्यांके सच्छिद्रे स्वामिनो भयम् । लिंगे वा प्रतिमायां वा तथा शक्रध्वजेऽपि च ॥ २१ ॥ आग्नेयपञ्चके चन्द्रे न विदध्यात्कदाचन । गृहे देवालये वापि परीक्षेत प्रयत्नतः । मासदग्धं वारदग्धं तिथिदग्धं तथैव च ॥२२॥ रिक्कातिथिं च दर्शं च तिथिं षष्ठीं च वर्जयेत् । एकार्गलं तथा भद्रां ये च योगाः कुसंज्ञकाः॥२३॥उत्पातदूषित मृक्षं संक्रान्तौ ग्रहणेषु च । वैधृतौ च व्यतीपाते न विदध्यात्कदाचन ॥ २४ ॥ सौम्यं पुनर्वसुमैत्रं करं मूलोत्तराद्वये । स्वातौ च श्रवणं चैव वृक्षाणां छेदनं शुभम् ॥ २५ ॥ समभूमिर्वने यस्मिंस्तस्मिन्वृक्षं प्रपूजयेत् । गन्धपुष्पादिनैवेद्यं बलिं दद्याद्विशेषतः ॥ २६ ॥ वस्त्रेणाच्छादितं कृत्वा वेष्टयेत्तन्तुना तथा । श्वेतवर्णानुवर्णेन वर्णानुक्तक्रमेण च ॥ २७ ॥

भद्रा और अन्य जो कुयोग हैं ॥ २३ ॥ और उत्पातसे दूषित जो नक्षत्र हैं संक्रांति ग्रहण वैधृति व्यतीपात इनमें घरको कदाचित् न बनवावे ॥ २४ ॥ मृगशिर पुनर्वसु अनुराधा हस्त मूल दोनों उत्तरा स्वाति श्रवण इनमें वृक्षोंका छेदन शुभदायी होता है ॥ २५ ॥ जिस वनकी भूमि समान हो उस वनमें वृक्षका पूजन करै और गन्ध पुष्प आदि नैवेद्यको और विशेषकर बलिको दे ॥ २६ ॥ वस्त्रसे आच्छा

दित (ढक) करके सूत्रसे लपेटे वर्णमें श्वेतवर्ण हो वा चार वर्णोंके युक्तवर्णका हो ऐसे सूत्रसे लपेटे ॥ २७ ॥ इन मन्त्रोंसे उस वृक्षकी यथा योग्य प्रार्थना करै और आचार्य अथवा सूत्रधार रात्रिके समय उस वृक्षके समीप अधिवास (शयन) करे ॥ २८ ॥ विधिका ज्ञाता आचार्य वृक्षका स्पर्श करके रात्रिके समय इस मन्त्रको उच्चारण करै कि, इस वृक्षमें जो भूत हैं उनके स्वस्ति (कल्याण) हो और उनको नम स्कार है ॥ २९ ॥ इस बलिको ग्रहण करके अपने वासका पर्यय आप करो अर्थात अन्यत्र जा बसो प्रार्थना करके वर मांगे, हे वृक्षमें श्रेष्ठ !

मन्त्रैरेतैर्यथान्यायं प्रार्थयेत्तं पुनः पुनः । आचार्यः सूत्रधारश्च रात्रौ तमधिवास्य च॥२८॥स्पृष्ट्वा वृक्षमिमं मन्त्रं ब्रूयाद्रात्रौ विधान वित् । यानीह वृक्षे भूतानि तेभ्यः स्वस्ति नमोऽस्तु वः ॥ २९ ॥ उपहारं गृहीत्वेमं क्रियतां वासपर्ययः । प्रार्थयित्वा वरयते स्वस्ति तेऽस्तु नगोत्तम ॥ ३० ॥ गृहार्थं वान्यकार्यार्थं पूजेयं प्रतिगृह्यताम् । परमान्नमोदकौदनदधिपल्लोलादिभिर्दशैः ॥ ३१ ॥ मद्यैः कुसुमधूपैश्च गन्धैश्चैव तरुं पुनः ॥ सुरपितृपिशाचराक्षसभुजगासुरविनायकाश्च । गृह्णंतु मत्प्रयुक्तां वृक्षं संस्पृश्य ब्रूयात् ॥३२॥यानीह भूतानि वसंति तानि बलिं गृहीत्वा विधिवत्प्रयुक्तम् । अन्यत्र वासं परिकल्पयंतु क्षमन्तु तानद्य नमोऽस्तु तेभ्यः ॥३३॥ वृक्षं प्रभाते सलिलेन सिक्त्वा मध्वाज्यलिप्तेन कुठारकेण । पूर्वोत्तरस्यां दिशि संनिकृत्त्य प्रदक्षिणं शेषमतो विहन्यात्३४

कि, छः गुना कियेहुए सूत्रसे भूमिके तलको शुद्ध करे ॥ ८ ॥ उस सूत्रके भलीप्रकार धारणा करनेके समयमें यदि कोई उस सूत्रका लघंन करे उसकाही अस्थि भूमिके भागमें उस पुरुषके ही प्रमाणको जाने ॥ ९ ॥ जिस दिशामें आसक्त अस्थि दीखे उसी दिशामें शल्यको कहे, उसी दिशामें उसके अस्थि सत्तर ७० अंगुलके प्रमाणसे जाने ॥ १० ॥ सूत्र धारणके समयमें जहां आसनपर स्थित हुआ मनुष्य आदि हो उसके ही अस्थिको वहां जाने इसका उस क्षितिमें संशय न समझे ॥ ११ ॥ नव कोष्ठ किये हुए भूमिके भागमें पूर्व आदि दिशाओंमें अ क च

सुधृते समये तस्मिन् सूत्रं केनापि लंघितम् । तदस्थि तत्र जानीयात्पुरुषस्य प्रमाणतः ॥ ९ ॥ आसक्तो दृश्यते यस्मादिशं शल्यं समादिशेत् । तस्यामेव तदस्थीनि सप्तत्यङ्गुलमानतः ॥ १० ॥ सुधृते समये यत्र आसनोपरि संस्थितः । तदस्थि तत्र जानीयात्क्षितौ क्षणे न संशयः ॥ ११ ॥ नवकोष्ठीकृते भूमिभागे प्राच्यादितो लिखेत् । अकचटतपयशान्कमाद्वर्णानिमानि च ॥१२ ॥ प्रारम्भः स्याद्यदि प्राच्यां नरशल्यं तदा भवेत् । सार्द्धहस्तप्रमाणेन तच्च मानुष्यमृत्यवे ॥ १३ ॥ अग्नेर्दिशि च कः प्रश्ने खरशल्यं करद्वयोः । राजदण्डो भवेत्तस्मिन्भयञ्चैव प्रवर्तते ॥ १४ ॥ याम्यां दिशि कृते प्रश्ने नरशल्यमधो भवेत् । तद्गृहस्वामिनो मृत्युं करोत्याकटिसंस्थितम् ॥ १५ ॥

ट त प श इन वर्णोंको क्रमसे लिखे ॥ १२ ॥ यदि पूर्व दिशामें प्रारंभ होय तो मनुष्यको दुःख होता है वह भी सार्द्ध हस्त १॥ के प्रमाणसे होता है और वह मनुष्यकी मृत्युका हेतु होता है ॥ १३ ॥ अग्निदिशामें प्रश्न होय तो दोनों कर (हाथ) में खर शल्य होता है, उसीमें राज दंड और भय होता है ॥ १४ ॥ दक्षिण दिशामें प्रश्न किया जाय तो नीचेके भागमें नरशल्य होता है. वह घरके स्वामीको मृत्यु (दुःख) को

कटिपर्यंत भागमें करता है ॥ १५ ॥ नैर्ऋत्य दिशामें प्रश्न करे तो सार्द्ध हाथके अधोभागमें अर्थात् डेढ हाथ नीचे श्वानके अस्थिको जाने, उसमें बालकोंकी मृत्यु होती है ॥ १६ ॥ पश्चिमदिशामें प्रश्न होय तो शिव (लोमडी) में शल्य (दुःख) होता है. सार्द्ध हाथके प्रमाणसे होता है वह स्थान स्वामीके प्रवासका कारण होता है ॥१७॥ वायव्य दिशामें प्रश्न होय तो चार हाथके नीचे मनुष्योंके शल्य है उसको भली प्रकार उद्धार करे. बुद्धि

ई.	पृ.	अ.
उ.	म.	द.
वा.	प.	नै.

नैर्ऋत्यां दिशितः प्रश्ने सार्द्धहस्तादधस्तले । शुनोऽस्थि जायते तत्र डिम्भानां जनयेन्मृतिम् ॥ १६ ॥ प्रश्ने च पश्चिमायां तु शिवशल्यं प्रजायते । सार्द्धहस्ते प्रवासाय सदनं स्वामिनः पुनः ॥ १७ ॥ वायव्यां दिशि तु प्रश्ने नराणां वा चतुष्करे । शल्यं समुद्धरेद्धीमान् करोति मित्रनाशनम् ॥ १८ ॥ उत्तरस्यां दिशि प्रश्ने गर्दभास्थि न संशयः । सार्द्धहस्तचतुष्के च पशुनाशाय तद्भवेत् ॥ १९ ॥ ईशानदिशि यः प्रश्नो गोशल्यं सार्द्धहस्ततः । तच्च गोधननाशाय जायते गृहमेधिनः ॥ २० ॥ मध्यकोष्ठे च यः प्रश्नो वक्षोमात्रादधस्तदा । केशाः कपालं मर्त्यास्थि भस्म लोहं च मृत्यवे ॥२१॥ मंत्रश्च–ॐ ह्रीं कूष्माण्डि कौमारि मम हृदये कथय कथय ह्रीं स्वाहा ॥ एकविंशतिवारमनेन मन्त्रेणा भिमंत्र्य प्रश्नमानयेत् । अत्र दिशः सूर्योदयाद्गणनीयाः ॥ जलान्तं प्रस्तरान्तं वा पुरुषान्तमथापि वा ॥ २२ ॥

मान् मनुष्य उसमें मित्रके नाशको जाने ॥ १८ ॥ उत्तर दिशामें प्रश्न होय तो साढे चार हाथपर गर्दभके अस्थिको जाने. वह पशुओंके नाशको कर ता है ॥१९॥ ईशान दिशामें प्रश्न होय तो सार्द्ध हाथपर १॥ गौके शल्यको जाने और वह गृहस्थीके गोधनको नष्ट करता है ॥ २० ॥ मध्यकोष्ठके विषे जो प्रश्न होय तो वक्षः (छाती) के नीचेके प्रमाणसे केश कपाल मनुष्यके अस्थि लोहा ये जानने. ये मृत्युके कर्त्ता होते हैं ॥ २१ ॥ मन्त्र यह

है कि–" ॐ ह्रीं कूष्मांडि कौमारि मम हृदये कथय कथय ह्रीं स्वाहा " इक्कीसवार इस मन्त्रसे अभिमन्त्रित (पढना) करके प्रश्नको लावे और इसमें दिशा सूर्योदयसे गिननी, जलके अन्ततक वा प्रस्तरके अन्तपर्यंत वा पुरुषके अन्ततक ॥ २२ ॥ क्षेत्रको भलीप्रकार शोधकर शल्यका उद्धार करके स्थानका प्रारंभ करे. धातु काष्ठ अस्थि इनसे पैदा हुए शल्य अनेक प्रकारके कहे हैं ॥ २३ ॥ हे द्विजोंमें उत्तम ! परीक्षा करके घरका प्रारंभ करना. जब घरके प्रारंभ कर्ममें शल्य न जानाजाय ॥ २४ ॥ तो फलके पाक होनेपर अर्थात् कष्ट आदिके होनेपर कर्मके ज्ञाता

क्षेत्रं संशोद्धच चोद्धृत्य शल्यं सदनमारभेत् । शल्यानेकविधाः प्रोक्ता धातुकाष्ठास्थिसम्भवाः ॥ २३ ॥ तान् परीक्ष्य प्रकर्तव्यो गृहारम्भो द्विजोत्तम । यदा न ज्ञायते शल्यं गृहारम्भणकर्मणि ॥ २४ ॥ फलपाकेन शल्यं तज्ज्ञातव्यं कर्मवेदिभिः । सशल्ये वास्तुसदने पूर्वं दुःस्वप्नदर्शनम् ॥ २५ ॥ हानिर्वा रोगमतुलं धननाशस्तथैव च । अन्यानि वास्तुशल्यानि कथयामि समासतः ॥२६॥ सप्ताद्वाद्राशिते रात्रौ गौर्वा गोष्ठेऽथ बन्धकी । रोदन्ते वारणोऽश्वो वा श्वानो वा गृहमूर्द्धनि ॥२७॥ वन्यो वा प्रविशेद्यस्य निर्विशङ्कोऽथ वा मृगः । श्येनो वाथ कपोतो वा व्याघ्रो गोमायुर्वा तथा ॥२८॥ गृध्रो वाप्यथवा कृष्णसर्पो वाथ शुकोऽपि वा । नरास्थीनि गृहीतश्च जाङ्गलो वाथ कारणात् ॥ २९ ॥

शल्यको जानलें कि, शल्यसहित वास्तुके स्थानमें पहिले दुष्ट स्वप्न दीखता है ॥ २५ ॥ हानि वा अत्यंत रोग और धनका नाश उस दुःस्वप्नसे होता है. अन्यभी वास्तुके शल्योंको संक्षेपसे कहताहूं ॥ २६ ॥ जिस घरमें सात दिनतक रात्रिके समयमें गौ शब्द करे वा गोष्ठमें बन्धकी शब्द करे और जिसमें हाथी अश्व शब्द करे वा घरके ऊपर श्वान शब्द करें ॥ २७ ॥ अथवा जिस घरमें वनका मृग निडर होकर प्रविष्ट होजाय वा श्येन कपोत व्याघ्र वा गीदड प्रविष्ट हो जायँ ॥ २८ ॥ गीध वा कालासर्प वा शुक (तोता) जो जंगलका हो वह मनुष्यके अस्थि लेकर

किसी हेतुसे प्रविष्ट हो जाय ॥ २९ ॥ जो घर वज्रसे दूषित हो, जो पवन और अग्निसे दूषित हो, यक्ष वा राक्षस वा पिशाच प्रविष्ट होजायँ ॥ ३० ॥ वा रात्रिके समयमें काक वा भूतको ताडना दीजाय जिस घरमें रात्रि दिन कलह हो वा युद्ध हो ॥ ३१ ॥ उस पूर्वोक्त दुःशकुनवाले घरमें भी शल्य जाने, जो अन्य घरके दोष हैं उनमें और काष्ठके दीखनेमें भी और काष्ठोंके व्यत्ययमें भी शल्यको जाने ॥ ३२ ॥ गौका शल्य वा अन्य कोई शल्य जिस स्थानमें हो वहां शल्यके उद्धारको करे वंशआदिका जो शल्य हो और द्वारमार्गका जो शल्य हो ॥ ३३ ॥ बाह्य

वज्रेण दूषितं यच्च यच्च वाताग्निदूषितम् । यक्षो वा राक्षसो वापि पिशाचो वा तथैव च ॥३०॥ काको वा ताड्यते रात्रौ भूतो वापि गृहेऽथवा । कलहं च दिवारात्रौ योषितां युद्धमेव च ॥ ३१ ॥ तत्रापि शल्यं जानीयाद्ये चान्ये गृहदोषकाः । काष्ठेऽपि शल्यं जानीयाद्दारूणां व्यत्यये तथा ॥३२॥ गोशल्ये वान्यशल्ये वा शल्योद्धारं ततश्चरेत् । वंशादीनां च यच्छल्यं यच्छल्यं द्वारमार्गतः ॥ ३३ ॥ बाह्ये वेधस्य यच्छल्यं तद्दोषं च विनाशयेत् । तस्मादनेकशल्यानां ज्ञानं नास्ति तदा नरैः ॥ ३४ ॥ अवश्यमेव कर्तव्यः शल्योद्धारो हितेप्सुभिः । वास्तुपूजां च विधिवत्कारयेत्पूर्वके दिने ॥ ३५ ॥ सुदिने शुभनक्षत्रे चन्द्रतारा बलान्विते । शुद्धे काले प्रकर्तव्यः शल्योद्धारो द्विजोत्तमैः ॥ ३६ ॥ शिलां कुर्यात्समां श्लक्ष्णां हस्तमात्रां दृढां शुभाम् । चतुरस्रां त्रिभागेन पट्टिकाभिर्विनिर्मिताम् ॥ ३७ ॥

जो वेधका शल्य हो उसको भी शल्योद्धार नष्ट करता है जिससे अनेक प्रकारके शल्योंका ज्ञान मनुष्योंको नहीं होसकता तिससे ॥ ३४ ॥ हितके अभिलाषी मनुष्य शल्योद्धारको अवश्य करे, पहिले दिन विधिसे वास्तुपूजा करे ॥ ३५ ॥ सुन्दर दिनमें शुभ नक्षत्रमें और चन्द्र ताराके बलसे युक्त शुद्ध कालमें द्विजोंमें उत्तम शल्योद्धारको करे ॥ ३६ ॥ समान चिकनी हाथभरकी दृढ स्थानके शुभ चौकोर स्थानके त्रिभागमें

वर्तमान पट्टिकाओंसे बनाई हो ऐसी शिलाको बनवावे ॥ ३७ ॥ उतने ही प्रमाणकी आधारशिलाको विधानका ज्ञाता बनवाकर उसके मस्तकको नन्दामें कहा है, और भद्रा नामकी शिलामें दक्षिण हाथ कहा है ॥ ३८ ॥ उसके वाम करमें रिक्ता कही है जयामें उसके चरण कहे हैं, नाभिदेशमें पूर्णा जाननी, उसका संपूर्ण अंग वास्तुपुरुषरूप है ॥ ३९ ॥ संपूर्ण देवस्वरूप वास्तुपुरुष सबको शुभकारी होता है बुद्धिमान् मनुष्य मध्यप्रदेशमें तिस एक शिलाका स्थापन करवावे ॥ ४० ॥ घरके मध्यभागमें चारों तरफसे नाभिमात्र गर्त (गड्ढा) को करके

तावत्प्रमाणामाधारशिलां कृत्वा विधानवित् । नन्दायां मस्तकं प्रोक्तं भद्रायां दक्षिणः करः ॥ ३८ ॥ रिक्ता वामकरे प्रोक्ता जयायां चरणौ तथा । नाभिदेशे तथा पूर्णा सर्वांगे वास्तुपूरुषः ॥ ३९ ॥ सर्वदेवमयः पुंसां सर्वेषां शोभनो भवेत् । तस्मान्मध्ये प्रदेशे तु शिलैकां स्थापयेद्बुधः ॥ ४० ॥ गृहमध्ये नाभिमात्रं कृत्वा गर्तं समन्ततः । शिलामध्ये लिखेद्यंत्रं स्वस्तिकाख्यं सुशोभनम् ॥ ४१ ॥ खनित्वा स्थपतिस्तस्मिंस्त्रिभागान्कारयेद्बुधः । तन्मध्ये स्वस्तिकाकारां कारयेच्च समन्ततः ॥ ४२ ॥ ईशानादिचतुष्कोणे शिलां संपूज्य वेदवित् । ईशानकोणे नन्दायाः पूजनञ्चैव कारयेत् ॥ ४३ ॥ आग्नेयकोणे भद्रां तु नैर्ऋत्ये च जयां तथा । रिक्तां वायव्यदिक्कोणे पूर्णां स्वस्तिकमध्यतः ॥ ४४ ॥

शिलाके मध्यमें स्वस्तिक नामके शोभन यन्त्रको लिखे ॥ ४१ ॥ खोदकर उसमें बुद्धिमान् स्थपित (कारीगर) तीन भागको करे. उसके मध्यमें चारों तरफ स्वस्तिकके आकारको करे ॥ ४२ ॥ ईशान आदि चारों कोणोंमें वेदका वेत्ता (ज्ञाता) शिलाको भलीप्रकार पूजन कर ईशान कोणमें नन्दाके पूजनको करे ॥ ४३ ॥ अग्निकोणमें भद्राका, नैर्ऋत्य कोणमें जयाका, वायव्यकोणमें रिक्ताका, स्वस्तिकके मध्यमें

पूर्णाका पूजन करे ॥ ४४ ॥ विधानका ज्ञाता आचार्य उसका पूर्वके समान क्रमसे पूजन करे. चौरासी ८४ पलका तांबेसे बनाहुआ और दृढ शुभदायी कुंभ ॥ ४५ ॥ जो हाथ भरका हो गर्भ (मध्य) में शुद्ध हो, चार अंगुल जिसका मुख हो छः अंगुल जिसका कण्ठ हो, ढका हुआ हो और भली प्रकार तेजस्वी हो ॥ ४६ ॥ ऐसे घटका मध्यमें स्थापन करके उसके बाह्य देशमें आठ घटोंका स्थापन करे. उन घटोंको भोजन और औषधोंसे पूर्ण करे. उन आठों घटोंको क्रमसे आठों दिशाओंमें दिक्पालोंके मन्त्रोंसे स्थापन करे ॥ ४७ ॥ उनको तीर्थके जलोंसे और

पूर्ववत्पूजयेत्तां तु क्रमेणैव विधानवित् । चतूराशिपलं कुम्भं ताम्रोद्भूतं दृढं शुभम् ॥ ४५ ॥ हस्तमात्रं भवेद्गर्भशुद्धं स्याच्च तुरङ्गुलम् । कण्ठं रसाङ्गुलं तस्य पिहितं वसुवर्चसम् ॥ ४६ ॥ अष्टौ कुम्भा बहिः स्थाप्याः पूरयेद्भोजनौषधैः । दिक्ष्वष्टसु क्रमेणैव दिक्पालानां च मन्त्रकैः ॥ ४७ ॥ तीर्थतोयेन संपूर्य तथा पञ्चनदीजलैः । पञ्चरत्नैर्युतं तच्च सफलैर्बीजपूरकैः ॥ ४८ ॥ कुंकुमं चन्दनञ्चैव कस्तूरीं रोचनां तथा । कपूरं देवदारुञ्च पद्माख्यं सुरभिं तथा ॥ ४९ ॥ अष्टगन्धं तथान्यानि गन्धान्यस्मिन् विनिःक्षिपेत् । वृषशृङ्गोद्भवा सिंहनखोद्भूता तथैव च ॥ ५० ॥ वराहवारणरदे लग्नाश्चाष्ट मृदस्तथा । देवालयद्वारमृदः पञ्चगव्यं समन्त्रितम् ॥ ५१ ॥

पांच नदियोंके जलोंसे भली प्रकार पूर्ण करके वह मध्यका घट पंच रत्न फल और बीजपूरसे युक्त हो ॥ ४८ ॥ कुंकुम चन्दन कस्तूरी गोरोचन कपूर देवदारु पद्म और सुरभि (सुगंधि) अन्य पदार्थ ॥ ४९ ॥ अष्टगंध और अन्यभी गंधके पदार्थ उस घटमें डारे. वृषके शृंगसे उखाडी, सिंहके नखोंसे उखाडीहुई मृत्तिका ॥ ५० ॥ वराह और हाथीके दांतोंमें जो लगीहुई मिट्टी है उससे अन्य जो आठ प्रकारकी मिट्टी और देवमंदिरके द्वारकी मिट्टीको और मंत्र पढे हुए पंचगव्यको ॥ ५१ ॥

पञ्चामृतं तथा पञ्चपल्लवान्पञ्च वा त्वचा। कषायान् पञ्च वा तस्मिन् कलशे तु विनिःक्षिपेत् ॥ ५२ ॥ त्रिमधुं च तथा सप्त धान्यान्पारदसंवृतान्। तत्रावाह्य गणेशादींल्लोकपालांस्तथैव च ॥ ५३ ॥ वरुणं च गृहे स्थाप्य रायकं नागनायकम्। आवाह्य वेदमन्त्रैश्च पूर्वोक्तेन विधानतः ॥ ५४ ॥ आगमोक्तैश्च मन्त्रैश्च मन्त्रैः पुराणसम्भवैः। गायत्र्याऽष्टशतेनैव व्याहृत्याष्टशतेन वा ॥ ५५ ॥ त्रीणिपदेति शतधा तद्विप्रास इति वा तथा। अतो देवा इति तथा दिव्यमन्त्रैः शतत्रयम् ॥५६॥ हुत्वाग्नौ विधिवद्विप्रा वास्तुहोमं ततश्चरेत्। अष्टाधिकं तथा होमं गृहहोमं तथैव च ॥ ५७ ॥ गणपत्यादिमं लोकपालानां होममाचरेत्। दिक्पालानां तथा क्षेत्रपालस्यापि विशेषतः ॥५८॥ दिव्यान्तरिक्षभौमानां होमं मन्त्रञ्च कारयेत्। सुलग्ने सुमुहूर्ते तु शिलास्थापनमाचरेत् ५९

पंचामृत, पंचपल्लव, पांच त्वचा और पांच कषाय इन सबको उस कलशमें डार दे ॥ ५२ ॥ तीन मधु और सप्तधान्य जो पारेसे युक्त हों उनको भी डारे उसमें गणेश आदि देवता और लोकपालोंका आवाहन करके ॥ ५३ ॥ घरमें धनके पति-कुबेर और वरुणको स्थापन करके नागोंके नायक (शेष) का स्थापन करे. पूर्वोक्त विधिसे वेदके मंत्रोंसे आवाहन करके ॥ ५४ ॥ आगमके मंत्रोंसे, पुराणोंमें पढेहुए मंत्रोंसे अष्टशत ८०० गायत्रीसे और अष्टशत ८०० व्याहृतिसे ॥ ५५ ॥ शतवार त्रीणिपदा० इस मंत्रसे वा एकशतवार तद्विप्रासो० इस मंत्र और अतो देवा० यह जो दिव्यमंत्र है इससे तीनसौ ३०० वार ॥ ५६ ॥ विधिसे होमको करके हे ब्राह्मणो ! उसके अन्यदेवताओंके निमित्त वास्तुहोमको करे और आठ अधिक शत १०८ होमको और तिसी प्रकार गृहहोमको करे ॥ ५७ ॥ प्रथम गणपतिके निमित्त होमको करे. फिर लोकपाल दिक्पाल और विशेषकर क्षेत्रपालके निमित्त होमको करे ॥ ५८ ॥ दिव्य अंतरिक्ष भूमि इनकेभी होम मंत्रोंसे होमकरे फिर सुंदर लग्न और

सुन्दर मुहूर्तमें शिलाके स्थापनको करे ॥ ५९ ॥ उसके पश्चिमभागमें महाकुम्भके शिरके ऊपर बडे दीपकको रक्खे उसके पूर्वभागमें शल्यक मन्त्रोंको पढे ॥ ६० ॥ हे नन्दे ! तू आनन्द कर । हे वासिष्ठे ! हे प्रजाके हितकारिणी ! इस गृहके मध्यभागमें तू टिक और सब कालमें सुखकी दाता हो ॥ ६१ ॥ हे भद्रे ! तू पुरुषोंको भद्र (कल्याण) की दाता है हे काश्यपनंदिनि ! तू अतुल आयु आरोग्यको कर और संपूर्ण शल्योंका निवारण कर ॥ ६२ ॥ हे जये ! तू भार्गवकी पुत्री है इससे प्रजाओंके हितको कर । हे देवी ! आपका यहां स्थापन करता हूं तू सम्पूर्ण

तत्पश्चिमे महादीपं महाकुम्भशिरोपरि । स्थापयेत्पूर्वभागे च शल्यमन्त्रानुदीरयेत् ॥ ६० ॥ नन्दे नन्दय वासिष्ठे वसुभिश्च हित प्रजे । तिष्ठाप्यस्मिन्गृहान्ते त्वं सर्वदा सुखदा भव ॥ ६१ ॥ भद्रे त्वं भद्रदा पुंसां कुरु काश्यपनन्दिनि । आयुरारोग्यमतुलं सर्वशल्यान्निवारय ॥६२॥ जये भार्गवदायादे प्रजानां हितमावह । स्थापयाम्यत्र देवि त्वां सर्वाञ्छल्यान्निवारय ॥ ६३ ॥ रिक्ते त्वं रिक्तदोषघ्ने सिद्धिदे सुखदे शुभे । सर्वदा सर्वदोषघ्ने तिष्ठास्मिन्नत्रिनंदिनि ॥ ६४ ॥ अव्यंगे चाक्षते पूर्णे मुनेरंगिरसः सुते । इष्टके त्वं प्रयच्छेष्टं शुभञ्च गृहिणां कुरु ॥ ६५ ॥ ताम्रकुम्भञ्च निक्षिप्य शिलां दीपं तथैव च । गीतवादित्रनिर्घोषं कृत्वा तं पूरयेन्मृदा ॥ ६६ ॥

शल्योंका निवारण कर ॥ ६३ ॥ हे रिक्ते ! तू रिक्त दोषको नाशकरनेवाली है. हे सिद्धिकी दाता और सुखदाता हे शुभे हे सबकालमें सब दोषोंकी नाशक हे अत्रिकी नन्दिनी (पुत्री) ! इस गृहमें तू टिक ॥ ६४ ॥ हे अव्यंगे अर्थात् नाशरहिते हे अक्षते हे पूर्णे हे अंगिरामुनिकी पुत्री हे इष्टके ! तू इष्टको दे और गृहस्थियोंके शुभको कर ॥ ६५ ॥ तांबेके कुम्भको गर्तमें डारे और शिला दीपको भी उसीमें गेरकर गीत

और वादित्रके शब्दको करके उस गर्तको मिट्टीसे पूर्ण कर दे ॥ ६६ ॥ शिलाके कुम्भका हृदयपर स्पर्श करके इन मन्त्रोंको उच्चारण करे-हे वास्तुपुरुष हे भूमिशय्यामें रमणके कर्ता हे प्रभो ! आपको नमस्कार है ॥ ६७ ॥ मेरे घरको धन और धान्य आदिसे समृद्ध (पूर्ण) सब कालमें करो. हे नागनाथ हे शल्यके उद्धार करनेमें समर्थ ! आपको नमस्कार है ॥ ६८ ॥ तू वास्तुपुरुष है और विश्वका धारण कर्ता है इससे प्रजाओंका हित कर. हे पृथिवी ! तू लोकोंको धारण करती है हे देवी ! तुझे विष्णुने धारण किया है. हे देवी ! तू मुझे धारण कर और आस

हृदि कृत्य शिलाकुम्भं मन्त्रानेतानुदीरयेत् । नमस्ते वास्तुपुरुष भूमिशय्यारत प्रभो ॥ ६७ ॥ मद्गृहं धनधान्यादिसमृद्धं कुरु सर्वदा । नागनाथ नमस्तेऽस्तु शल्यस्योद्धरणे क्षम ॥६८॥ वास्तुरूपो विश्वधारी प्रजानां हितमावह । पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वञ्च धारय मां देवि पवित्रं कुरु चासनम् ॥ ६९ ॥ गणपत्यादयो लोका देवा दिक्पालकास्तथा । सायुधाः सगणोपेताः शुद्धं कुर्वन्तु मे गृहम् ॥ ७० ॥ इति मन्त्रान्पठित्वा तु दद्याद्बाह्यबलिं ततः । राक्षसानां पिशाचानां गुह्यकोरगपक्षिणाम् ॥ ७१ ॥ भूतानां च तथा यक्षगणानां ग्रामवासिनाम् । पूर्वोक्तैरागमैर्मन्त्रैर्विधानेन विधानवित् ॥ ७२ ॥ संगृह्णन्तु बलिं सर्वे तृप्ताः शल्यं हरन्तु मे । कुम्भाष्टकानान्तु जलैस्तद्गृहं चाभिषिंचयेत् ॥ ७३ ॥

नको भी पवित्र कर ॥ ६९ ॥ गणपति आदि लोकपाल और देवता दिक्पाल ये सब आयुध (शस्त्र) और गणों सहित होकर मेरे घरको शुद्धकरो ॥ ७० ॥ इन मन्त्रोंको पढकर फिर बालि दे वह बलि राक्षस पिशाच गुह्यक उरग पक्षी इनको दे ॥ ७१ ॥ भूतोंको और यक्षोंके गणोंको, ग्रामके वासी देवताओंको विधिका ज्ञाता आचार्य पूर्वोक्त आगमके मन्त्रोंसे उक्त बलिको दे ॥ ७२ ॥ यह कहै कि, सम्पूर्ण देवता

बलिको ग्रहण करो और तृप्त होकर मेरे शल्यको हरो. आठ कुंभोंके जलसे उस गृहोंको सींचे ॥ ७३ ॥ तीन प्रकारके भेद, उत्पात और दारुण (भयानक) ग्रहके उत्पात ये सब उस घरमें नष्ट हो जाते हैं जिसमें शल्यका उद्धार किया हो ॥ ७४ ॥ आचार्यको गौ दे, ऋत्विजोंको दक्षिणा दे, दान और मानसे ज्योतिषी और स्थपतिको संतुष्ट करके ॥ ७५ ॥ अन्योंको भी अपनी शक्तिके अनुसार दक्षिणासे विधिपूर्वक पूजन कर दीन अंधे कृपण और विशेषकर लिंगी अर्थात् ब्रह्मचारी वा संन्यासी ॥ ७६ ॥ गायक और अन्य नट आदिकोंको दक्षिणा दे

भेदत्रयं तथोत्पाता ग्रहपीडाश्च दारुणाः । ते सर्वे नाशमायान्तु शल्योद्धारे कृते गृहे ॥७४॥ आचार्याय च गां दद्याद्दत्विग्भ्यो दक्षिणां तथा । दानमानेन संतोष्य दैवज्ञं स्थपतिं तथा ॥७५॥ अन्यांश्च विधिवत्पूज्य दक्षिणाभिः स्वशक्तितः । दीनान्धकृपणेभ्योऽपि लिंगिभ्योऽपि विशेषतः ॥७६॥ गायकेभ्यस्तथान्येभ्यो नटेभ्यो दक्षिणां ततः । दद्यात्स्ववेश्मनि यथाशक्ति विप्रांश्च भोजयेत् ॥७७॥ भुञ्जीत बन्धुभिस्सार्द्धं विहरेच्च सुखं ततः । एवं यः कुरुते विप्राः शल्योद्धारं स्ववेश्मनि ॥ ७८ ॥ सुखवान् दीर्घजीवी स्यात्पुत्रान् पौत्रांश्च विन्दति ॥७९॥ इति वास्तुशास्त्रे शल्योद्धारनिर्णयो नाम द्वादशोऽध्यायः ॥ १२ ॥

अपनी शक्तिके अनुसार अपने घरमें ब्राह्मणोंको भोजन करावे ॥ ७७ ॥ फिर बन्धुओंके संग भोजन करे उस मन्दिरमें सुखसे विहार करे, हे ब्राह्मणो ! इस प्रकार जो मनुष्य अपने घरमें शल्योद्धार करता है ॥ ७८ ॥ वह सुखका भागी और दीर्घजीवी होता है पुत्र और पौत्रोंको प्राप्त होता है ॥ ७९ ॥ इति पंडितमिहिरचन्द्रकृतभाषाविवृतिसहिते वास्तुशास्त्रे शल्योद्धारनिर्णयो नाम द्वादशोऽध्यायः ॥ १२ ॥

इसके अनन्तर गृहोंके वेधनिर्णयको कहता हूँ–अन्धक, रुधिर, कुब्ज, काण, बधिर ॥ १ ॥ दिग्वक्र, चिंपिट, व्यंगज, मुरज, कुटिल, कुट्टक, सुप्त, शंखपालक ॥२॥ विकट, कंक, कैंकर यह पूर्वोक्त सोलह प्रकारका वेध स्थानमें होता है. जो घर छिद्रोंसे हीन हो उसमें अन्धक भेद होता है. जो विच्छिद्र दिशाओंमें हो वह काण होता है ॥ ३ ॥ जिसके अंग हीन हों वह कुब्जक होता है. जिसका द्वार पृथिवीमें हो वह बधिर होता है. छिद्र विकीर्ण (जहां तहां) हों उसे दिग्वक्र और अविपद्गतको रंध्र कहते हैं ॥ ४ ॥ तुंग (ऊँचाई) से जो हीन हो वह चिपिट होता है. जिसमें

अतःपरं प्रक्ष्यामि गृहाणां वेधनिर्णयम् । अन्धकं रुधिरञ्चैव कुब्जं काणं बधीरकम् ॥ १ ॥ दिग्वक्रं चिपिटञ्चैव व्यङ्गजं मुरजं तथा । कुटिलं कुट्टकञ्चैव सुप्तञ्च शंखपालकम् ॥ २ ॥ विघटञ्च तथा कङ्कं कैङ्करं षोडशं स्मृतम् । अन्धके छिद्रहीनञ्च विच्छिद्रं दिशि कानकम्॥३॥ हीनाङ्गं कुब्जकञ्चैव पृथ्वीद्वारं बधीरकम् । रन्ध्रं विकीर्णं दिग्वक्रं रुधिरञ्चाविपद्गतम्॥४॥तुङ्गहीनञ्च चिपिटं व्यङ्गं चानर्थदर्शनम् । पार्श्वोन्नतं च मुरजं कुटिलं तालहीनकम् ॥ ५ ॥ शंखपालं जंघहीनं दिग्वक्रं विकटं स्मृतम् । पार्श्वहीनं तथा कंकं कैङ्करं च हलोन्नतम् ॥ ६ ॥ इत्येते अधमाः प्रोक्ता वर्जनीयाः प्रयत्नतः । अन्धके रोगमतुलं रुधिरेऽतीसारजं भयम् ॥ ७ ॥ कुब्जे कुष्ठादिरोगः स्यात् काणेऽन्धत्वं प्रजायते । पृथ्वीद्वारे सर्वदुःखं मरणं वा प्रजायते ॥ ८ ॥

अनर्थ दीखें उसे व्यंग कहते हैं. जो पार्श्वोंमें उन्नत (ऊंचा) हो वह मुरज होता है. जो तालसे हीन हो वह कुटिल होता है ॥ ५ ॥ जो जंघासे हीन हो वह शंखपाल कहाता है. जो दिशाओंमें वक्र (टेढा) हो वह विकट कहाता है. जिसमें पार्श्वभाग न हो उसे कंक कहते हैं. जो हलके समान उन्नत हो उसे कैंकर कहते हैं॥६॥ ये पूर्वोक्त घर अधम कहे हैं. ये सब यत्नसे वर्जने योग्य हैं. अन्धक घरमें अतुल रोग होता है. रुधिर नामके घरमें अतीसार रोगका भय होता है ॥७॥ कुब्जघरमें कुष्ठ आदि रोग होते हैं, काणे घरमें अन्धे मनुष्य पैदा होते हैं, पृथ्वीद्वारमें सब दुःख

वा मरण होता है ॥ ८ ॥ दिग्वक्रमें गर्भका नाश होता है. चिपिटमें नीचोंकी संगति, व्यंगघरमें व्यंगता (अंगहीनता) मुरजमें धनका अभाव. कुटिलमें क्षय (नाश) होता है ॥ ९ ॥ कुट्टकमें भूतदोष होता है. सुप्तमें गृहके स्वामीका मरण होता है. शंखपालमें कुत्सित रूप होता है. विकटमें सन्तानका नाश होता है ॥ १० ॥ कंकघरमें शून्यता, कैंकरमें स्त्रीकी हानि और प्रेष्यता (दासभाव) होती है. कुलिश (बिजली) से तोडा हुआ काष्ठ जो घरके भीतर होय तो मरण होता है ॥ ११ ॥ अग्निसे दग्ध काष्ठ घरमें होय तो निर्धनता होती है संता

दिग्वक्रे गर्भनाशः स्याच्चिपिटे नीचसङ्गतिः । व्यङ्गे च व्यङ्गता नैःस्वं मुरजे कुटिले क्षयः॥९॥ कुट्टके भूतदोषः स्यात्सुप्ते गृहपतेः क्षयः । शङ्खपाले कुरूपं स्याद्विकटेऽपत्यनाशनम् ॥ १० ॥ कङ्के शून्यं कैङ्करे च स्त्रीहानिः प्रेष्यता भवेत् । कुलिशेनाहते दारौ गृहान्तस्थे मृतिर्भवेत् ॥११॥ वह्निदग्धे निर्धनत्वमपत्यादिक्षयो भवेत् । विरूपा जर्जरी जीर्णा अग्रहीनाऽर्द्धदग्धिताः॥१२॥ अङ्गहीनाश्छिद्रहीनाश्छिद्रयुक्ताश्च वर्जयेत् । वक्रे च परदेशः स्याच्छुष्कार्द्ध स्वामिनो भयम् ॥ १३ ॥ व्यङ्गे रोगभयं घोरं सर्वच्छिद्रे मृतेर्भयम् । पाषाणान्तर्गतं गेहं शुभं सौख्यविवर्द्धनम् ॥१४॥ गेहमध्यस्थितं यच्च सर्वदोषकरं भवेत् । विस्तीर्णमानं यद्गेहं तदूर्ध्वं परिकीर्तितम् ॥ १५ ॥ शेषाश्चैव त्रिभागं तु तद्गृहं चोत्तमं स्मृतम् । तुङ्गमूनाधिकं रोगभयं करोति विस्तृतम् ॥ १६ ॥

नकाःनाश होता है. विरूप, जर्जर, जीर्ण, अग्रभागसे-हीन, अर्द्धदग्ध ॥ १२ ॥ अंगसे हीन, छिद्रहीन, छिद्रसे युक्त जो काष्ठ हों उनको वर्ज दे. वक्रकाष्ठ होय तो परदेशमें वास होता है, अर्द्धशुष्कमें स्वामीको भय होता है ॥ १३ ॥ व्यंगमें घोर रोगका भय होता है. सर्वच्छिद्रमें मृत्युका भय कहा है, जो घर पाषाणोंके अन्तर्गत है वह शुभका दाता और सुखका वर्द्धक होता है ॥ १४ ॥ गृहके मध्य भागमें स्थित पाषाण होय तो सम्पूर्ण दोषोंको करता है. जो घर विस्तीर्ण मान है उसको ऊर्ध्व कहते हैं ॥ १५ ॥ जिसकी ऊँचाई घरकी भूमिके त्रिभागकी हो वह घर उत्तम

कहा है और इससे न्यून वा अधिक जिसकी ऊंचाई हो वह विस्तार रोग भयको करता है ॥ १६ ॥ त्रिकोण जो घर है वह धनसे हीन शीघ्र ही होता है, दीर्घ (लम्बा) घर निरर्थक होता है, इसके अनन्तर अन्यभी बाह्य देशमें स्थित दश प्रकारके वेधोंको कहता हूं ॥ १७ ॥ कोण दृक छिद्र छाया ऋतु वंश अग्र भूमि संघातका दाता जो उन दोनोंका हों ये बाह्यके दश वेध कहे हैं ॥ १८ ॥ जिस घरकी कोणके अग्र भागमें अन्य घर हो वा जिसके कोणके संमुख अन्य कोण हो और तैसेही घरके अर्द्ध भागसे मिली हुई अन्य घरकी कोण होय तो वह घर शुभका दाता

त्रिकोणं निधनं शीघ्रं गृहं दीर्घं निरर्थकम् । अथान्यान्दशवेधांश्च कथयामि बहिःस्थितान् ॥ १७ ॥ कोणदृक्छिद्रदृक्छायाऋजु वंशाग्रभूमिकाः । संघातदन्तयोश्चैव भेदाश्च दशधा स्मृताः ॥ १८ ॥ कोणाग्रे वान्यगेहे च कोणात्कोणान्तरं पुरः । तथा गृहार्ध संलग्नं कोणं न शुभदं स्मृतम् ॥१९॥ कोणवेधे भवेद्व्याधिर्धननाशोऽरिविग्रहः । एकं प्रधानद्वारस्याभिमुखेऽन्यत्प्रधानकम् ॥२०॥ द्वारं गृहाच्च द्विगुणं तादृग्वेधः प्रचक्षते । दृष्टिवेधे भवेन्नाशो धनस्य मरणं ध्रुवम् ॥ २१ ॥ समक्षुरं क्षुद्रवेधे पशुहानिकरं परम् । द्वितीये तृतीये यामे छाया यत्र पतेद्गृहे॥२२॥छायावेधं तु तद्गेहं रोगदं पशुहानिदम् । आदौ पूर्वोत्तरा पंक्तिः पश्चाद्दक्षिणपश्चिमे॥२३॥

नहीं होता है ॥ १९ ॥ कोणवेधघरमें व्याधि होती है, धनका नाश और शत्रुओंके संग विग्रह होता है, प्रधान एक द्वारके संमुख प्रधान अन्य घरका द्वार हो ॥ २० ॥ घरसे दूना द्वार हो उसको भी गृहवेध कहते हैं दृष्टिवेधमें धनका नाश और निश्चयसे मरण होता है ॥ २१ ॥ समान क्षुद्र (छोटा) जो घर है वह क्षुद्रवेध होनेपर अत्यन्त पशुहानियोंको करता है, जिस घरमें दूसरे वा तीसरे पहरमें अन्य घरकी छाया पडे ॥२२॥ छायावेधका वह घर है. वह घर रोग और पशु हानिको देता है और जिस घरमें पहिली गृहोंकी पंक्ति पूर्व उत्तरको हो और पिछली पंक्ति

दक्षिण पश्चिमको हो ॥ २३ ॥ वास्तुके मध्यमें जिसकी समान भित्तिहों वह घर शुभदायी कहा है. विषम घरमें अर्थात जो एकतरफ लंबा और एक तरफ न्यून हो उसमें अनेक दोषोंका दाता ऋजुवेध होता है ॥ २४ ॥ ऋजुवेधवाले घरमें महान् त्रास होता है इसमें संशय नहीं है और जिस घरके वंशके आगे वंश हो वा आगे बाह्यकी भित्ति हो ॥ २५ ॥ वह वंशवेध जिस घरमें हो उसमें वंशकी हानि होती है जिस घरकी उक्षों (भुजा) का संयोग यूपके अग्रभागमें होजाय अर्थात् स्तंभके सन्मुख हो ॥ २६ ॥ उसको उक्षवेध जाने उसमें विनाश और कलह होता है. जिस

वास्त्वन्तरे भित्तिसमं शुभदं तत् प्रकीर्तितम् । विषमे दोषबहुलमृजुवेधं प्रजायते॥२४॥ऋजुवेधे महात्रासो जायते नात्र संशयः । वंशाग्रे चान्यवंशः स्यादग्रे वा भित्तिबाह्यगाः ॥२५॥ तद्वंशे वेधयेद्गेहं वंशहानिः प्रजायते । उक्षयोर्यत्रसंयोगो यूपाग्रेषु प्रजायते ॥ २६ ॥ उक्षवेधं विजानीयाद्विनाशः कलहो भवेत् । पूर्वोत्तरे वास्तुभूमौ विपरीतेऽथ निम्नका ॥ २७ ॥ उच्चवेधो भवेन्नूनं तद्वेधे न शुभप्रदम् । द्वयोर्गेहान्तरगतं गृहं तच्छुभदायकम् ॥ २८ ॥ गृहोच्चादर्द्धसंलग्ने तथा पाराग्रसंस्थितम् । संघातमेलनं यत्र गेह योर्भित्तिरेकतः ॥२९॥ विधिवश्यं शीघ्रमेव मरणं स्वामिनोर्द्वयोः । पर्वतान्निःसृतं चाश्मदन्तवद्भित्तिसम्मुखम् ॥ ३० ॥ तद्दन्तवेध मित्याहुः शोकं रोगं करोति तत् । अधित्यकासु यद्गेहं यद्गेहं पर्वतादधः ॥ ३१ ॥

वास्तुकी पूर्वोत्तरकी भूमि विपरीत हो वा निम्न (नीची) हो ॥ २७ ॥ वह उच्चवेध होता है वह शुभदायी नहीं होता है. दो घरोंके अन्तर्गत (मध्यमें) जो घर है वह शुभदायी होता है ॥ २८ ॥ जिस घरकी ऊँचाईसे आधे भागपर दूसरा घर हो और तैसेही पारके अग्रभागमें स्थित हो. जिस घरमें दो घरोंकी भित्ति एक स्थानमें हो वह संघातमें होता है ॥ २९ ॥ उन घरोंमें विधिवशसे शीघ्रही दोनों स्वामियोंका मरण होता है. पर्वतसे निकासा हुआ पत्थर जिसकी भित्तिके संमुख हो ॥ ३० ॥ उसको दन्तवेध कहते हैं वह शोक और रोगको करता है

जो घर पर्वतकी भूमिके ऊपर हो वा जो घर पर्वतके नीचे भागमें हो ॥ ३१ ॥ जो घर पत्थरोंसे मिला हो वा पाषाणोंसे युक्त घोर हो वा जो धाराके अग्रभागमें स्थित हो वा पर्वतके मध्यमें मिला हो ॥ ३२ ॥ जो नदीके तीरमें स्थित हो, दो शृंगों (शिखर) के अंतर्गत हो, जो घर भित्तियोंसे भिन्न हो, जो सदैव जलके समीप हो ॥ ३३ ॥ जिसका द्वार रोताहुआ हो अर्थात् उदासीन हो जिसमें काक और उल्लुओंका निवास हो, जो कपाट और छिद्रोंसे हीन हो, जिसमें शशेका शब्द हो ॥ ३४ ॥ जिसमें अजगर सर्पका निवास हो, जो वज्र और अग्निसे दूषित हो

यद्गेहं चाश्मसंलग्नं घोरं पाषाणसंयुतम् । धाराग्रसंस्थितं वापि संलग्नान्तरपर्वते ॥३२॥ नदीतीरस्थितं वापि शृङ्गान्तरगतं तथा । भित्तिभिन्नं तु यद्गेहं सदा जलसमीपगम् ॥ ३३ ॥ रुदन्तं द्वारशब्दार्थं काकोलूकनिवासितम् । कपाटच्छिद्रहीनं च रात्रौ च शशनादितम् ॥३४॥ स्थूलसर्पनिवासं च यच्च वज्राग्निदूषितम् । जलस्रावान्वितं भीरु कुब्जं काणं बधीरकम् ॥३५॥ यच्चोपघातादिभवं ब्रह्महत्यान्वितं तथा । शालाविहीनं यच्चापि शिखाहीनं तथैव च ॥ ३६ ॥ भित्तिबाह्यगतैर्दारुकाष्ठै रुधिरसंयुतम् । कृतं कण्टकिसंयुक्तं चतुष्कोणं तथैव च ॥ ३७ ॥ श्मशानदूषितं यच्च यच्च चैत्यनिकास्थितम् । वासहीनं तथा म्लेच्छचाण्डालैश्चाधिवासितम् ॥ ३८ ॥ विवरान्तर्गतं वापि यच्च गोधाधिवासितम् । तद्गृहे न वसेत्कर्त्ता वसन्नपि न जीवति ॥ ३९ ॥

जो जलके स्राव (बहाव) से युक्त हो वा कुब्ज काणा बधिर हो ॥ ३५ ॥ जो उपघात (लडाईसे मरण) से युक्त हो, जो ब्रह्महत्यासे युक्त हो जो शालासे रहित हो वा शिखासे विहीन हो ॥ ३६ ॥ भित्तीके बाह्यके जो दारु काष्ठ हैं उनसे जो रुधिर संयुक्त हो, जो कांटोंसे युक्त चारों कोणोंमें हो ॥ ३७ ॥ जो श्मशानसे दूषित हो वा जो चैत्य (चबूतरा) पर स्थित हो, जो मनुष्योंके वाससे हीन हो, जिसमें म्लेच्छ चांडाल बसे हों ॥ ३८ ॥ जो घर छिद्रोंके अन्तर्गत हो, जिसमें गोधाका निवास हो इस पूर्वोक्त सब प्रकारके घरमें कर्ता न बसे और बसे तो न जीवे ॥ ३९ ॥

तिससे बुद्धिमान् मनुष्य इन पूर्वोक्त प्रकारके घरोंको वर्जदे, अन्य घरमें लगेहुए काष्ठको अन्य गृहमें न लगावे ॥ ४० ॥ बुद्धिमान् मनुष्य पुराने काष्ठोंसे घरको न बनवावे और बनवावे तो मरण और संपदाओंके नाशको प्राप्त होता है ॥ ४१ ॥ जीर्ण घरमें नवीन काष्ठ श्रेष्ठ होता है और नवीन घरमें जीर्ण (पुराना) काष्ठ श्रेष्ठ नहीं होता है. जिस स्थानके घर पूर्व उत्तरमें नीचे हों और दक्षिण पश्चिममें ऊंचे हों ॥ ४२ ॥ जिसकी संपूर्ण दिशा तिरछी हों जिसके भागमें पीडाके दाता घर हो जो दक्षिणको एक योजन ऊंचा हो पश्चिममें अर्द्धयोजन

तस्मात्सर्वप्रयत्नेन वर्जयेन्मतिमान्नरः । अन्यवेश्मस्थितं दारु नैवान्यस्मिन्प्रयोजयेत् ॥ ४० ॥ ना गृहं कारयेद्धीमान्पुराणैर्न च दारुभिः । कुर्वन्नाप्नोति मरणं संपदां नाशमेव च ॥ ४१ ॥ जीर्णे तु नूतनं शस्तं नो जीर्णं नूतने शुभम् । पूर्वोत्तरे नीचगता उच्चस्था दक्षिणापरे ॥ ४२ ॥ तिर्यग्गताः सर्वदिशाभागे पीडावहा गृहाः । दक्षिणे योजनमुच्चं पश्चिमे चार्द्धयोजनम् ॥४३॥तदर्द्ध मुत्तरे चैव तस्यार्द्धं पूर्वदिक्स्थितम् । एतद्वेधं नृपाणां च गृहाणां कथितं द्विजाः ॥ ४४ ॥ विशेषेण द्विजातीनां प्रमाणं कथ याम्यतः । पूर्वोत्तरे नीचभागे शतपादान्वितं तथा ॥ ४५॥ दण्डानां पश्चिमे याम्ये द्विशतं सार्द्धसंयुतम् । ऊर्ध्वीभूतः पुमान्यस्य गेहाद्गेहान्तरं यदि ॥ ४६ ॥ दक्षिणस्थं प्रपश्येत तद्वेधं च विनिर्दिशेत् । उच्चस्थोप्यथ नीचस्थः सदा याम्यगृहं त्यजेत् ॥४७ ॥

ऊंचा हो ॥ ४३ ॥ उससे आधा ऊंचा उत्तरमें हो, उससे आधा पूर्व दिशामें हो, हे द्विजो ! यह वेध राजाओंके घरोंका मैंने कहा है ॥ ४४ ॥ इसके अनन्तर विशेषकर द्विजातियोंके घरोंका प्रमाण कहताहूं–पूर्व उत्तरके नीचे भागमें १०० पादोंसे जो युक्त हो ॥ ४५ ॥ पश्चिम और दक्षिणमें जिसकी लम्बाई सार्द्धद्विशत (अढाई सौ) हो, जिसके ऊपरके भागमें स्थित मनुष्य एक घरसे यदि दूसरे घरको ॥ ४६ ॥ दक्षिणमें स्थित हो उसको देखसके वह वेध कहा है, उच्च भागमें स्थित हो वा नीचे भागमें स्थित हो परंतु दक्षिणके घरको सदैव त्यागदे ॥४७॥

उसमें बसे तो अवस्था पुत्र कलत्र ये शीघ्र नष्ट होते हैं, पूर्व उत्तरमें जो घर नीचा है वह जलके समीप भागमें होय तो ॥ ४८ ॥ मध्यकी भूमि दोषकी दाता नहीं होती, इतने ये दोनों घर दीखनेके योग्य हों, जो घर ऊंचेभागमें स्थित पूर्वदिशाके भागमें बीस दंड हों वहभी श्रेष्ठ है ॥ ४९ ॥ अन्यजातिका मनुष्य राजाके मंदिरमें न वसे. सौम्य (उत्तर) भागमें जिसके तीस दंड और पश्चिममें चालीस दण्डहों ॥५०॥ जिसकी दक्षिणदिशामें पंचाशत् ५० दण्ड हों और नीचे भागमें स्थित हों, प्रासादकी वीथी (गली) घर और अग्नि ईशान और नैर्ऋत

आयुःपुत्रकलत्राणि यतः शीघ्रं विनश्यति । पूर्वोत्तरे गृहे नीचे भवेदादौ जलान्तिके॥४८॥मध्यभूमिर्न दोषाय यावद्दृष्टिपथेऽनयोः। तुङ्गस्थे पूर्वदिग्भागे दण्डान्विंशतिसम्मितान् ॥४९॥ न चान्यजातीयनरो नृपसद्म वसेन्नरः । सौम्यभागे तथा त्रिंशच्चत्वारिंशच्च पश्चिमे ॥ ५० ॥ याम्ये पञ्चाशत्संख्यानि दण्डानि नीचसंस्थितः। प्रासादवीथी च तथा गृहं च आग्नेयवायव्यतथेशरक्षे । त्रिकोण वेधः कथितः क्रमेण सुतार्थिना तत्र विवर्जनीयाः ॥ ५१ ॥ आग्नेयं दृष्टितो विद्धं वायौ द्विगुणभूमिषु । नैर्ऋत्ये दृक्पथं यावदीशाने त्रिगुणं गृहात् ॥ ५२ ॥ एतन्नृपाणां कथितं वर्णानामनुपूर्वशः । पूर्वाशादिक्रमेणैव ब्राह्मणादिक्रमेण च । पञ्चाशद्धनुषान्नीचैर्वेधेयं द्विजमन्दिरात् । तथा सौम्यजनो नीचो दण्डान् सप्ततिसंमितान् ॥ ५३ ॥

कोणमें जिसके वेध हों यह त्रिकोणवेध संक्षेपसे कहा. पुत्रका अभिलाषी मनुष्य इसको विशेषकर वर्जदे ॥ ५१ ॥ अग्निकोणका घर दृष्टिसे विद्ध होता है. वायुकोणका घर द्विगुणभूमियोंमें विद्ध होताहै. नैर्ऋत्यमें इतने दृष्टिके मार्गमें हो और ईशानमें गृहसे तिगुनेगृहसे वेध होता है ॥ ५२ ॥ यह राजाओंके घरोंका वेध वर्णोंके क्रमसे कहा वह वेध पूर्व दिशाआदिके क्रमसे ब्राह्मण आदिकोंके क्रमसे कहा, द्विजोंके मंदिरसे पचाश धनुष नीचा अंत्यजातियोंको मंदिर बनवाना और सौम्य स्वभावका नीचजन सत्तरदंड नीचा घर बनवावे ॥ ५३ ॥

वरुणकी दिशामें स्थित घर ऊंचाईमें प्रांतके दण्डभर पुरके प्रमाणसे न्यून, दक्षिणदिशाका घर ऊंचाईमें बीस दण्डभर न्यून होना चाहिये ॥५४॥ अब संक्षेपसे शूद्रोंके पुरसे लेकर पुरको कहता हूँ-प्रांतभागमें दश दण्डपर्यंत पूर्वभागमें नीचा हो ॥ ५५ ॥ नीचे स्थानमें स्थित घरके उत्तर भागमें द्वादश १२ दण्ड होने चाहिये. यदि पश्चिमका घर उच्च भूमिमें होय तो तीस दण्ड होते हैं ॥५६॥ दक्षिण भागमें सौ दण्डपर्यंत गृहोंको वर्जदे अर्थात् न बनवावे. विपरीत भागमें बुद्धिमान मनुष्य पूर्वोक्तसे पादहीन दण्डोंको त्यागकर ॥ ५७ ॥ सौ दण्डपर्यंतमें पुरवासियोंको

जलाशासंस्थितोऽप्युच्चे प्रान्तदण्डान् हरेत् पुरात् । याम्योच्चस्थो हरेद्गेहं दण्डान् विंशतिसम्मितान् ॥ ५४ ॥ शूद्राणां तु समासेन कथयामि पुरात्पुरम् । दशदण्डानि पर्यन्तं प्रयान्ते पूर्वनीचगम् ॥ ५५ ॥ उत्तरे द्वादशं दण्डं नीचस्थानस्थितस्य तु । पश्चिमे त्रिंशद्दण्डानि यदि चेदुच्चभूमिषु ॥५६॥ दक्षिणे शतदण्डानि गृहाणि परिवर्जयेत् । वैपरीत्ये पादहीनान् दण्डान्सन्त्यज्य बुद्धिमान् ॥ ५७ ॥ शतं दण्डानि पर्यन्तं पीडयते पुरवासिनाम् । समभूमिषु सन्त्याज्यो वेधोऽयं द्विजपुङ्गवैः ॥ ५८ ॥ दक्षिणेऽन्तोदिग्विषये भवनवरेऽर्थक्षयोऽङ्गनादोषाः । सुतमरणं प्रेक्षत्वे भवति सदा तत्र वासिनां पुंसाम् । गृहं गृहार्द्धं च तथा चतुर्थी भावो भवेद्दिग्विषये स्थितो वा । ऊर्ध्वे च नीचे यमदिक्स्थितस्य गेहं च चाग्रे प्रभवेच्च दोषः ॥ ५९ ॥

पीडा होती है. ये द्विजोंमें श्रेष्ठोंको समान भूमिमें वेध त्यागने योग्य हैं ॥ ५८ ॥ जिस भवनवर (श्रेष्ठ) का दिशाओंके विषयमें दक्षिणमें अन्तहो उसमें धनका क्षय और स्त्रियोंमें दोष होता है. प्रेक्षत्व (दीखने योग्य) जो अन्य घरसे हो उस घरमें बसनेवाले पुरुषोंके पुत्रोंका मरण होता है. पूरा घर वा घरका अर्द्ध भाग यह चौथा भाव यदि दिशाओंके विषयमें स्थित हो और दक्षिण दिशामें स्थित घरके ऊंचे

वा नीचे भागमें आगे दूसरा घर होय तो दोष होता है ॥ ५९ ॥ जैसे अमावास्यामें उत्पन्न हुई कन्या और पुत्र ये योगसे पिताके मरणको करते हैं. ऐसे ही प्रतापका अभिलाषी मनुष्य दक्षिण दिशाके घरको त्याग दे ॥ ६० ॥ जैसे रक्तकेशी लम्बोष्ठी पिंग (पीले) नेत्री कृष्ण तालुका जो कन्या है वह शीघ्र भर्ताको नाश करती है. इसी प्रकार याम्यदिशाके घरसे पुर भी नष्ट हो जाता है ॥ ६१ ॥ जैसे आलस्यसे देह, कुपुत्रसे कुल और दरिद्रसे जन्म वृथा होते हैं. ऐसे ही याम्यगृहसे पुर नष्ट होता है ॥ ६२ ॥ जहां प्रथम उत्तर दिशामें घर बनाये जांय और दक्षिणदिशामें पीछे बनाये जांय ऐसा घर जहां हो वहां पुत्र और दारा आदिका नाश होता है ॥ ६३ ॥ ईशानमें छाग (बकरा) का स्थापन

अमावास्योद्भवा कन्या पितृहायोगतः सुतः । तथा याम्यं गृहं त्याज्यं नरेण भूतिमिच्छता ॥६०॥ रक्तकेशी च लम्बोष्ठी पिङ्गाक्षी कृष्णतालुका । भर्तारं हन्ति सा क्षिप्रं तथा याम्यगृहात् पुरम् ॥६१॥ आलस्यन यथा देहं कुपुत्रेण यथा कुलम् । दरिद्रेण यथा जन्म तथा याम्यगृहात्पुरम् ॥ ६२ ॥ उदीचीं विन्यसेदादौ पश्चाद्याम्यं तु विन्यसेत् । तद्गृहं विद्यते तत्र पुत्रदारादिनाशनम् ॥६३॥ ईशाने विन्यसेच्छागं न च्छागः सिंहभक्षकः । आग्नेयस्थं गृहं काकं वायव्यस्थं च श्येनकम् ॥६४॥ काकं च भक्षयेदादौ पश्चान्नैर्ऋत्यदिक्कृतम् । छागसदृशमीशाने सिंहनाम्ना तु नैर्ऋते ॥ ६५ ॥ सिंहो भक्षयते श्येनं न काकः श्येनभक्षकः । आग्नेयादि क्रमेणैव अन्त्यजा वर्णसङ्कराः॥६६॥ज्ञातिभ्रष्टाश्च चौराश्च विदिक्स्था नैव दोषदाः । वैपरीत्येन वेधः स्यात्तद्गृहाणां विरोधतः॥६७॥

करे. छाग सिंहका भक्षण नहीं कर सकता अग्निकोणका घर काक होता है, वायव्यदिशामें स्थित घर श्येन होता है ॥ ६४ ॥ वह श्येन प्रथम काकका भक्षण करता है । पीछे नैर्ऋत्य दिशाके कृत्यको बनवावे. ईशानमें भी छागके समान चिह्न बनवावे. नैर्ऋत्यका घर सिंहके नामसे होता है ॥ ६५ ॥ सिंह श्येनको भक्षण करता है, काक श्येनको भक्षण नहीं कर सकता. अग्निकोण आदिके क्रमसे अन्त्यज और वर्ण संकरोंको बनावे ॥ ६६ ॥ जातिसे भ्रष्ट (पतित) वा चौर हैं वे विदिशाओंमें स्थित होयँ तो दोषदायी नहीं होते इससे विपरीत भावसे

स्थित होंय तो उनके गृहोंके विरोधसे दोष होता है ॥ ६७ ॥ घरसे उत्तरदिशामें द्विगुण भूमि और पूर्वमें घरके समान भूमि और पश्चिममें तिगुनी भूमि और दक्षिणमें एक कोशभर भूमि रिक्त (खाली) श्रेष्ठ कही है ॥ ६८ ॥ जो घर मेखलापर स्थित हो जो द्वारके संमुख हो वह घर यदि सौम्य और उत्तरदिशामें स्थित होय तो शुभ नहीं कहा ॥ ६९ ॥ दश हाथकी वा घरके चतुर्थांशकी मेखला होती है. शुभका अभिलाषी पुरुष नगरसे दूनी भूमिको त्याग दे ॥ ७० ॥ अन्यथा नगरको बनवावे तो उसमें वेधको देखे जिस मार्गसे मरेहुए मनुष्य यमलोकको

उत्तरे द्विगुणा भूमिः समा भूमिश्च पूर्वके । पश्चिमे त्रिगुणा भूमिः क्रोशमेकं तु दक्षिणे ॥ ६८ ॥ मेखलासंस्थितं गेहं द्वारस्याभिमुखं च यत् । तद्गृहं न शुभं प्रोक्तं यदि सौम्योत्तरे स्थितम् ॥६९॥ दशहस्ता मेखला स्याच्चतुर्थांशेन वा गृहात् । नगराद् द्विगुणा भूमिः परित्याज्या शुभेप्सुना ॥ ७०॥ नगरं कारयेच्चान्यत्तत्र वेधं विनिर्दिशेत् । यस्मिन्मार्गे जनास्सर्वे मृता यान्ति पितृक्षयम् ॥ ७१ ॥ मार्गः स एव विज्ञेयः शेषा देशांतरं प्रति। गृहभित्तिषु ये लग्नास्ते गृहा गृहिणां सदा ॥७२॥भयदाः पुत्रसन्तापकारकास्तत्र कारयेत् । यथा याम्यं तथा वायुं यथा वायुं तथा उदक् ॥ ७३ ॥ यथा उदक्तथा पूर्वं फलसाम्यं प्रकीर्तितम् । आकर्षयेद्यथा चापमारुह्य भवनं नरः॥७४॥विलोकयति बाणेन लक्ष्यवत्तं भिनत्ति सः । मूलात्तदीशकाष्ठान्तं जलेनापूरितं स्थलम्७५॥

जाते हैं ॥ ७१ ॥ वही मार्ग जानना. शेष मार्ग देशांतरोंके होते हैं. जो गृहस्थियोंके घर घरोंकी भित्तियोंसे मिलेहुए हैं ॥ ७२ ॥ वे भयके दाता और पुत्रोंको दुःखके दाता होते हैं इससे जैसा घर याम्य (दक्षिण) में बनावे वैसाही वायु (पश्चिम) में बनावे. जैसा वायुदिशामें हो वैसाही उत्तरदिशामें बनवावे ॥ ७३ ॥ जैसा उत्तरमें हो तैसाही पूर्वमें बनवावे तो साम्य (इकसा) फल कहा है. जैसे-मनुष्य भवन पर चढकर धनुष्यका आकर्षण (खींचना) करसके ॥ ७४ ॥ बाहिरके मनुष्योंको देखसके वा बाणसे लक्ष्यवालेका भेदन करसके और मूलसे

उसके ईश (स्वामी) की दशापर्यंत स्थल जलसे भरा हुआ हो ॥ ७५ ॥ जो कहीं भी छिद्रमें विलीन (छिपा) न हो ऐसे स्थलके मध्यका घर दोषदायी नहीं होता. कूप उद्यान प्रपा वापी तडाग और जलाशय ॥ ७६ ॥ मन्दिर देवस्थान चैत्य प्राकार तोरण इनमें निरन्तर वास्तु वसता है उनके मध्यमें स्थित घर शुभ होता है ॥ ७७ ॥ दक्षिण उत्तरमें तैसेही पश्चिम पूर्वमें इन चारोंमें जहां मार्गोंका मेल हो उसे चतुष्पथ (चौराहा) कहते हैं ॥ ७८ ॥ पहिला घर दक्षिणभागमें स्थित हो, पश्चिमका घर उत्तर भागमें स्थित हो इनके मध्यस्थानमें किया हुआ जो

न विलीनं क्वचिद्रन्ध्रे तदन्तस्थं न दोषकम् । कूपोद्यानप्रपावापीतडागे च जलाशये ॥ ७६ ॥ मन्दिरे देवसदने चैत्ये प्राकार तोरणे । सततं वसते वास्तु तन्मध्यस्थं गृहं शुभम् ॥७७॥ दक्षिणोत्तरयोश्चैव तथा पश्चिमपूर्वयोः । मार्गयोर्मेलनं यत्र तच्चतुष्पथ मीरितम् ॥७८॥ आदौ गृहं दक्षिणभागसंस्थं पश्चात्तथोत्तरम् । मध्यस्थानकृतं गेहं न दुष्यति कदाचन॥७९॥तथैव पश्चिमे पूर्वे कृतमध्यगतं गृहम् । तथैव सुखदं प्रोक्तं सदनं पश्चिमे स्थितम्॥८०॥विषमे न भवेद्वेधं न वेधं च नतोन्नते । गृहस्य दक्षिणे भागे कूपो दोषप्रदो मतः ॥ ८१ ॥ अपत्यहानिर्भूनाशस्त्वथवा रोगमद्भुतम् । अदर्शनेन दीपारे दूरे वा समभूमिषु ॥ ८२ ॥ न वेधन्तें गृहाः सर्वे यथोक्तदिशि संस्थिताः । अश्वत्थश्च प्लक्षवटोदुम्बराश्च क्रमेण च ॥ ८३ ॥

घर है वह कदाचितभी दूषित नहीं होता ॥ ७९ ॥ तैसेही पश्चिम और पूर्व घरोंके मध्यमें गत जो घर है वहभी तिसी प्रकार सुखदाता है तैसेही पश्चिमदिशामें स्थित सदन (घर) सुखदायी होता है ॥ ८० ॥ विषम घरमें वेध नहीं होता और नतोन्नत (ऊंचे नीचे) में वेध नहीं होता. घरके दक्षिणभागमें कूप दोषका दाता माना है ॥ ८१ ॥ होय तो सन्तानकी हानि, भूमिका नाश अथवा अद्भुत रोग होता है. दीपक और पंक्तिका दर्शन न हो वा सम भूमियोंके दूर हो तो ॥ ८२ ॥ संपूर्ण घर चाहे पूर्वोक्त दिशाओंमें स्थित हो वेधको प्राप्त नहीं होते. पीपल

पिलखन वट और गूलर ये चारों वृक्ष क्रमसे ॥ ८३ ॥ पूर्व आदि दिशाओंमें होंय तो वेध होता है यह पूर्व समयके आचार्य जानते हैं. राज वृक्ष निंब आम्र और केला ॥ ८४ ॥ ये वृक्ष पूर्व आदि दिशाके क्रमसे होंय तो वेध करते हैं, आग्नेय आदि विदिशाओंके क्रमसे दूधवाले वृक्ष और कदम्ब ॥ ८५ ॥ कण्टक वृक्ष और केलेके स्तम्ब होंय तो ये फलके वृक्ष वेध करते हैं पूर्व दिशाके भागमें विवर (छिद्र) हो और दक्षिणमें मठ मन्दिर हो ॥ ८६ ॥ पश्चिममें कमलों सहित जल हो, उत्तरमें खाई हो, पूर्वमें फलवाले वृक्ष हों और दक्षिणमें दूधके वृक्ष हों ॥ ८७ ॥

पूर्वादिदिक्षु वेधः स्यात्सर्वेषां प्राक्तना विदुः । राजवृक्षं तथा निम्बं चाम्रकं कदलीफलम् ॥ ८४ ॥ पूर्वादिक्रमयोगेन वेधन्त्येतद् द्रुमांस्तथा । आग्नेयादिक्रमेणैव क्षीरिणोऽथ कदम्बकाः ॥८५॥ कण्टकाः कदलीस्तम्भा वेधन्ते च फलद्रुमाः । विवरं पूर्वदिग्भागे दक्षिणे मठमन्दिरम् ॥ ८६ ॥ पश्चिमे पौष्करं तोयं खातमुत्तरसंज्ञके । पूर्वेण फलिनो वृक्षाः क्षीरवृक्षाश्च दक्षिणे ॥ ८७ ॥ पश्चिमे जलजा वृक्षा रिपुतो भयदायकाः । क्षीरिणश्चार्थनाशाय फलिनो दोषदा मताः । दशदण्डानि पर्यन्तं पीडयन्ते पुरवासिनाम् ॥ ८८ ॥ कलहं चाक्षिरोगं च व्याधिशोकं धनक्षतिः॥८९॥ वीथ्यन्तरेण दोषः स्यान्न दोषं मार्गमध्यगम् । विदिक्स्थं नैव वेधं तु न वेधं दूरतः सदा ॥ ९० ॥ नीचस्थाने भवेद्वेधः कोणवेधस्तथैव च । भित्त्यन्तरे न दोषः स्यान्न दोषश्चैत्यमध्यमे ॥ ९१ ॥

पश्चिममें जलमें उत्पन्न वृक्ष हों ये सब शत्रुओंसे भयको देते हैं दूधवाले अर्थको नष्ट करते हैं. फलवाले दोषको देते हैं, दश दण्डपर्यंत पुरके वासियोंको पीडा देते हैं ॥ ८८ ॥ कलह नेत्ररोग व्याधि शोक और धनके नाशको करते हैं ॥ ८९ ॥ वीथिके अन्तर (मध्यम) में दोष होता है, मार्गके मध्यमें दोष नहीं होता विदिशाओंमें स्थित हो और दूरपर होय तो सदैव वेध नहीं है ॥ ९० ॥ नीचेके स्थानमें वेध होता है, कोणमें भित्तिके मध्यमें दोष नहीं और न चैत्यके मध्यमें दोष होता है ॥ ९१ ॥

कमलोंके मध्यमें और बाणघातकमें दोष नहीं है, विकोणोंमें और न फलके वृक्षमें दोष है ॥ ९२ ॥ नीच जातियोंमें दोष नहीं है, न भग्न (टूटे) मन्दिरमें दोष है, चौराहेके अन्तमें दोष नहीं, न जीर्ण गृहोंके मध्यमें दोष है ॥ ९३ ॥ अत्यन्त ऊंचा और अत्यन्त नीचा और मध्यमें विषम लंघन जिसमें हों और मध्यमें जहां जल और पर्वत हों इनमें भी वेधका दोष नहीं होता ॥ ९४ ॥ जिस मन्दिरके मध्यमें बेल आम अनारके वृक्ष लगाये हुए हों उसमें भी वेधका दोष नहीं है; यह सत्य बात ब्रह्माके मुखसे सुनी है ॥ ९५ ॥ यदि दोष हो—छठे वर्षमें स्वामी मरता है, नववें

न दोषः पुष्करान्तस्थं न दोषो बाणघातके । न दोषं तु विकोणे तु न दोषं फलवृक्षके ॥९२॥ न दोषं नीचजातेषु न दोषं भग्न मन्दिरे । चतुष्पथान्ते न भवेद्वेधो जीर्णगृहान्तरे॥९३॥ अत्युच्चमतिनीचं च मध्ये विषमलङ्घनम् । अन्तर्जलाद्रिपतने वेधदोषो न विद्यते ॥९४॥अन्तरारोपिता वृक्षा बिल्वदाडिमकेसराः । न तत्र वेधदोषः स्यात्सत्यं ब्रह्ममुखाच्छ्रुतम् ॥ ९५ ॥ वेधदोषे—षड्वर्षे म्रियते स्वामी गतश्रीर्नववमे भवेत् । चतुर्थे पुत्रनाशः स्यात्सर्वनाशस्तथाष्टमे ॥ ९६ ॥ पक्षेण मासेन ऋतुत्रयेण संवत्सरेणापि फलं विधत्ते । शुभाशुभं क्षेममिदं बुधैस्तु नातः परं तत्र विचारमस्ति ॥ ९७ ॥ मातङ्गो दक्षिणे भागे पूर्वे पश्चात्तथोत्तरे । सिंहो विधत्ते मरणं पुत्राणां दोषदं महत्॥९८॥पूर्वे वृषं तथा तोये ध्वजं दोषकरं महत । इतिकण्ठीरवौ गेहौ याम्यपश्चिमदिक्स्थितौ९९॥

वर्षमें लक्ष्मीसे रहित होता है, चौथे वर्षमें पुत्रका नाश होता है और आठवें वर्षमें सर्वनाश होता है ॥ ९६ ॥ एक पक्षसे एक माससे तीन ऋतु ओंसे घर शुभ वा अशुभ फलको देता है यही कुशल है, इससे परे बुद्धिमानोंका उसके विषे विचार नहीं है ॥ ९७ ॥ जिस मन्दिर वा किलेमें हस्तीका स्थान दक्षिणभागमें हो और पूर्व पश्चिम उत्तरमें सिंहका स्थान होय तो मरण करता है और पुत्रोंको महान् दोषको देता है ॥ ९८ ॥ पूर्वमें वृष और जल वा ध्वजा होय तो महान् दोषको करते हैं, यदि कण्ठीरव नामके घर दक्षिण और पश्चिम दिशाओंमें होय ॥ ९९ ॥

पूर्व उत्तरमें ध्वजा होय तो बैलोंको महापीडा करनेवाले कहे हैं, जंबीर, पुष्पके वृक्ष, पनस, अनार ॥ १०० ॥ जाती चमेली शतपत्र (कमल) केशर नारियल पुष्प और कर्णिकार (कनेर) इनसे ॥ १०१ ॥ वेष्टित (ढका) जो घर हैं वे मनुष्योंको संपूर्ण सुखके दाता होते हैं, पहिले वृक्षोंको लगाकर पीछेसे गृहोंको बनावे ॥१०२॥ यदि अन्यथा करै तो वह घर शोभन नहीं होता प्रथम नगरका विन्यास करे अर्थात् नगरकी भूमिका निर्णय करे पीछेसे घरोंको बनवावे ॥ १०३ ॥ यदि अन्यथा करै तो शुभको न कहैं अर्थात् वह घर शुभदायी नहीं होता. पूर्व

पूर्वोत्तरे ध्वजोक्षाणां महापीडाकरौ मतौ । जम्बीरैः पुष्पवृक्षैश्च पनसैर्दाडिमैस्तथा॥१००॥ जातीभिर्मल्लिकाभिश्च शतपत्रैश्च केसरैः॥ नालिकेरैश्च पुष्पैश्च कर्णिकारैश्च किंशुकैः॥१०१॥वेष्टितं भवनं नृणां सर्वसौख्यप्रदायकम्।आदौ वृक्षाणि विन्यस्य पश्चाद् गेहानि विन्यसेत्॥१०२॥अन्यथा यदि कुर्यात्तु तद्गृहं नैव शोभनम् । नगरं विन्यसेदादौ पश्चाद्गेहानि विन्यसेत्॥१०३॥ अन्यथा यदि कुर्वाणस्तदा न शुभमादिशेत्।पीताऽथ पूर्वे कपिला हुताशे याम्ये च कृष्णा निर्ऋतौ च श्यामा।शुक्ला प्रतीच्यां हरिताऽथ वायौ श्वेताथ सौम्ये धवला च ईशे ॥१०४॥ ईशानपूर्वयोर्मध्ये श्वेता पश्चिमनैर्ऋते । तयोर्मध्ये रक्तवर्णा पताका परिकीर्तिता ॥१०५॥ सर्ववर्णा तथा मध्ये पताका किंकिणीयुता । बाहुप्रमाणा कर्तव्या स्तम्भं बाहुप्रमाणकम् ॥ १०६ ॥

दिशामें पीलीपताका, अग्निकोणमें कपिलवर्णकी, दक्षिणमें काली, नैर्ऋतिमें श्यामा, पश्चिममें शुक्ल, वायव्यमें हरी, उत्तरमें सफेद और ईशानमें धवलपताका होती है॥१०४॥ईशानपूर्वके मध्यमें सफेद और पश्चिमनैर्ऋतके मध्यमें रक्तवर्णकी पताका कहीहै ॥ १०५ ॥ किंकिणी (झालर) से युक्त संपूर्ण (वर्ण) रंगकी पताका मध्यमें होती है. वह भुजाके प्रमाणकी होती है. उसका स्तंभभी भुजाके प्रमाणका होता है ॥ १०६ ॥

द्वारमार्गके पूर्वभागमें सोलह हाथकी ध्वजा होती है. इसका स्तंभभी घंटा-भूषणोंसे सहित विधिपूर्वक स्थापन करना ॥ १०७ ॥ दक्षिणमें पुष्पमालाओंसे युक्त स्तंभ द्वारमार्गमें स्थापन करै. यह वास्तुशास्त्र प्रथम बुद्धिमान् गर्गमुनिको ब्रह्माने कहा ॥ १०८ ॥ गर्गमुनिसे पराशरको, पराशरसे बृहद्रथको, बृहद्रथसे विश्वकर्माको वास्तुशास्त्र प्राप्त हुआ ॥ १०९ ॥ वह विश्वकर्मा जगत्के हितार्थ फिर वासुदेव-आदिकोंको भूलोकमें भक्तिसे कहता भया ॥ ११० ॥ इस पवित्र परम रहस्य (गुप्त) को जो नर पढताहै उसकी वाणी सफल होतीहै यह मैं सत्य कहता

यद्द्वारमार्गे पूर्वे तु ध्वजः षोडशहस्तकः । स्तंभोऽस्य विधिवत् स्थाप्यः सघण्टाभरणीकृतः ॥१०७॥ पुष्पमालान्वितः स्थाप्यो द्वारमार्गेऽथ दक्षिणे । इति प्रोक्तं वास्तुशास्त्रं पूर्वं गर्गाय धीमते॥१०८॥गर्गात्पराशरः प्राप्तस्तस्मात्प्राप्तो बृहद्रथः । बृहद्रथाद्विश्व कर्मा प्राप्तवान्वास्तुशास्त्रकम्॥१०९॥स विश्वकर्मा जगतो हितायाकथयत् पुनः । वासुदेवादिषु पुनर्भूलोके भक्तितोऽब्रवीत्॥११० इदं पवित्रं परमं रहस्यं यः पठेन्नरः । स्यात्तस्यावितथा वाणी सत्यं सत्यं वदाम्यहम् ॥१११॥ अथ सुविमलविद्यो विश्वकर्मा महात्मा सकलगुणवरिष्ठः सर्वशास्त्रार्थवेत्ता । सकलसुरगणानां सूत्रधारः कृतात्मा भवननिवसतां सच्छास्त्रमेतच्चकार ॥११२॥

इति ब्रह्मोक्तविश्वकर्मप्रकाशे श्रीविश्वकर्मणोक्तवास्तुशास्त्रे त्रयोदशोऽध्यायः ॥ १३ ॥ समाप्तोऽयं विश्वकर्मप्रकाशः ॥

हूं ॥ १११ ॥ इसके अनन्तर अत्यंत निर्मल है विद्या जिसकी ऐसा महात्मा विश्वकर्मा जो सबगुणोंमें श्रेष्ठ है, संपूर्ण शास्त्रोंके अर्थका ज्ञाता है, संपूर्ण देवताओंके गणोंका सूत्रधार है और पुण्यात्मा है वह भवनमें निवासियोंके इस लिये वास्तुशास्त्रको करता भया ॥ ११२ ॥

इति पं० मिहिरचन्द्रकृतभाषा० श्रीब्रह्मोक्तविश्वकर्मप्रकाशे विश्वकर्मणोक्तवास्तुशास्त्रे त्रयोदशोऽध्यायः ॥ १३ ॥ इति भाषाटीका समाप्ता ॥

इदं पुस्तकं मोहमय्यां श्रीकृष्णदासात्मज-क्षेमराज-श्रेष्ठिना स्वकीये " श्रीवेंकटेश्वर " मुद्रणालये मुद्रयित्वा प्रकाशितम् ॥ संवत् १९९२, शके १८५७.

विज्ञापन ।

नाम	की रु आ
कर्मविपाक-नक्षत्रचरणगत मूल । इससे तीन जन्मका वृत्तान्त ज्ञात होता है	०-१२
कर्मविपाक-नक्षत्रचरणगत, भाषाटीकासहित.	१-०
केरलीयप्रश्नरत्न-भाषाटीकासहित । मूकप्रश्न,मुष्टिप्रश्न आदि नाना प्रकारके प्रश्न कहनेके लिये बहुत ही चमत्कारी अवश्य फल घटानेवाले उपाय और सरल चक्र	१-०
खेटकौतुक-भाषाटीकासहित इसमें नववाव स्वानखानाने चमत्कारिक फलादेश कहा है.	०-१०
ग्रहलाघव-सान्वय भाषाटीका और उदाहरण सहित, स्व०ज्योतिर्भूषण पं० बच्चूजा द्वारा परिशोधित	१-०
चमत्कारचिन्तामणि-भाषाटीकासहित । भावफलादेशका ग्रन्थ । ज्योतिष सीखने	

नाम	की रु आ
वाले विद्यार्थियोंको अवश्य लेना चाहिये, इसके द्वारा ज्योतिषका शीघ्र ज्ञान होगा.	०-४
चमत्कारज्योतिष-ज्यो० पं० नारायणप्रसादमिश्ररचित । मूक प्रश्न आदि अनेक चमत्कारिक विषय भाषाटीकासहित.	०-१५
जन्मपत्रीप्रदीप-भाषाटीकासहित	०-१२
जातकसंग्रह-मूल । फलादेशमें आवश्यक विषयोंका संग्रह, सब जातक ग्रन्थोंका सार	०-१४
जातकसंग्रह-भाषाटीकासहित ग्रंथोंके सबालंकारोंसे विभूषित ..	१-०
जातकालङ्कार--संस्कृतटीका--सहित.	०-६

पुस्तक मिलनेका ठिकाना-

श्रेयराज श्रीकृष्णदास. "श्रीवेङ्कटेश्वर" स्टीम-प्रेस. बम्बई.

गङ्गाविष्णु श्रीकृष्णदास. "लक्ष्मीवेङ्कटेश्वर" स्टीम-प्रेस. कल्याण-बम्बई.

॥ इति विश्वकर्मप्रकाशो भाषाटीकायुतः समाप्तः ॥